श्रीगणेशायनमः ॥ जयतिविजितरागः केवलालोकशाली सुरपतिकृतसेवः श्रीमहावीरदेवः । यदसमसमयाख्यश्चारुगांभीर्यभाजः सकलनयसमूहाविंदुभावंभजंते ॥१॥ श्रीवीरःसजिनःश्रियेभवतुयत् स्याद्वाददावानले भस्मीभूतकुतर्ककाष्टनिकरे तृण्यंति सर्वेप्यहो ॥ संशीतिव्यवहारलुंचनपरव्यक्तिकरानिपातवशेषभसा वाधासंभवशंकरप्रभृतयो दोषाः परेरोपिताः ॥२॥ वाग्देवीसंविदेनःस्तान् सदायासर्वदेहिनां चिंतितार्थान् विपनीहकल्पवल्लीवसेविता॥३॥ नत्वानिजगुरून्भक्त्या षड्दर्शनसमुच्चये टीकांसंक्षेपतःकुर्वे स्वान्योपकृतिहेतवे॥४॥ इहहिजगतिगरीयश्चित्तवतांमहतांपरोपकारसंपादनमेवंसर्वोत्तमास्वार्थसंपत्तिरितिमत्वा परोपकारैकप्रवृत्तिसार श्चतुर्दशशतसंख्यशास्त्रविरचनाजनितजगज्जंतूपकारः श्रीजिनशासनप्रभावविर्भावनभास्करोयाकिनीमहत्तराधर्मसूनुर्बोधलब्धबोधिबंधुरो भगवान्श्रीहरिभद्रसूरिः षड्दर्शनीवाच्यस्वरूपंजिज्ञासूनांतत्तन्नदीयग्रंथविस्तरावधारणशक्तिविकलानांसकलानांविनेयानामनुग्रहविधित्सया स्वल्पग्रंथमहार्थंसद्भूतनामान्वयंषड्दर्शनसमुच्चयंशास्त्रंप्रारभमाणः शास्त्रारंभेसंगत्याभिधेययोःसाक्षादभिधानायसंबोधनप्रयोजनयोश्चसंसूचनायप्रथमंश्लोकमेनमाह सद्दर्शनंजिनंनत्वा वीरंस्याद्वाददेशकंसर्वदर्शनवाच्योर्थःसंक्षेपेणनिगद्यते ॥१॥ सत्शब्दस्तूद्यमानंछाद्मस्थिकज्ञानापेक्षयाप्रशस्तंवा दर्शनमुपलब्धिर्ज्ञानंकेवलंद्रव्यंयस्य ससद्दर्शनः अथवासत्प्रशस्तंदर्शनंकेवलदर्शनंतद्भिचारित्वात्केवलज्ञानंचयस्य ससद्दर्शनः सर्वज्ञः सर्वदर्शीत्यर्थः तंअनेनविशेषणेनश्रीवर्द्धमानभगवतोज्ञानातिशयमाविरभीभवत्। अथवासदर्चितंसकलनरसुरासुरेंद्रादिभिरभ्यर्चितंदर्शनंमतंयस्य ससद्दर्शनस्तं अनेनचतदीयदर्शनस्यत्रिभुवनपूज्यतामभिधानः। श्रीवर्द्धमानस्यत्रिभुवनविभोः सुतरांत्रिभुवनपूज्यतांव्यनक्तीतिशयंप्राचीकरत् जयतिरागद्वेषादिशत्रुनितिजिनस्तं अनेनाःथायापगमातिशयमुदधीभवत्। तथास्यात्कथंचित्सर्वदर्शनसंमतसद्भूतवस्तुज्ञानांमिथसापेक्षतयावदनंस्याद्वादः। सदसन्नित्यानित्यसामान्यविशेषाभिलाप्याःनभिलाप्याभयात्मानेकांतइत्यर्थः ननुकथंसर्वदर्शनानांपरस्परविरुद्धभाषिणामभीष्टवस्तुशाःसद्भूताःसंभवेयुर्येषांमिथःसापेक्षतयास्याद्वादःसत्प्रवादःस्यादि

निचेत् उच्यते यद्यपि दर्शनानि निजमतभेदेन परस्परं विरोधं भजन्ते तथापि ते रुच्यमानाः संतो ते पि वस्तुंशाः यामिथः सापेक्षाः संतः समीचीनतामंचंति ॥ तथाहि ॥ सौगतैरनित्यत्वं सांख्यैर्नित्यत्वं नैयायिकैर्वैशेषिकैश्च परस्परविरुद्धकेनित्यानित्यत्वेसदसत्त्वे सामान्यविशेषौ च मीमांसकैः स्याद्वादवज्रांभिन्नाभिन्ने नित्यानित्यत्वेसदसदंशौ सामान्यविशेषौ शब्दस्यनित्यत्वं च केभिल्लालस्वभावविपरीतपुरुषादीनि जगत्कारणानि शब्दब्रह्मज्ञानाद्वैतवादिभिश्च शब्दब्रह्मज्ञानाद्वैतानि चेत्सादयोपेक्षवस्तुंशाः परेरंगीक्रियंते ते सर्वेपि सापेक्षाः संतः परमार्थसत्यतां प्रतिपद्यंते निरपेक्षास्त्वन्योन्येन निरस्यमानानभोनलिनायंत इत्यलंविस्तरेणस्याद्वादस्यदेशकः सम्यग्वक्ता स्याद्वाददेशकस्तं अनेनवचनातिशयमंचीकथत् तदेवंचत्वारोऽतिशयाः शास्त्रकर्तुः साक्षादाचचक्षिरे तेषांहेतुहेतुमद्भावएवं भाव्यः। यतएवनिःशेषदोषक्षयः। ततएवसर्वज्ञः यतएवसर्वज्ञस्ततएवसद्भूतार्थवादी यतएवसद्भूतार्थवादी ततएवत्रिभुवनाभ्यर्च्य इति एवमतिशयचतुष्टयीप्रवरंवीरं महावीरंवर्तमानतीर्थाधिपतेः श्रीवर्द्धमानाभिधानं नत्वामनसातदतिशयचिंतनेन वाचातदुच्चारणेन कायेनभूमौशिरोलगनेनचप्रणिधायेत्यर्थः एतेनादिमंगलमभिदधे मध्यंमंगलंतुजिनेंद्रोदेवतातत्वरागद्वेषविवर्जितइत्यादिनाजिनमतकीर्तनेनकीर्तयिष्यति अंत्यंपुनरभिधेयतात्पर्यः पर्यालोच्य सुबुद्धिभिरित्यत्र सुबुद्धिशब्देनवक्ष्यतितस्यत्रिविधस्यापिफलमिदं तंमंगलमाईएम—पज्जंतएसञ्जस्स पढमंसत्तुस्माविग्धपारगमणायनिद्दिष्ट १ तस्मेवयञ्जिज्जलं मध्यमयं अतिमंचतस्मेवअघोछित्तिनिमित्तं। सिस्य प्रसिस्माइवंसस्य २ वीरंनत्वेत्युक्तं तत्रक्काप्रत्ययस्योत्तरक्रियासापेक्षत्वान्निगद्यतक्रियापदमध्यसंबंधनीयं कोनिगद्यते सर्वदर्शनवाच्योऽर्थः सर्वाणिमूलभेदापेक्षया समस्तानियानि दर्शनानि वोद्वादीनि तेषांवाच्योऽभिधेयोऽर्थेवतत्वं प्रमाणादिलक्षणः संक्षेपेणसमासेननिगद्यते अभिधीयतेमयेत्युक्तमप्यत्रार्थाद्गम्यते एतेनसाक्षादभिधेयमभ्यधात् संबंधप्रयोजनेतुसामर्थ्यावसेये सर्वदर्शनवक्तव्यदेवतत्वादिज्ञानमुपेयं इदं शास्त्रंतस्योपायएवमुपायोऽलक्षणः संबंधस्तूचितोद्रष्टव्यः प्रयोजनंतुद्वेधा कर्तुःश्रोतुश्चयद्यपिद्वेधाअनंतरंपरंपरंच कर्तुरनंतरंप्रयोजनंस्वानुग्रहः श्रोतुरनंतरंसर्वदर्शनाभिमतदेवतत्वप्रमाणादिज्ञानंद्वयो

रपिपरंपरंपुनर्हेयोपादेयदर्शनाभिज्ञत्वाहेयमपहायोपादेयंचोपादायपरंपरया नंतचतुष्टयात्मिकासिद्धिरितिनत्वयंशास्त्रकारः सर्वदर्शनसंबंधीनि शास्त्राणि सम्यग्परिज्ञायेदपरोपकारायभक्तुं शास्त्रंदृष्टवान् तत्कथमनेनैवेहेदंनाभिदधे अमुकममुकंदर्शनंहेयममुकंचोपादेयमितिचेत् उच्यते इहसर्वदर्शनान्यभिधेयतयाभक्तानि तानिमाध्यस्थेनैवाभिदधानोऽन्योचितीनातिक्रामति इदमिदंहेयमिदंचोपादेयमितिब्रुवाणस्तुप्रत्युतसर्वदर्शनानांचानादेयवचनीयतामंचति नत्वेवंतर्ह्यस्याचार्यस्यनपरोपकारार्थाप्रवृत्तिः कुतएवंभाषसेनन्वेषदर्शयामियेकेचनमादृशाः श्रोतारः स्वयमल्पबुद्धित्वेनहेयोपादेयदर्शनानांविभागंनजानीयुस्तेषांसर्वदर्शनसतत्वंनिशम्यभवत्युतैवंबुद्धिर्भवेत्सर्वदर्शनानितावन्मिथोऽविरुद्धाभिधायीनि तेषुचकतरत्परमार्थसदितिपरिछिद्यते किमेतैर्दर्शनैर्दुर्ज्ञानैः प्रयोजनंयदेवहि स्वस्मेरोचतेतदेवानुष्ठेयमिति एवंविधाश्चाविभागज्ञाअस्मिन्कालेभूयांसोऽनुभूयंते। तदेवंशास्त्रकारस्यसूरेरुपकारायप्रवृत्तस्यप्रत्युतप्रभूतानामपकारायापिप्रवृत्तिःप्रबभूवततश्चत्वारमिच्छतोमूलहानिरजनिष्टेतिचेन्न शास्त्रकारात्सर्वेषामुपकारायैवप्रवृत्तात्कस्याप्यपकारासिद्धेर्विशेषणद्वारेणहेयोपादेयविभागस्यापिकतिपयसहृदयहृदयसंवेद्यस्यसंसूचनात्॥ तथाहि ॥ सद्दर्शनंत्वा सद्दीयमानेसत्येवप्रशस्तार्चितसाधुपुरुषत्यनेकार्थनाममालावचनात् सत्सत्यंपुनरसत्यं दर्शनंमतंयस्यतं जिनमितिविशेष्यंचतुर्विंशतिजिनानामेकतरंरागादिशत्रुनयात्सान्वयनामानंजिनंवीतरागंनत्वा एतेनपदद्वयेनचतुर्विंशतेरपिजिनानामन्योन्यंमतभेदोनास्तीतिसूचितं तर्हिश्वेतांबरदिगंबरशाक्यसांख्यमिथोमतभेदइतिचेत् उच्यते मूलतोऽमीषांमिथोनभेदः किंतुपाश्चात्यएवेति कीदृशंजिनं अक्षीरं आः स्वयंभूः अः कृष्णः ईश्वरः आअउ इतिस्वरत्रययोगे उइतिसिद्धं तान्दूरयति तन्मनापासनेन प्रेरयतीत्यविप्रत्ययेगीरं सृष्ट्यादिकर्तृब्रह्मविष्णुशंकरदेवताभिमतानांनिरासकमित्यर्थः तथास्याद्वाददेशकंस्याद्वादंवदंतिछिंदंते कचिदुइतिडप्रत्ययेस्याद्वादशास्त्रतत्त्वसद्भूतविशेषादिदूषणोद्घोषणैः स्याद्वादस्यछेदिनइत्यर्थः तेषांईलक्ष्मींमहिमानंश्यति तत्तदीयमतावासनेनतनूकरोतियत् ततस्याद्वाददेशं कैगैरैंग्रादेके कायतइति कचिदुइतिडकंवचनंस्याद्वाददेशकंवचनंयस्यतं अ

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

नेनविशेषणेन प्रागुक्तानुक्तानामशेषाणां बौद्धादीनां संग्रहः इतिशब्दः प्रकारार्थः चशब्दः समुच्चये इत्यप्रमाणवादिचरकप्रमुखाणांच मतानामुच्छेदकारिवचनमित्यर्थः जिनंनत्वामयासर्वदर्शिवाच्योऽर्थोनिगद्यतेदृतिउक्तंग्रंथकृता अत्रचनमनक्रियाप्राक्कालसंबंधिनी क्त्वाप्रत्ययस्य प्राक्कालवाचकत्वात् निगदनक्रियातुवर्त्तमानजातेरेकेनैवग्रंथकृताक्रियमाणेनानुपपन्ने अपरथासकलव्यवहारोच्छेदप्रसंगात् नचैवंभिन्नकालयोः क्रिययोरेककर्तृकताबौद्धमतेसंभवति तेनक्षणिकत्वस्वभ्युपगमात् ततः कश्चित् बौद्धमतस्यप्रस्तुतग्रंथस्यादावुक्तत्वेनोपादेयतांमन्येततन्निवारणायप्रागुक्तविशेषणसंगृहीतमतन्निरसनंपुनरिहसूचितंद्रष्टव्यं एतेषांपरदर्शनानांनिरसनप्रकारोग्रंथांतरादवसेयः तदेवंजिनस्यविशेषणद्वारेणसत्पदर्शनितांसर्वपरदर्शनजेतृत्वंचनतांचादर्शिताः सकलान्यदर्शनानांहेयत्वेनदर्शनस्योपादेयताचसूचितामंतव्यातोनास्माद्ग्रंथकारात् सत्यासत्यदर्शनविभागानभिज्ञानामप्युपकारः कश्चनसंभवीतद्विभागस्यापिव्यंजितत्वात् तथाचापरः कश्चिदाह ननुयेषांसत्यासत्यमतविभागविभावकेग्रंथकारवचसिसम्यगास्थानभविनीतेषांकावार्तेति उच्यतेयेषामास्थाभाविनीतेद्वेषरागद्वेषाभावेनमध्यस्थचेतसः अन्येपुनारागद्वेषादिकालुष्यकलुषितत्वाद्दुर्बोधचेतसः येदुर्बोधचेतससेषांसर्वज्ञेनापिसत्यासत्यविभागप्रतीतिः कर्तुंदुःशकाकिंपुनरपरेणेतितानगणय्यमध्यस्थचेतसउद्दिश्यविशेषणाद्यत्यासत्यासत्यमतविभागज्ञानस्योपायंग्राहसद्दर्शनमितिवीरंकथंभूतंसद्दर्शनंसंतः साधवोमध्यस्थचेतसइतियावत् तेषांदर्शनंज्ञानमर्थात् सत्यासत्यमतविभागज्ञानंयथावदा—परीक्षाक्षमत्वेनयस्माद्वीरात्ससद्दर्शनस्तंएतेनश्रीवीरस्ययथावदाप्तादिस्वरूपमेवपरीक्षणीयमितिसूचितंअथवासतांसाधूनांदर्शनंज्ञानंश्रद्धानंवार्थश्रद्धानलक्षणंयस्मात्ससद्दर्शनः अथवासंतोविद्यमानाजीवाजीवादयः पदार्थास्तेषांदर्शनंयथावद्बोधकंयस्माद्वीरात् ससद्दर्शनस्तंकुतएवंविधंयतः स्याद्वादशब्दंकंप्रागुक्तस्याद्वादभाषकंएवंविधमपिकुतइत्याहयतोजिनंरागद्वेषादिजयनशीलंजिनोहिवीतरागत्वादसत्यंनभाषतेतत्कारणाभावादितिभावः शेषश्लोकव्याख्यानंप्राग्वदेवंचात्रैवमुक्तंभवतियेहिश्रीवीरस्ययथावदाप्तत्वादिपरीक्षांविधास्यंतेस्याद्वादंचतत्प्रणीतंमध्य ॥२॥

JAIN EDUCATION INTERNATIONAL FOR PRIVATE & PERSONAL USE ONLY www.jainelibrary.org

स्थतयासम्यगवलोक्यपश्चात्परमतान्यवलोकिष्यंते सत्यासत्यदर्शनविभागमपिस्वयमेवाःवभो— तेकिमस्मद्वचनस्यास्थाकरणाकरणेनेति एतेनग्रंथकृतासर्वथाःशर्थेमाध्यस्थमेवदर्शितं द्रष्टव्यं सत्यासत्यदर्शनविभागपरिज्ञानोपायश्चहितबुद्ध्याःअभिहितोऽवगंतव्यः पुरातनैरपीत्थमेवसत्यासत्यदर्शनविभागस्यकारणात् तदुक्तंपूज्य श्रीहरिभद्रसूरिभिरेवलोकतत्वनिर्णये ॥ बंधुर्नःसभगवान्रिपवोपिनान्येसाक्षान्नरश्तरएकतरोपिचैषांश्रुत्वावचः सुचरितंचपृथग्विशेषं वीरंगुणातिशयलोलतयाश्रिता स्मः॥१॥ पक्षपातोनमेवीरेनद्वेषःकपिलादिषु॥युक्तिमद्वचनंयस्यतस्यकार्यःपरिग्रहः॥२॥ प्रभुश्रीहेममूरिभिरप्युक्तंवीरस्तुतौ॥ नश्रद्धयैवत्वयिवीरपक्षपातोनद्वेषमात्रादरुचिः परेषुयथावदाप्तत्वपरीक्षयातुत्वामेववीरप्रभुमाश्रिताःस्मः॥१॥ इति नूत्नंप्रसर्वदर्शनवाच्योर्थोवक्तुंप्रक्रांतः सचसंख्यातिक्रांतः तत्कथं स्वल्पीयसाऽनेनप्रस्तुतशास्त्रेणसोभिधातुंशक्यो जैनादन्यदर्शनानांपरसमयापरनामधेयानामसंख्यातत्वात् तदुक्तंसम्मतिसूत्रेश्रीसिद्धसेनदिवाकरेण॥ जावईयावयणपहातावईयाचेवहुंतिनयवायाजावईयानयवायातावईयाचेवपरसमया ॥१॥ व्याख्या अनंतधर्मात्मकस्यवस्तुनोयएकदेशाःन्यदेशनिरपेक्षस्तस्यावंतोऽवधारणप्रकाराः संभवंति तावंतोनयाअपरिशुद्धाभवंति तेचवचनमार्गाउच्यंते ततोऽयंगाथार्थः सर्वस्मिन्वस्तुनियावंतोयावत्संख्यावचनपथाःवचनानामन्योन्यैकदेशवाचकानांशब्दानांमार्गाअवधारणप्रकाराभवंति तावंतएवभवंतिनयवादाः यानांतत्तदेकदेशावधारणप्रकाराणांवादाः प्रतिपादकाः शब्दप्रकाराःयावंतोनयवादाएकैकांशावधारणवाचकशब्दप्रकाराः तावंतएवपरसमयाः परदर्शनानिभवंति स्वेछाप्रकल्पितविकल्पनिबंधनत्वात्परसमयानांविकल्पानांचासंख्यत्वात् अयंभावः यावंतोजनेतत्तदपरापरवस्त्वेकदेशानामवधारणप्रतिपादकाः शब्दप्रकाराभवेयुस्तावंतएवपरसमयाभवंति ततस्तेषामपरिमितत्वमेवस्वकल्पनाशिल्पघटितविकल्पानामनियतत्वात् तदुत्थप्रवादानामपितत्संख्यापरिमाणत्वादितितदेवंगणनातिगाः परसमयाभवंति अथवामूत्रकृतांग्येद्वितीयेऽंगे परप्रवादकानांत्रीणिशतानित्रिषष्ट्यधिकानिपरिसंख्यायंतेतदर्थसंग्रहणगाथेयं॥ असीइसयंकिरियाणंकियवाईणहोइतुरा

लमीई अन्नाणि असनहीवेणईयाणंचबत्तीसं ॥१॥ अस्य व्याख्या ॥ अशीत्यधिकं शतंक्रियाणांतिक्रियावादिनां तत्रक्रियांजीवः
वा यस्तित्वंवदंतीत्येवंशीलाः क्रियावादिनः मरीचिकुमारकपिलोलूकमाठरप्रभृतयः तेपुनरमुनोपायेनाशीत्यधिकशतसंख्या
विज्ञेयाः जीवाजीवाश्रवबंधसंवरनिर्जरापुण्यापुण्यमोक्षरूपान्नवपदार्थान् परिपाट्यापरिपाट्यावा देविचेरेण्यजीवपदार्थस्याधः
स्वपरभेदाद्युपन्यसनीयौतयोरधोनित्यानित्यभेदौतयोरप्यधः कालेश्वरात्मनियतिस्वभावभेदाः पंचन्यसनीयाः ततश्चैवंविक
ल्पाः कर्तव्याः ॥तद्यथा॥ अस्तिजीवः स्वतोनित्यः कालतइत्येकोविकल्पः अस्यचविकल्पस्यायमर्थः वियतेरव्ययमात्मास्वेनरूपे
णनित्यश्चकालतः कालवादिनोमतेकालवादिनश्चनामतेमंतव्याः येकालएवजगत्सर्वमन्यंते तथाचतेशाहुः ॥ नकालमंत
रेणचूतकाशोकसहकारादिवनस्पतिकुसुमोद्गमफलबंधादयोनियमकरणानुषक्तपौतमघातनक्षत्रगर्भाधानवर्षादयोयाकृतुवि
भागसंपादिताबालकुमारयौवनवलिपलितागमादयोवाऽवस्थाविशेषाघटंतेप्रतिनियतकालविभागतएवतेषामुपलभ्यमा
नत्वात् अन्यथासर्वमव्यवस्थयाभवेत् नचैतदृष्टमिष्टंवा अपिचमुद्गपक्तिरपिनकालमंतरेणलोकेभवंतीदृश्यते किंतुकाल
क्रमेण अन्यथास्थालींधनादिसामग्रीसंपर्कसंभवेप्रथमसमयेपितस्याभावोभवेत् नचभवति तस्मादयत्कृतकंतत्सर्वंका
लइति॥तथाचोक्तं॥नकालव्यतिरेकेणगर्भबाल्यशुभादिकंयत्किंचिज्जायतेलोकेतदसौकारणंकिल ॥१॥ किंतुकालादृतेनैव
मुद्गपक्तिरपीक्ष्यते स्थाल्यादिसंनिधानेपिनतः कालादसौमता ॥२॥ कालाभावेचगर्भादिसर्वस्यादव्यवस्थया ॥ परेष्वहेतुसद्भावमात्रा
दवंतदुद्भवात् ॥३॥ कालःपचतिभूतानिकालःसंहरतिप्रजाः॥ कालःसुप्तेषुजागर्तिकालोहिदुरतिक्रमः ॥४॥ अत्रपरेष्वहेतुसद्भावमा
त्रादितिपरागभिमतवनितापुरुषसंयोगादिरूपहेतुसद्भावमात्रादेवंतदुद्भवादितिगर्भादुद्भवप्रसंगात् तथाकालः पचतिपरिपाकं
नयति परिणतिंनयतिभूतानिपृथ्व्यादीनितथाकालः संहरतेप्रजाः पूर्वपर्यायात् भूम्यादिव्यपर्यायांतरेणप्रजालोकानुत्थापयति तथा
कालः सुप्तेषुजागर्तिकालएवसुप्तंजनमापदोरक्षतीतिभावः तस्माद्धि स्फुरंदुरितक्रमोः पाकर्तुमशक्यः कालइति उक्तेनैवप्रकारेण
द्वितीयोपिविकल्पोवक्तव्यो नवरंकालवादिन इतिवक्तव्ये ईश्वरवादिन इतिवक्तव्यं तद्यथा अस्तिजीवः स्वतोनित्यईश्वरतः

ईश्वरवादिनश्चसर्वं जगदीश्वरकृतंमन्यंते ईश्वरंचसहसिद्धं ज्ञानवैराग्यधर्मैश्वर्यरूपचतुष्टयंप्राणिनांचस्वर्गापवर्गयोः प्रेरकमि
ति तदुक्तं ॥ ज्ञानमप्रतिघं यस्यवैराग्यंचजगत्पतेः ऐश्वर्यंचैवधर्मश्चसहसिद्धंचतुष्टयं ॥१॥ अन्योजंतुरनीशोयमात्मनः सुखदुः
खयोः ईश्वरप्रेरितोगच्छेत् स्वर्गंवाश्वभ्रमेववा २ इत्यादि तृतीयोविकल्पआत्मवादिनांआत्मवादिनोनामपुरुषएवेदंसर्वमित्यादिप्र
तिपन्नाः चतुर्थोविकल्पोनियतवादिनांतत्रैवमाहुः नियतिर्नामतत्रास्तियद्वशादेतेभावाः सर्वेपिनियतेनैवरूपेणप्रादुर्भावमश्नुवते
नान्यथा तथाहि यद्यदायतोभवति तत्तदातत एवनियतेनैवरूपेणभवदुपलभ्यते अन्यथाकार्यकारणव्यवस्थाप्रतिनियत
रूपव्यवस्थाचनभवेत् नियामकाभावात् ततएवकार्यनेयत्यतः प्रतीयमानामेनांनियतिकोनामप्रमाणपथकुशलोबाधि
तुंक्षमते माप्रापदन्यत्रापिप्रमाणपथव्याघातप्रसंगः तथाचोक्तं नियतेनैवरूपेणसर्वेभावाभवंतियतू ततोनियतिजा
तेयंतेतत्स्वरूपानुवेधतः १ यद्यदेवयतोयावत्तत्तदेवततस्तथा नियतंजायतेन्यायात् कएनांबाधितुंक्षमः॥२॥ पंचमोविक
ल्पः स्वभाववादिनांस्वभाववादिनोत्येवमाहुः इहवस्तुनः स्वतएवपरिणतिः स्वभावः सर्वेभावाः स्वभाववशादुपजायंते ॥
तथाहि मृद्भ्यःकुंभोभवतिनपटादिः तंतुभ्योपिपटउपजायते नघटादिः एतच्चप्रतिनियतंभवनंनतथास्वभावतामंतरेणघ
टासंरंभकारीकृते तस्मात्स्वकलमिदंस्वभावकृतमवसेयं ॥तथाचाहुः कःकंटकानांप्रकरोतितैक्ष्ण्यंविचित्रभावंमृगपक्षिणांच
स्वभावतः सर्वमिदंहितन्नकामचारोस्तिकुतः प्रयत्नः ॥१॥ यदर्थाःकंटकस्तीक्ष्णऋजुरेकश्चकुंचितः फलंचवर्तुलंतस्यावदके
नविनिर्मितं २ इत्यादि॥ अपिच आस्तामन्यत्कार्यजातमिहमुद्गपक्तिरपिनस्वभावमंतरेणभवितुमर्हति तथाहि स्थालीधन
कालादिसामग्रीसंभवेपिनकंकटुकमुद्गानांपक्तिरुपलभ्यते तस्माद्यद्भावेभवति तत्तदन्वयव्यतिरेकानुविधायितत्कृतमितिस्व
भावकृतामुद्गपक्तिरप्येष्टा ततःसकलमेवेदं वस्तुजातंस्वभावहेतुकमवसेयमिति तदेवंस्वतइतिपदेनलब्धाःपंचविकल्पाः एवंच
परतइत्यनेनापिपंचलभ्यंते परतइतिपरेभ्योद्रव्यक्षेत्रकालभावरूपेणात्मायिष्यते यतः प्रसिद्धमेतत् सर्वपदार्थस्वरूपा
पेक्षयास्वरूपप
रिच्छेदो यथादीर्घत्वाद्यपेक्षयाह्रस्वत्वादिपरिच्छेदः एवमात्मनिसंभावीन्समीक्ष्य तद्व्यतिरिक्तेबुद्धिप्रवर्त्तते अलोयदात्मनःस्व

रूपंतत्पञ्चनएवावधार्यतेनस्वत इति एवंनित्यत्वापरित्यागेनदशविकल्पालभ्याः एवमनित्यपदेनापिसर्वेपिमिलिताविंशतिः एते चजीवपदार्थेनलभ्याः एवमजीवादशसुपदार्थेषुप्रत्येकंविंशतिर्विंशतिर्विकल्पालभ्यंते ततोविंशतिर्नवगुणिता शतमशीत्युत्तरं क्रियावादिनांभवति ॥ तथानकस्यचित् प्रतिक्षणमनवस्थितस्यपदार्थस्यक्रियासंभवति उत्पत्त्यनंतरमेवविनाशादित्येवं येवदंति तेअक्रियावादिनः आत्मादिनास्तित्ववादिनइत्यर्थः तेचकोकुलकांठेविद्धिरोमकसुगतप्रभृतयः ॥ तथाचाहुरेकेक्षणिकाः सर्वसंस्काराः अस्थिराणांकुतः क्रियाभूतिर्येषांक्रियासेवकारणंसेवचोच्यते १ एतेषांचतुरशीतिर्भवतिसाचाः मुनोपायेनदृष्ट व्यापुण्यापुण्यवर्जितशेषजीवाजीवादिपदार्थसप्तकन्यासः तस्यचाधः प्रत्येकंस्वपरविकल्पोपादानं असत्त्वादात्मनोनित्यानित्य विकल्पोनस्त कालादीनांपंचानामपरस्मात्व परीयदृछान्यस्यतेदृहयदृछावादिनः सर्वेप्यक्रियावादिन स्ततःप्राग्यदृछानोपन्यस्ता त एवंविकल्पाभिलापः नास्तिजीवः स्वतः कालत इत्येकोविकल्पः अयंभावः इहपदार्थानांलक्षणतःसत्तानिश्चीयते कार्यताया नचात्मनस्तादृगस्तिलक्षणं येनतत्सत्तांप्रतिपद्येमहि नापिकार्यमणूनामिवमहीधरादिसंभवति अतोनास्त्यात्मेति एवमीश्वर दिभिरपियदृछापर्यंतेविकल्पावाच्याः सर्वेमिलिताः षड्विकल्पाः अमीषांचविकल्पानामर्थः प्राग्वद्भावनीयः नवरंयदृछात इति यदृछावादिनांमतेयदृछात्यनभिसंधिपूर्विकाऽर्थप्राप्तिः अथकेतेयदृछावादिनः उच्यते इहयेभावानांसंतानापेक्षयानप्र तिनियतंकार्यकारणभावमिछंतिकिंतुयदृछया तेयदृछावादिनः तेह्येवमाहुः ॥ नखलुप्रतिनियतोवस्तूनांकार्यकारणभा वस्तथाप्रमाणेनायहणात् ॥ तथाहि ॥ शालूकादपिजायतेशालूकोगोमयादपिजायतेशालूकः वन्हेरपिजायतेवन्हिररणिकाष्ठा दपिधूमादपिजायतेधूमोऽग्रींधनसंः यर्कादपिकंदादपिजायतेकंदलीजादपिवरादयोपिबीजादुपजायतेशारवेकदेशादपिगो धूमबीजादपिजायतेगोधूमावंशबीजादपि ततोनप्रतिनियतः क्वचिदपिकार्यकारणभाव इतियदृछातः क्वचित्किंचिद्भवतीतिप्र तिपत्तव्यं नखल्वन्यथावस्तुसद्भावंपश्यंतोऽन्यथात्मानंप्रेक्षावंतः परिकूशयंति यदुक्तं अतर्कितोपस्थितमेवसर्वंचिरंज नानांसुखदुःखजातं काकस्यतालेनयथाभिघातोनबुद्धिपूर्वोस्तिरथाभिमानः १ इत्यादिदृष्टमेवसर्वंजातिजरामरणादि

कंतोकेकाकतालीयाभमिति तथाचषड्विकल्पात्वध्वास्तथानास्तिपरतः कालतदृत्येवमपिषड्विकल्पालभ्यंतेसर्वेपिमिलिताद्वा दशविकल्पाजीवादिषविषदृसुपदार्थेषुप्रत्येकंद्वादशविकल्पालभ्यंते ततोद्वादशभिः सप्तगुणिताश्चतुरशीतिर्भवंत्यक्रियावा दिनांविकल्पाः ॥ तथाकुत्सितंज्ञानमज्ञानंतद्येषामस्तीत्यज्ञानिकाः ततोऽनेकस्वरादितिमत्वर्थीयइकप्रत्ययः अथवाज्ञानेन चरंतीत्यज्ञानिकाः असंचिंत्यकृतकर्मबंधवैफल्यादिप्रतिपत्तिलक्षणाः शाकल्यसात्यमुग्रमोदपिप्पलबादरायणजैमुनिव सुप्रभृतयस्तेत्येवंब्रुवते नज्ञानंश्रेयस्त्वमिनूसतिविरुद्धप्ररूपणायांविवादयोगतश्चित्तकालुष्यादिभावतोदीर्घतरसंसारप्रवृत्तेः यदापुनरज्ञानमाश्रीयते तदानाहंकारसंभवोनापिपरस्योपरिचित्तकालुष्यभावस्ततोनबंधसंभवः अपिचयः संचिंत्यक्रियतेक र्मबंधः सहाणविपाकोऽतएवावश्यवेद्यस्तस्यतीव्राध्यवसायतोनिष्पन्नत्वात् परशुमनोव्यापारमंतरेणकायवाक्कर्मवृत्तिमात्र तोविधीयतेनतत्रमनसोपिनिवेशस्ततोनासाववश्यंवेद्योनापितस्यदारुणोविपाकः केवलमतिशुष्कसुधाधवलितभित्तिग तरजोमलदृवसकर्मसंगः स्वतएवशुभाध्यवसायपवनविक्षोभितोऽपयातिमनसोऽभिनिवेशाभावश्चाज्ञानाभ्युपगमेसमुप जायतेज्ञानेसत्यभिनिवेशसंभवात् तस्माद्ज्ञानमेवमुमुक्षुणामुक्तिपथप्राप्तेनाभ्युपगंतव्यंनज्ञानमिति अन्यत्रभवेयुक्तोसानस्या भ्युपगमोयदिज्ञानस्यनिश्चयः कर्तुंपार्येतयावतासएवनपार्यते तथाहि सर्वेपिदर्शनिनः परस्परंभिन्नमेवज्ञानंप्रतिपन्नास्त तोननिश्चयः कर्तुंशक्यतेकिमिदंसम्यगुतेदमिति अथयत्सकलवस्तुस्तोमसाक्षात्कारिभगवद्बहुमानोपदेशादुपजायते ज्ञानंतत्सम्यग्नेतरत् असर्वज्ञमूलत्वादितिचेत् सत्यमेतत् किंतुसएवसकलवस्तुस्तोमसाक्षात्कारीनतुसौगतादिसंमतः सुगतादिरुतबर्हुमानादितिकथंप्रीयते तद्ग्राहकप्रमाणाभावादितिदवस्थःसंशयः ननुयस्यदिवः समागत्यदेवाः पूजा दिकंकृतवंतः सएववर्द्धमानसर्वज्ञोनशेषाः सुगतादयइतिचेन्नूनंवर्द्धमानस्यचिरातीतत्वेनेदानींसद्भावग्राहकप्रमाणाभाव त् संप्रदायादवसीयेइतिचेन्ननुसोपिसंप्रदायापूर्वंपुरुषप्रवर्त्तितः किंवासत्यपुरुषप्रवर्त्तितइति कथमवगंतव्यं प्रमाणा भावात् नवाप्रमाणकंवयंप्रतिपत्तुंक्षमाः माप्रापरतिप्रसंगः अन्यच्चमायाविनः स्वयमसर्वस्यापिजगतिस्वस्यसर्वज्ञभावंप्र

कटयिषवस्तथाविधेंद्रजालवशाद्दर्शयंति देवानितस्ततः संचरतः स्वस्यपूजादिकंकुर्वतः ततोदेवागमनदर्शनादपिकथंसर्वज्ञत्वनिश्चयः तथाचाह जैनएवस्तुतिकारःसमंतभद्रः देवागमनभोयान चामरादिविभूतयः मायाविष्वपिदृश्यंते नातस्त्वमसिनोमहान् १ भवतुवावर्द्धमानस्वामीसर्वज्ञस्तथापितस्यसक्तोपमाचारांगादिकउपदेशोनपुनः केनापिस्वयंविरचय्यप्रवर्त्तितइतिकथमवसेयमतींद्रियेविषयेप्रमाणाभावात् भवतुवातस्येवायमुपदेशस्तथापितस्यायमर्थोनान्यइतिनशक्यंप्रत्येतुंनाप्तार्थाहिशब्दालोकेप्रवर्त्तंते तथादृष्टेनातूतोःन्यथाप्यर्थसंभावनायांकथंविवक्षितार्थनियमनिश्चयः छद्मस्थेनहिपरचेतोवृत्तेरप्रत्यक्षत्वातू कथमिदंज्ञायते एषसर्वज्ञस्याभिप्रायोःनेनाभिप्रायेणायंशब्दः प्रयुक्तोनाभिप्रायांतरेणेतिततोदीर्घतरसंसारकारणात् सम्यगनिश्चयाभावान्मज्ञानंश्रेयःकिंवज्ञानमेवेतिस्थितंतेचाज्ञानिकाः सप्तषष्टिसंख्या अमुनोपायेनप्रतिपत्तव्याः इहजीवाजीवादीनपदार्थानकेचित्पदृकादीव्यवस्थाप्यपर्यंते उत्पत्तिःस्थाप्यते तेषांचजीवादिकानांनवानांप्रत्येकमधःसप्तसत्वादयोन्यस्यंते तद्यथा सत्वंअसत्वं सदसत्वं अवाच्यत्वं सदवाच्यत्वं असदवाच्यत्वं सदसदवाच्यत्वंतत्रसत्वंस्वरूपेणविद्यमानत्वं १ असत्वंपररूपेणाविद्यमानत्वं २ स्वरूपपररूपाभ्यांविद्यमानाविद्यमानत्वं ३ तथातदेवसत्वमसत्वंचयदायुगपदेकेनशब्देनवक्तुमिष्यतेतदातद्वाचकःशब्दःकोपिनविद्यतेइतिअवाच्यत्वं ४ यदात्वेकोभागःसन्नःपरश्चावाच्योयुगपद्विवक्ष्यतेतदासदवाच्यत्वं ५ यदात्वेकोभागोःसन्नपरश्चावाच्यश्चतदाअसदवाच्यत्वं ६ यदात्येकोभागःसन्नपरश्चासन् अपरतरश्चावाच्यश्चतदासदसदवाच्यत्वमिति नचैतेभ्यःसप्तभ्योविकल्पेभ्योःन्योविकल्पःसंभवतिसर्वस्यैतेष्वेवांतर्भावात् ततःसप्तविकल्पाउपन्यस्ताःसप्तविकल्पानवभिर्गुणिताजातास्त्रिषष्टिः उत्पत्तेश्चत्वारएवाद्याविकल्पाःतथाद्यौ सत्वमसत्वं सदसत्वमवाच्यत्वंचेतिशेषविकल्पत्रयं[3] तस्युत्तरकालंपदार्थावयवापेक्षमतोःत्रासंभवीतिनोक्तंएतेचत्वारोविकल्पास्त्रिषष्टिमध्येप्रक्षिप्यंतेततःसप्तषष्टिर्भवति ततःकोजानातिजीवःसन्नित्येकोविकल्पोनकश्चिदपिजानातितद्ग्राहकप्रमाणाभावादिति भावःज्ञातेनवाकिंतेनवाकिंतेनप्रयोजनंकिं ज्ञानस्याभिनिवेशहेतुतयापरलोकप्रतिपंथित्वात् एवमसदादयोपिविकल्पाभावनी-

---

याः उत्पत्तिरपिकिं सतोःसतः सदसतोवाच्यस्यवेति कोजानातिज्ञातेनवानकिंचिदपिप्रयोजनमिति विनयेनचरंतीतिवैनयिकाः पुलिंदपाराशरवाल्मीकव्यासेलापुत्रसत्यदत्तप्रभृतयः एतेचानवधृतलिंगाचारशास्त्राविनयप्रतिपत्तिलक्षणाबोद्धितव्याः तेचद्वात्रिंशत्संख्या अमुनोपायेनद्रष्टव्याः सुरनृपतियतिज्ञातिस्थविराधममातृपितृरूपेष्वष्टसुस्थानेषुकायेनमनसावाचादानेनचदेशकालोपपन्नेनविनयःकार्यइतिचत्वारःकायादयःस्थाप्यंतेचत्वारश्चाष्टभिर्गुणिताजाताद्वात्रिंशत् एवमेतानित्रीणिशतानित्रिषष्ट्यधिकानिपरदर्शनानांभवंति अथवालोकस्वरूपेप्येकेवादिनोःनेकंविप्रवदंतिते तद्यथा केचिन्नारीश्वरंजगन्निगदंतिपरेसोमाग्निसंभवंवैशेषिकाद्रव्यगुणादिषड्विकल्पं केचित्काश्यपकृतंपरेदक्षप्रजापतीयं केचिद्ब्रह्मादिभ्येकमूर्तिसृष्टंवैष्णवाविष्णुमयंपौराणिकाविष्णुनाभिपद्मजनितंमौतृजंतत्रकेचिदवर्णंब्रह्मणावर्णादिभिःसृष्टं केचित्कालकृतंपरेक्षित्यादयष्टमूर्तीश्वरकृतं अन्येब्रह्मणोमुखादिभ्योब्राह्मणादिजन्मकंसांख्याःप्रकृतिभवंशक्त्याविज्ञप्तिमात्रं अन्येएकजीवात्मकंकेचिदनेकजीवात्मकंपरेपुरातनकर्मकृतं अन्येस्वभावजंकेचिदक्षरजातभूतोद्भूतं केचिदंडभवं आश्रमीत्वहेतुकं पूरणोनियतिजनितं पराशरःपरिणामप्रभवं केचिद्यादृच्छिकंनैकवादिनोःनेकरूपंपुरुषकागोस्वामिनामकंदिव्यपुरुषप्रभवं इत्यादयोःनेकवादिनोविद्यंते एषांस्वरूपंलोकतत्वनिर्णयातू हरिभद्रादवसातव्यंएवंसर्वगतादिजीवस्वरूपेज्योतिश्चक्रादिचारस्वरूपेचनैकेविप्रतिपद्यंते तथा बौद्धानामष्टादशनिकायभेदावैभाषिकसूत्रांतिकयोगाचारमाध्यमिकादिभेदाबाबंतेजैमनेश्वरशिष्यकृताबहवोभेदाः ॥ उंबेकःकादिकांवेत्तितंचंवेत्तिप्रभाकरःधामनरूपभयंवेत्तिनकिंचिदपिरेवणः॥९॥ अपरेपिबहवःकुरीचरंहंसपरमहंसभट्टप्रभाकरादयोनेकेःतद्भेदाःसांख्यानांचरकादयोभेदाः अन्येषामपिसर्वदर्शनानांदेवतत्वप्रमाणमुक्तिप्रभृतिस्वरूपविषयेतत्तदनेकशिष्यसंतानकृतास्तत्तद्ग्रंथकारकृतावामतभेदाबहवोविद्यंतेतदेवमनेकदर्शनानिलोकेःभिद्यंतेतानिचसर्वाणिदेवतातत्वप्रमाणादिभेदेनाःआत्मीयसाम्रस्तुतग्रंथेनाभिधातुमशक्यानितत्कथमस्माचार्येणसर्वदर्शनवाच्योःर्थोनिगद्यतइत्येवंग

दितुमशक्यार्थोनक्कुंप्रत्यज्ञायिगणनांगुल्प्रमितिरिवपाराबारोभयतरसिकताकणगणनमिवात्यंतदुःशकोयमर्थः प्रारब्धइति चेन् सत्यमेतत् यथांतर द्वीपेक्षयास्तुमेरोर्थः प्रक्रांतस्यात् यावतानुमूलभेदापेक्षयेवयानिसर्वाणिदर्शनानितेषामेवबाह्योऽवक्रव्यतयाप्रतिज्ञातोसि नोत्तरभेदापेक्षयातोनकश्चनदोषः सर्वशब्दंव्याचक्षाणैरस्माभिः पुराव्ययमर्थोदर्शितएव परंविस्मरणशीलेनभवताविस्मारितइतिचेत्॥एनमेवार्थंग्रंथकारोपिसाक्षादाह ॥ दर्शनानिषडेवात्र मूलभेदव्यपेक्षया देवतातत्वभेदेनज्ञातव्यानिमनीषिभिः॥२॥ अत्रप्रस्तुतेस्मिन्ग्रंथेदर्शनानि षडेवमूलभेदव्यपेक्षयामूलभेदापेक्षयामनीषिभिर्मेधाविभिर्ज्ञातव्यानि नपुनरंतर द्वीपेक्षयाधिकानि परमार्थतस्तेषामेवांतर्भावात् षडेवेतिसावधारणंपदंकेनहेतुना मूलभेदानामेवाष्टात्वमित्याशंक्याह ॥देवतातत्वभेदेनेति देव एवदेवता स्वार्थेऽतलप्रत्ययः तत्वानिप्रमाणेरुपपन्नाः परमार्थसंतोऽर्थ ॥ हंहुः देवतातत्वानितेषांभेदेनपार्थक्येन ततोयमत्रार्थः देवतातत्वभेदेनयतोदर्शनानांषडेवमूलभेदाभवेयुस्ततः षडेवदर्शनानिवक्ष्यंते नपुनरुत्तरभेदापेक्षयाधिकानीति एतेनप्राक्तनश्लोकेसर्वशब्दग्रहणंषिषडेवात्रदर्शनानिवक्तुंप्रतिज्ञातानिसंतीतिज्ञापितंद्रष्टव्यं ॥२॥ अथषण्णांदर्शनानांनामान्याह ॥ बौद्धं १ नैयायिकं २ सांख्यं ३ जैनं ४ वैशेषिकं ५ तथाजैमिनीयंच ६ नामानिदर्शनानामभून्यहो ॥३॥ बुद्धाः सुगतास्तेचसप्तभवंतिविपश्याश्चि स्वी २ विश्वभूः ३ क्रुकुं ४ कांचनः ५ काश्यपः ६ शाक्यसिंहश्चेतितेषामिदंदर्शनं बौद्धं १ न्यायंन्यायतर्कमक्षपादर्षिप्रणीतं ग्रंथंविदंत्यधीयतेवेतिनैयायिकास्तेषामिदंदर्शनंनैयायिकं २ संख्यांप्रकृतिप्रभृतितत्वपंचविंशतिरूपांविदंत्यधीयतेवसांख्या यद्वातालव्यादित्वेपि शांख्यध्वनिरस्तीतिवृद्धाम्नायः तत्रशंखनामाकश्चिदायः पुरुषविशेषस्तस्यापत्यंपौत्रादिरितिगर्गादित्वात्यञ्प्रत्ययेसांख्यास्तेषामिदंदर्शनं सांख्यंशांख्यंवा ३ जिनाऋषभादायश्चतुर्विंशतिरर्हंतस्तेषामिदंदर्शनं जैनंएतेनचतुर्विंशतेरपिजिनानामेकमेवदर्शनमजनिष्टनपुनस्तेषांभिन्नमतोदः कोप्यासीदित्याबेदितंभवति ४ नित्यद्रव्यरत्नयोऽत्यंविशेषाएववैशेषिकं विनयादिभ्यइतिस्वार्थेइकण्तद्वैशेषिकं विदंत्यधीयतेवातद्वेत्यधीतेइत्यणि

वैशेषिकं ५ जैमिनिरायः पुरुषविशेषस्तस्येदमतंजैमिनीयं मीमांसकापरनामकं ६ तथाशब्दश्चकारश्चात्रसमुच्चयार्थोएवमन्यत्राप्यवसेयं अमूनिषडपिदर्शनानांनामानि अहोइतिशिष्यामंत्रणेआमंत्रणंचशिष्याणांचित्तव्यासंगत्यजनेनशास्त्रश्रवणायाभिमुखीकरणार्थमत्रोपन्यस्तं॥ अथयथोद्देशंतथानिर्देशइतिन्यायादादौबौद्धमतमाचष्टे ॥ तत्रबौद्धमतेतावत् देवतासुगतःकिल॥ चतुर्णामार्यसत्यानांदुःखादीनांप्ररूपकः॥३ तत्रशब्दोनिर्द्धारणार्थः तावत्शब्दोऽवधारणेतेषुदर्शनेष्वपराणिदर्शनितावत्तिष्ठंबौद्धमतमेवग्रथमंनिर्द्धार्य्योच्यतइत्यर्थः॥ अत्रचादौबौद्धदर्शनोपलक्षणार्थंसुगधसिद्धानुग्रहायबौद्धानांलिंगवेषाचारादिस्वरूपंप्रदर्श्यते॥चमरोर्णोंडुंबरूत्तिः कमंडलुश्चलिंगंमार्गजीववधार्थंप्रमृज्यतोव्रजंतिधातुरक्तमागुत्सूंपरिधानंवेषः शौचक्रियाबकी॥ मृद्वी शय्यातरुधोयपेयाभक्तंमध्येपानकंचापरान्हे द्राक्षारंभंशर्करानिशार्द्धरात्रे मोक्षश्चांतेशाक्यपुत्रेणदृष्टः॥१ मणुन्नंभोअणंभुंजामणुन्नंसयणासणंमणुन्नंमिअगारंमिमणुन्नंजायएमुणी॥२ क्षिप्तायांपात्रेयतिनंसर्वेशक्रुमितिमन्वानामांसमपिभुंजतेमार्गेजीववधार्थंप्रमृज्यंतोव्रजंतिव्रह्मचर्यादिस्वकीयक्रियायांचभृशंदृढतमाभवंतीत्यादिराचारः धर्मबुद्धसंघरूपंरत्नत्रयंतारादेवीशासनेविघ्ननाशिनीविपश्यादयः सप्तबुद्धाः कंठेरेखावयांकिताः सर्वज्ञादेवाः बुद्धस्तुसुगतोधर्मधातुरित्यादीनितन्नामानितेषांप्रास्तावावर्तुलाबुद्धाकैडेसंज्ञाः भिक्षुरोगतशाक्यशौद्धोदनिसुततथागतशून्यवादिनामानोबौद्धाः तेषांशौद्धोदनिधर्मोत्तरार्चटधर्मकीर्तिप्रज्ञाकरदिग्नागप्रभृतयोग्रंथकारागुरवः॥ अथप्रस्तुतश्लोकोऽयतोव्याख्यायतेबौद्धमतेबौद्धदर्शनेसुगतोबुद्धोदेवतादेवः किलेत्याप्तप्रवादेकीदृशः सःचतुर्णामित्यादि आरात् दूरात्यातास्तीर्णाः सर्वेहेयधर्मेभ्यइत्यार्याः पृषोदरादित्वाद्रूपनिष्पत्तिः सतांसाधूनांपदार्थानांयथासंभवंमुक्तिप्रापकत्वेनयथावस्थितयत्तुस्वरूपंचिंतनेनचहितानिसत्यानि अथवासद्भ्योहितानिसत्यानि आर्याणांसत्यानिआर्यसत्यानि तेषामार्यसत्यानामित्यर्थः चतुर्णांदुःखादीनांदुःखसमुदयमार्गनिरोधलक्षणानांतत्वानांप्ररूपकोदेशकः तत्रदुःखंफलभूताः पंचोपादानस्कंधाविज्ञानादयोवक्ष्यमाणाः १ तएवतृष्णासहायाः हेतुभूताः समुदयः समुदेतिस्कंधपंचकलक्षणंदुःख

मम्मादिनिष्पत्तिः ॥२ निरोधहेतुर्नैरात्म्याद्याकारश्चित्तविशेषोमार्गः मार्गणमन्वेषणं मार्ग्यतेन्विष्यतेयाच्यतेनिरोधार्थिभिरिति चुरादिणिजंतत्वेनाप्रत्ययः ३ निः कृत्स्नावस्थानित्यनिरोधः निरुध्यतेरागद्वेषोपहतचित्तलक्षणः संसारोऽनेनेतिकरणेघञि मुक्तिरित्यर्थः ॥४ दुःखादीनामित्यत्रादिशब्देनैकार्थोपिव्यवस्थार्थोमंतव्योयदुक्तं ॥ सामीप्येचव्यवस्थायांप्रकारेवयवेतथा चतुर्थ र्थेपुमेधावीत्यादिशब्दंनुलक्षयेत् १ तत्रादिशब्दः सामीप्येयथाग्रामादेर्घोषइति ॥ व्यवस्थायांयथाब्राह्मणादयोवर्णाइति ॥ प्रकारेयथाआद्यादेवदत्तादयइतिदेवदत्तसदृशाआद्याइत्यर्थः अवयवेयथा स्तंभादयोगृहाइति ॥ अत्रतुव्यवस्थार्थःसंगछते दुःखमादिःप्रथमंयेषांतानिताथातेषामिति बहुव्रीहिः ॥ अथदुःखत्वंव्याचिख्यासुराह दुःखंसंसारिणः स्कंधास्तेचपंचप्रकीर्तिताः विज्ञानंवेदनासंज्ञासंस्कारोरूपमेवच ॥४ दुःखंदुःखतत्वंकिमित्याहुः ॥ संसरंतिस्थानात्स्थानांतरंभवाद्भवांतरंगच्छंतीत्येवंशीलाः संसारिणस्कंधाः सचेतनाअचेतनाः परमाणुप्रचयविशेषाः तेचस्कंधाःपंचप्रकीर्तिताः धात्वस्यसाधारणत्वात्पंचेश्वरव्याताः नत्वपरःकश्चिदात्माख्यःस्कंधोस्तीतिकेतस्कंधाइत्याह विज्ञानमित्यादि विज्ञानस्कंधः १ वेदनास्कंधः २ संज्ञास्कंधः ३ संस्कारस्कंधः ४ रूपस्कंधश्च ५ एवशब्दः पूरणार्थेचशब्दःसमुच्चयेतत्ररूपविज्ञानंसौरेविज्ञानमित्यादि ॥ निर्विकल्पकंविज्ञानंविशिष्टज्ञानंविज्ञानस्कंधः निर्विकल्पकंचज्ञानमेवरूपमवसेयं ॥ अस्तित्वालोचनाज्ञानं प्रथमंनिर्विकल्पकं बालमूकादिविज्ञानसदृशंशुद्धवस्तुजमिति १ सुखादुःखाअदुःखसुखाश्चेतिवेदनावेदनास्कंधः २ वेदना हिपूर्वकृतकर्मविपाकतोजायतेतथाचसुगतः कदाचिद्भिक्षामटायमानः कंटकेनचरणेविद्धः प्राह बुद्धएकनवतेकल्पेशस्त्रेणमेपुरुषोहतः तत्कर्मणोविपाकेनपादेविद्धोस्मिभिक्षवः ॥१ इतिसंज्ञानिमित्तोद्बुद्धात्मकः प्रत्ययः संज्ञास्कंधः तज्जसंज्ञागौरित्यादिकागोत्वादिकंचतत्प्रवृत्ति निमित्तंतयोरुद्बुद्धात्मकः प्रत्ययोनामजात्यादियोजनात्मकंसविकल्पकंज्ञानंसंज्ञास्कंधइत्यर्थः ३ पुण्यापुण्यादिधर्मसमुदायः संस्कारस्कंधः यस्यसंस्कारस्यप्रबोधात्पूर्वानुभूतेविषयेस्मरणादिसमुत्पद्यते ॥४ पृथिवीधात्वादयोरूपादयश्चरूपस्कंधः ५ नचैतेभ्योविज्ञानादिभ्योव्यतिरिक्तःकश्चनात्माख्यः पदार्थः सुखदुःखेच्छाद्वेषज्ञानाधारभूतो

ऽध्यक्षेणावसीयते नाप्यनुमानेनतदव्यभिचारिलिंगग्रहणाभावात् नचप्रत्यक्षानुमानव्यतिरिक्तमर्थांतरमस्तीति तेचपंचस्कंधाः क्षणमात्रावस्थायिनएववेदितव्याः नपुनर्नित्याः कियत्कालावस्थायिनोवाएतच्च क्षणिकाः सर्वसंस्काराइत्यत्रदर्शयिष्यते दुःखतत्वंपंचभेदतयाभिधायाऽथ दुःखहेतुं तस्यकारणभूतंसमुदयतत्वंव्याख्याति समुदेतियस्मिंल्लोकेरागादीनां गणोऽखिलः आत्मात्मीयस्वभावाख्यः समुदयः सउदाहृतः ॥ ६ यतोयस्मात्समुदयाख्येलोकेमध्येरागादीनांरागद्वेषादिदोषाणांगणःसमवायोऽखिलः समस्तः समुदेतिउद्भवतिकीदृशोगणइत्याह ॥ आत्मात्मीयभावाख्यः आत्मीयःस्वकीयःतयोर्भावस्त्वं आत्मात्मीयभावः अयमात्मा अयंचात्मीयइत्येवंसंबंधइत्यर्थः उपलक्षणत्वादयंपरोऽयंचपरकीयइत्यादिसंबंधोद्रष्टव्यः ॥ सएवाख्यानामयस्य सआत्मात्मीयभावाख्यः अयंभावः आत्मात्मीयसंबंधेन परकीयादिसंबंधेनवामलोरागद्वेषाद्यः समुद्भवंति ससमुदयोनामतत्वं बौद्धमतेउदाहृतः कथितः अत्रोक्तरार्दुसप्तनवाक्षरमादद्ये छंदोत्तरसद्भावा छंदोभंगदोषोनचिंत्य आर्षत्वात्प्रस्तुतशास्त्रस्य ॥ ६ अथदुःखसमुदयतत्वयोः संसारप्रवृत्तिनिमित्तयोर्विपक्षभूतेमार्गनिरोधतत्वेप्रपंचयन्नाह ॥ क्षणिकाः सर्वसंस्कारा इत्येवंवासनायासमार्गइहविज्ञेयोनिरोधोमोक्षउच्यते ॥ ७ परमनिरुद्धः कालः क्षणः तत्रभवाः क्षणिकाः क्षणमात्रावस्थितय इत्यर्थः सर्वेचतेसंस्काराश्चपदार्थाः सर्वसंस्काराः क्षणविनश्वराः सर्वेपदार्थाइत्यर्थः तथाचबौद्धाअभिदधतिस्मकारणेभ्यःपदार्थउत्पद्यमानः किंविनश्वरस्वभावउत्पद्यतेऽविनश्वरस्वभावोवायदिविनश्वरस्वभावस्तदावश्यंक्रियायाः क्रमयोगपद्याभ्यामर्थक्रियायाअभावात् पदार्थस्यापिव्याप्यस्याभावःप्रसजतितथाहियदेवार्थक्रियाकारितदेवपरमार्थसदितिसचानित्योऽर्थोऽर्थक्रियायांप्रवर्त्तमानः क्रमेणवाप्रवर्त्तेतयौगपद्येनवानतावत्क्रमेणतावत्येकस्याअर्थक्रियायाः कालेऽपराअर्थक्रियाकरणस्वभावोवियतेनवायदिवियतेकुतःक्रमेणकरोतिअथसहकार्यपेक्षयेतिचेत्तेनसहकारिणातस्यनित्यस्यकश्चिदतिशयःक्रियतेनवातदाकिंपूर्वस्वभावपरित्यागेनक्रियतेअपरित्यागेनवाक्रियतेयदिपरित्यागेनततोऽनित्यत्वंअथपूर्वस्वभावापरित्यागेनतत्सहकारिणस्तस्यनित्यस्य

तत्कृतोपकाराभावात् किंसहकार्यपेक्षयाकर्तव्यंतथाकिंचित्करोपि सहकारी तेनविशिष्टः कार्यार्थमपेक्ष्यते तदयुक्तंयतः अपेक्ष्येत परः कश्चिद्यदिकुर्वीनकिंचनयदिकिंचित्करंवस्तु किंकेनचिदपेक्ष्यते अथतस्यप्रथमा र्थक्रियाकारणकालेऽपरार्थक्रियाकरण स्वभावोनविद्यते तथाचसतिस्वरूपेनित्यताहानिः अथासौनित्योऽर्थोयोगपद्येनार्थक्रियांकुर्यात् तथासतिप्रथमक्षणएवा शेषार्थक्रियाणांकरणाद्द्वितीयक्षणे तस्याकर्तृत्वंस्यात् तथाचसोवाऽनित्यतापत्तिः अथतस्यतत्स्वभावत्वात् तएवार्थक्रिया भूयोभूयोद्वितीयादिक्षणेष्वपिकुर्यात् तदसांप्रतंकृतस्यकरणाभावादिति किंच द्वितीयादिक्षणसाध्या अप्यर्थसार्थाः प्रथम क्षणएव प्राप्नुवंति तस्यतत्स्वभावात्। अतत्स्वभावेचतस्यानित्यत्वप्राप्तिरितितदेवनित्यस्यक्रमयोगपद्याभ्यामर्थक्रियाविरहा न्नस्वकारणेभ्योनित्योत्पादइति अथविनश्वरस्वभावः समुत्पद्यते तथाचसतिविघ्नाभावा दायातः मत्स्मदुक्तमृषेरुपदार्थ-क्षणजातस्य क्षणिकत्वं तथाचोक्तं जातिरेवहिभावानां विनाशहेतुरिष्यते योजातश्चनचध्वंसी नश्येत्पश्चात्सकेनहि नन्वनित्येस त्यपि यस्यघटादिकस्य यदैवमुद्गरादि सामग्रीसाकल्यंतदैवतद्विनश्वरमाकल्प्यते नपुनः प्रतिक्षणं ततोविनाशकारणा भावापेक्षणान्नित्यानामपिपदार्थानांतत्क्षणिकत्वमिति तदेतदनुपपन्नंतयुरोर्बचः यतोमुद्गरादिसन्निधानेसतियोभूघटा दिकस्यांत्यावस्थायांविनाशस्वभावःसस्वभावस्तस्यैवोत्पत्तिसमयेवियतेनवाविद्यतेचेदापतितंतर्हितदुत्पत्तिसमनंतरमेव विनश्वरत्वंअथनविद्यतेससत्स्वभावउत्पत्तिसमयेतर्हिकथंपश्चात्तन्नभवेत् अथेदृशएवतस्यस्वभावोयदुतकियंतमपि कालंस्थित्वातेनविनश्यतीतिचेत्तर्हिमुद्गरादिसन्निधानेप्येषएवतस्यस्वभावःस्यात्ततोभूयोपितेनतावत्कालंस्थेयं एवंच मुद्गरादिघातशतपातेपिनविनाशोभवेत् जातंकल्पांतस्थायित्वं घटादेः तथाचजगद्व्यवहारव्यवस्थाविलोपपातकंपंकिलता इत्युभुपेयमनिपुनापिक्षणक्षयित्वं पदार्थानांप्रयोगरूपंयद्धिनश्वरस्वभावंतदुत्पत्तिसमयेतत्स्वरूपं यथांत्यक्षणवर्त्ति घटस्यस्वरूपंविनश्वरस्वभावंचरूपरसादिकमुत्पादयतीतिस्वभावहेतुः तदेवंविनाशहेतोरकिंचित्करत्वात्स्वहेतुत एवपदार्थानामनित्यानामेवोत्पत्तेः क्षणिकत्वमवस्थितमिति ननुयदिक्षणक्षयिणोभावाः कथंतर्हिसएवायमितिज्ञानंउ

ज्ञानपीठजैनग्रन्थोद्धारकार्यालय
NEW DELHI

च्यते निरंतरसदृशापरापरक्षणनिरीक्षणचेतन्योदयादविद्यानुबंधाच्चपूर्वक्षणप्रलयकालएवदीपकलिकांतरमिवनतत्स दृशमपरंक्षणांतरमुदयतेनसमानाकारज्ञानपरंपरापरिचयचिरतरपरिणामान्निरंतरोदयाच्चपूर्वक्षणानामत्यंतोच्छेदेपिस एवायमित्यध्यवसायः प्रसभंप्रादुर्भवति दृश्यतेचयथालूनपुनरुत्पन्नेषुनखकेशकलापादिषु सएवायमितिप्रीतीतिः तथेहापिकिंनसंभाव्यतेसुजनेनतस्मात्सिद्धमिदं यत्सत्तत्क्षणिकमिति अतएवयुक्तियुक्तमुक्तमेतत् क्षणिकाः सर्वेपदा र्थाः नास्त्यात्मेत्याद्याकारा एवमीदृशीयकास्त्वर्थैकप्रत्ययेयावासनापूर्वज्ञानजनिता तदुत्तरज्ञानेशक्तिः क्षणपरंपरा प्राप्तमान स्त्रीप्रतीतिरित्यर्थः समार्गोनामार्यसत्यं द्रष्टव्योबुद्धमतेविज्ञेयोऽवगंतव्यः सर्वपदार्थक्षणिकत्वं नेरात्म्याद्याकारश्चित्तविशेषो मार्ग इत्यर्थः सचनिरोध्यकारणंद्रष्टव्यः अथचतुर्थमार्यसत्यमाह निरोधोनिरोधनामकं तत्त्वं मोक्षोऽपवर्गउच्यते अ भिधीयते चित्तस्यनिःक्लेशावस्थारूपोनिरोधोमुक्तिर्निगद्यते इत्यर्थः ॥७ एतानिदुःखादीन्यार्यसत्यानिचत्वारियानिग्रं थकृता नंतरमेवोक्तानि तानिसांप्रतिकमतेनैवेतिविज्ञेयं वैभाषिकादिभेदनिर्देशंविनासामान्यतोबौद्धमतेनुद्वादशै वयेपदार्थाभवंति तानपिसंप्रतिविवक्षुः श्लोकमेनमाह पंचेंद्रियाणिशब्दाद्याविषयाः पंचमानसंधर्मायतनमेतानिद्वाद शायतनानिच ८ पंचसंख्यानींद्रियाणि श्रोत्रचक्षुर्घ्राणरसनस्पर्शनरूपाणिशब्दाद्याः शब्दरूपरसगंधस्पर्शाःपंचविष याइंद्रियगोचराः मानसंचित्तंयस्यशब्दायतनमितिनामांतरंधर्मसुखदुःखादयस्तेषामायतनंगृहं शरीरमित्यर्थः एता नि अनंतरोक्तानिद्वादशसंख्यानि आयतनानि आयतनसंज्ञानित्वानिचः समुच्चये नकेवलंप्राग्युक्तानिचत्वारिदुःखादीन्ये व किंत्वेतानिद्वादशायतनानिचभवंति एतानिचायतनानिक्षणिकानिज्ञातव्यानियतोबौद्धाअत्रैवमभिदधते अर्थक्रिया लक्षणंसत्वं प्रागुक्तन्यायेनाः क्षणिकान्निवर्तमानंक्षणिकेष्वेवावतिष्ठते तथाचसतिसुलभंक्षणिकत्वानुमानं यत्सत्तत्क्षणि कं यथाप्रदीपकालिकादि संतिचद्वादशायतनानीति अनेनचानुमानेनद्वादशायतनव्यतिरिक्तस्याःपरादृस्याभावाद् द्वा दशस्वायतनेष्वेवक्षणिकत्वंव्यवस्थितं भवतीति ॥८ तदेवंसौत्रांतिकमतेनचत्वारिदुःखादीनितत्त्वानि सामान्यतोबौद्धु

× द्वादशतानि] मतेनचायतनरूपाणिप्रतिपाद्यसंप्रतिप्रमाणस्यविशेषलक्षणमभिधानीयंतत्त्वसामान्यलक्षणाः विनाभावीतिप्रथमंप्रमाणस्यसामान्यलक्षणमुच्यते प्रमाणमविसंवादिज्ञानमिति अविसंवादकंज्ञानंप्रमाणं अविसंवादकत्वंचार्थप्रापकत्वेनव्याप्तमर्थाप्रापकस्याविसंवादित्वाभावात् केशोंडुकज्ञानवत् अर्थप्रापकत्वंचप्रवर्त्तकत्वेनव्याप्तिअप्रवर्त्तकस्यार्थाप्रापकत्वात्तद्देवप्रवर्त्तकत्वमपिविषयोपदर्शकत्वेनव्याप्तंनहिज्ञानंहस्तेगृहीत्वापुरुषंप्रवर्त्तयति स्वविषयंरूपदर्शयत्प्रवर्त्तकमुच्यते प्रापकंचेतिस्वविषयोपदर्शकत्वव्यतिरेकेणनान्यत्प्रापकत्वंतच्चशक्तिरूपं उक्तंच प्रापणशक्तिः प्रामाण्यंतदेवचप्रापकत्वमिति स्वविषयोपदर्शकंचप्रत्यक्षानुमानेएवज्ञानांतरं अनस्तेएवलक्षणार्हतयोश्चद्वयोरप्यविसंवादकत्वमस्तिलक्षणंप्रत्यक्षेणत्यर्थक्रियासाधकंवस्तुदृष्टतयाऽवगतंसत्प्रदर्शितंभवति अनुमानेननुदृष्टलिंगाव्यभिचारितयाऽध्यवसितंसत्प्रदर्शितंभवतीत्यनयोः स्वविषयदर्शकत्वमेवप्रापकत्वं ययापिचप्रत्यक्षस्यक्षणोयात्यः सन्वर्त्तमानत्वान्नप्राप्यते
स्ते तथापितत्संतानोऽध्यवसायः प्रवृत्तोप्राप्यतइतिसंतानविषयंप्रदर्शितार्थप्रापकत्वमध्यक्षस्यप्रामाण्यं अनुमानस्यतुलिंगदर्शनेधिकृत्यःस्वाकारोत्पत्तयाऽध्यवसायोऽर्थः प्राप्यस्तुबाह्यः स्वाकाराभेदेनाध्यवसितइति तद्विषयमस्यापिप्रदर्शितार्थप्रापकत्वं प्रामाण्यं तदुक्तं नत्याभ्यामर्थपरिच्छेदप्रवर्तमानोऽर्थक्रियायांविसंवाद्यतेइतिप्राप्यमाणंचवस्तुनियतदेशकालाकारं प्राप्यतेइतितथाभूतवस्तुप्रदर्शकयोः प्रत्यक्षानुमानयोरेवप्रामाण्यंनज्ञानांतरस्यतेनपीतशंखादिद्याहिज्ञानानामपिप्रापकत्वात् प्रामाण्यप्रसक्तिर्नभवतितेषांप्रदर्शितार्थाप्रापकत्वात् यद्देशकालाकारंहिवस्तुतैः प्रदर्शितंनतत्तथाप्राप्यते यच्चयथाप्राप्यतेनतैस्तत्तथाप्रदर्शितं देशादिभेदेनवस्तुभेदस्यनिश्चितत्वादिति नतेषांप्रदर्शितार्थप्रापकत्वात्ततोनप्रामाण्यमपिनापिप्रमाणद्वयव्यतिरिक्तंशब्दादिकंप्रदर्शितार्थप्रापकत्वेनप्रमाणं तत्प्रदर्शितस्यदेशाद्यनियतस्यार्थस्यासत्त्वेनप्रानुमशक्तेः तत्प्रदर्शितार्थस्यानियतत्वंचसाक्षात्पारंपर्येणवाप्रतिपाद्यादेरर्थादनुपपत्तेः ततः स्थितेप्रदर्शितार्थप्रापणशक्तिस्वभावमविसंवादकत्वं प्रामाण्यं द्वयोरेवप्रापणशक्तिश्चप्रमाणस्यार्थाविनाभावनिमित्तादर्शनपृष्ठभाविताविकल्पेननि

श्चीयते तथाहिप्रत्यक्षदर्शनापरनामकंयतोऽर्थादुत्पन्नंतद्दर्शकमात्मानंस्वानुरूपावसायोत्पादनान्निश्चिनोत्यर्थाविनाभावित्वंप्रापणशक्तिनिमित्तंप्रामाण्यंस्वतोनिश्चिनोतीत्युच्यतेनपुनर्ज्ञानांतरंतन्निश्चायकमपेक्षतेऽर्थानुभूताविवनतोऽविसंवादकत्वमेवप्रमाणलक्षणं युक्तं अथप्रमाणस्यविशेषंविवक्षुः प्रथमंप्रमाणसंख्यानियमयन्नाह ॥ प्रमाणेद्वेचविज्ञेये तथासौगतदर्शनेप्रत्यक्षमनुमानंच सम्यग्ज्ञानंहिधायतः९ तथाशब्दः प्रागुक्ततत्त्वापेक्षयासमुच्चयेचशब्देऽवधारणे तत्रोयमर्थः सौगतदर्शनेद्वेएवप्रमाणेविज्ञेयेनपुनरेकंत्रीणिचत्वारिपंचषड्वाप्रमाणानितिएतेनचार्वाकसांख्यादिपरिकल्पितंप्रमाणसंख्यांतरंवोद्भावनमन्यंतइत्यावेदितंभवतिकेतेद्वेप्रमाणेइत्याह ॥ प्रत्यक्षमनुमानंचकुतोद्वेएवप्रमाणेइत्याह सम्यगविपरीतंविसंवादरहितमितियावत्ज्ञानंयतोहेतोर्विधासर्वंवाक्यंसावधारणमितिन्यायाद्विधैवनत्वेकधात्रिधाचेति— अत्रकेचिदाहुर्यथाद्विधेत्युक्तेद्विधैवनत्वेकधात्रिधात्वेत्येवमन्ययोगव्यवच्छेदकथाचैत्रोधनुर्धरइत्यादिष्वपिचैत्रस्यधनुर्धरत्वमेवस्यान्नतु शौर्यौदार्यधैर्यादयः तदयुक्तं यतः सर्वंवाक्यंसावधारणमितिन्यायेप्यशंकितस्यैवव्यवच्छेदः परार्थहिवाक्यमभिधीयते यदेवचपरेणव्यामोहादाशंकितंतस्यैवव्यवच्छेदः। चैत्रोधनुर्धरइत्यादौचचैत्रस्यधनुर्धरत्वायोगएवपरैराशंकितइति तस्यैवव्यवच्छेदोनान्यधर्मस्यइहचार्वाकसांख्यादयऐकध्यमनेकधाचसम्यग्ज्ञानमाहुरतोनियतद्वैविध्यमदर्शनेनएकत्ववहुत्वेसम्यग्ज्ञानस्यप्रतिक्षिपतिएवंचायमेवकारोविशेषणेनविशेष्येणक्रियायाचसहभाव्यमानः क्रमेणायोगव्ययोगात्यंतायोगव्यवच्छेदकारित्वात्त्रिधाभवतियद्विनिश्चयः॥ अयोगंयोगमपरैरत्यंतायोगमेवचव्यवच्छिनत्ति धर्मस्यनिपातोव्यतिरेचकः९ निपातएवकारः व्यतिरेचकोनिवर्त्तकः॥ विशेषणविशेष्याभ्यांक्रिययाचसहोदितः विवक्षातोऽयोगंपितयार्थोयंप्रतीयते॥२॥ व्यवच्छेदफलंवाक्यं यतश्चैत्रोधनुर्धरः पार्थोधनुर्धरोनीलंसरोजमितिवायथा॥३॥ सम्यग्ज्ञानस्यचद्वैविध्यंप्रत्यक्षपरोक्षविषयद्वैविध्यादवसेयं यतोत्रप्रत्यक्षविषयादन्यः सर्वोपिपरोक्षोविषयततोविषयद्वैविध्यात्तद्वाहके सम्यग्ज्ञानेऽपिद्वेएवभवतोनन्यूनाधिके

तत्र यत्परोक्षार्थविषयं सम्यग्ज्ञानं तत्स्वसाध्येन धर्मिणा च संबद्धादन्यतः सकाशात्सामान्येनाकारेण परोक्षार्थस्य प्रतिपत्ति
रूपं तत्तदनुमानेंऽतर्भूतमिति प्रत्यक्षानुमानलक्षणे द्वे एव प्रमाणे ॥ तथाहि ॥ नपरोक्षोऽर्थः साक्षात् प्रमाणेन प्रतीयते तस्या
परोक्षत्वप्रसक्तेर्विकल्पमात्रस्य च स्वतंत्रस्य मनोराज्यादिविकल्पवद्प्रमाणत्वात् परोक्षार्थाप्रतिबद्धस्याः वश्यतया तदध्यभिचारा
भावात् न च स्वसाध्येनविनाभूतोऽर्थः परोक्षार्थस्य गमको ऽतिप्रसक्तेः धर्मिणाऽपि संबद्धस्यापि गमकत्वेप्त्यासत्तिविप्रकर्षा
भावात् ससर्वत्र प्रतिपत्तिहेतुर्भवेत् ततोयदेवंविधार्थ प्रतिपत्तिनिबंधनं प्रमाणं तदनुमानमेव तस्येवंलक्षणत्वात् तथा
त्वप्रयोगः यदप्रत्यक्षंप्रमाणं तदनुमानांतर्भूतं यथालिंगबलभावि अप्रक्षेत्येप्रमाणं च शाब्दादि कं प्रमाणांतरत्वेनाभ्युप
गम्यमानमितिस्वभावहेतुः॥ यच्चयन्नांतर्भूतं तस्यनततोबहिर्भावः यथाग्नसिद्धौ तर्भावस्य कचित्कस्यापि अंतर्भूतं चेदं प्र
त्यक्षान्यत्प्रमाणमनुमानमित्यभावविरुद्धोपलब्धिः अंतर्भावबहिर्भावयोः परस्परपरिहारस्थितलक्षणतयाविरोधात्
आह परः भवतुपरोक्षविषयस्यप्रमाणस्यानुमानेंऽतर्भावः अर्थांतरविषयस्य च शाब्दादेस्तस्यांतर्भावोयुक्त इतिचेत् नप्र
त्यक्षपरोक्षाभ्यामन्यस्य प्रमेयस्याद्वैस्याभावात् प्रमेयरहितस्य च प्रमाणस्य प्रामाण्यासंभवात् प्रमीयतेऽनेनार्थः इ
तिप्रमाणमितिव्युत्पत्त्या स्वप्रमेयस्यैवतस्यप्रमाणत्वव्यवस्थितेः॥तथाहि यदविद्यमानप्रमेयं नतत्प्रमाणं यथाकेशोंडुका
दिज्ञानंविद्यमानप्रमेयंचप्रमाणद्वयातिरिक्तविषयतयाभ्युपगम्यमानंप्रमाणांतरमिति कारणानुपलब्धिः प्रमेयस्यसा
क्षात्पारंपर्येण वाप्रमाणंप्रतिकारणत्वात् तदुक्तंनामनुरूतान्वयव्यतिरेकं कारणंविषय इति प्रत्यक्षपरोक्षातिरिक्तंप्र
मेयांतरेनास्तीतिबाध्यक्षेणैवप्रतिपाद्यते अध्यक्षंहिपुरःस्थितार्थसामर्थ्यादुपजायमानंतद्रूपात्मनियतप्रतिभासाव
भासादेवतस्यार्थस्यप्रत्यक्षव्यवहारकारणंभवति तदन्यार्थात्मतांचतस्यव्यवच्छिदानमन्यत् परोक्षमर्थजातं सकलंरा
श्यंतरत्वेनव्यवस्थापयतृतीयप्रकाराभावंचसाधयतिअध्यक्षेणाप्रतीयमानस्यसकलार्थजातस्याऽन्यत्वेनपरीक्षतया
व्यवस्थापनात् अन्यथातस्यतदन्यार्थरूपतयाव्यवच्छेदस्वकीयरूपतयापरिच्छेदोनभवेदितिनकिंचित्प्रस्ते णावगं

तंभवति प्रतिनियतस्वरूपताहिभावानांप्रमाणतोव्यवस्थिता अन्यथासर्वस्यसर्वोपलंभादिप्रसंगतः व्यवहारोच्छेद
प्रसक्तिर्भवेत् प्रतिनियतस्वरूपताचेन्नप्रत्यक्षावगता किमन्यद्रूपंतेनतस्यावगतमितिपदार्थस्वरूपावभासिनाऽध्यक्षे
णप्रमेयांतराभावः प्रतिपादितएव अनुमानतोपितदभावः प्रतीयतएव अन्योन्यव्यवच्छेदरूपाणामितरप्रकारव्यवच्छे
देनतदितरप्रकारव्यवस्थापनात् प्रयोगश्चात्रायं यत्प्रकारव्यवच्छेदेन तदितरप्रकारव्यवस्थानं तत्तत्प्रकारांतर
संभवः तद्यथा पीतादौ नीलप्रकारव्यवच्छेदेनाऽनीलप्रवालव्यवस्थायां अस्तिचप्रत्यक्षपरोक्षयोरन्यतरप्रकारव्यवच्छेदेने
तरप्रकारव्यवस्थाव्यवच्छियमानप्रकाराः विषयीकृतेसर्वस्मिन्प्रमेयइतिविरुद्धोपलब्धिः तदेतत्प्रकारयोः परस्परपरिहा
रस्थितलक्षणत्वात् अतः प्रमेयांतराभावात् नप्रमाणांतरभावः उक्तंच नप्रत्यक्षपरोक्षाभ्यांमेयस्यान्यस्यसंभवः तस्मा
त्प्रमेयद्वित्वेन प्रमाणद्वित्वमिष्यते॥ इति अत्रशब्दोपमानार्थापत्त्यभावादिप्रमाणांतराणांनिराकरणंप्रत्यक्षानुमान
योरंतर्भावनंवाययथाभवति तथाप्रमाणसमुच्चयादिग्रंथेभ्यः संमत्यादिग्रंथेभ्योवा ऽवगंतव्यं ग्रंथगौरवभयान्नो
च्यते ततः स्थितमेतत् प्रत्यक्षानुमानेद्वे एवप्रमाणेइति॥९ अथप्रत्यक्षलक्षणमाह॥ प्रत्यक्षंकल्पनापोढमभ्रांतंतत्र
बुध्यतांत्रिरूपाल्लिंगतोलिंगिविज्ञानंखलुमानसंज्ञितं॥१० तत्रतयोः प्रत्यक्षानुमानयोर्मध्येप्रत्यक्षंबुध्यतांज्ञायतां तत्रप्रतिग
तमक्षमिंद्रियप्रत्यक्षं कीदृशंकल्पनापोढं शब्दसंसर्गवतीतिः कल्पना कल्पना आपोढा अपेतायस्मात्तत्कल्पनापोढंनानु
बहुव्रीहौनिष्ठांतं पूर्वनिपतति ततोऽपोढकल्पनमितिस्यात् नचाहिताग्न्यादिषितिवावचनात् आहिताग्न्यादेश्चाकृतिग
त्वान्नपूर्वनिपातः कल्पनयाचापोढंरहितंकल्पनापोढंनामजात्यादिकल्पनारहितमित्यर्थः तत्रनामकल्पनायथाडित्थ
जातिकल्पनायथागौरिति आदिशब्दाद्गुणक्रियाद्रव्यपरिग्रहः तत्रगुणकल्पनायथाशुक्लइति क्रियाकल्पनायथापाचक
इतिद्रव्यकल्पनायथादंडीभूस्थोवेति आभिः कल्पनाभीरहितंशब्दरहितस्वलक्षणजन्मत्वात्प्रत्यक्षस्य उक्तंचनत्यर्थंश
ब्दाः संतितरात्मानोधायेनतस्मिन्प्रतिभासमानेप्रतिभासेरन्नित्यादि एतेनस्थिरस्थूलघटपटादि बाह्यवस्तुग्राहिणः सवि

कल्पकज्ञानस्य प्रत्यक्षतां निरस्यति पुनः कीदृशं प्रत्यक्षं अभ्रांतं अतस्मिंस्तद्ग्रहो भ्रांतिरितिवचनात् ना सद्भूत वस्तुग्राह
कं किंतु यथावत् परस्परविविक्तक्षणक्षयिपरमाणुस्वलक्षणस्वलक्षण परिछेदकं अनेन निर्विकल्पकानां भ्रांतत्वं मिरिकादि ज्ञा
नानां प्रत्यक्षतां प्रतिक्षिपति इदं प्रत्यक्षं चतुर्द्धा इंद्रियज्ञानं मानसंस्वसंवेदनं योगिज्ञानंच ४ तत्रचक्षुरादींद्रियपंचकाश्रये
णोत्पन्नं यत्स्वरूपादिपंचविषयालंबनंज्ञानमिंद्रियप्रत्यक्षं १ स्वविषयानंतरविषयसहकारिणेंद्रियज्ञानेनसमनंतर प्रत्य
येन जनितंमनोविज्ञानंमानसं स्वविषयस्यघटादेंद्रियज्ञानविषयस्यानंतरोविषयोद्वितीयः क्षणः तेनसहकारिणा सहमिलि
त्वा इंद्रियज्ञानेन समनंतरप्रत्ययेनजनितं मनोविज्ञानं मानसंतन्मानसं समनंतरप्रत्ययविशेषणेन योगिज्ञानस्य
मानसत्वप्रसंगोनिरस्तः समनंतरप्रत्ययशब्दः स्वसंतानवर्त्तिन्युपादाने ज्ञाने रूढ्या प्रसिद्धः ततोभिन्नसंतानवर्तियोगि ज्ञान
मपेक्ष्यपृथग्जनचित्तानां समनंतरत्वमपदेशेनास्ति २ सर्वचित्तचैत्तानामात्मसंवेदनं स्वसंवेदनं चित्तंवस्तुमात्रग्राहकं
ज्ञानं चित्तेभवा श्चैत्तावस्तुनोविशेषरूपग्राहकाः सुखदुःखोपेक्षालक्षणाः तेषामात्मायेन संवेद्यते तत्स्वसंवेदनं ॥३ भूता
र्थभावनाप्रकर्षपर्यंतजं योगिज्ञानं ॥ भूतार्थः भावना पुनरश्वेतसि समारोपः भूतार्थभावना प्रकर्षपर्यंताज्ज्ञातं योगिज्ञा
नं ॥४॥ ननुयदिक्षणक्षयिणः परमाणवएवतात्विकास्तर्हिकिंविभ्रमोयं घटपटकटशकटकुटादिस्थूलार्थप्रतिभासइतिचे
न्निरालंबनएवायमनादिविततथा सनाप्रवर्तितस्थूलार्थाभासोनिर्विषयत्वादाकाशकुसुमवत्स्वप्नज्ञानवद्देति यदुक्तं वात्स्यायनेने
यतेत्यर्थो यथालोर्विकल्प्यते वासनालुंठितं चित्तमर्थाभासे प्रवर्त्तते ॥ इति ॥ नान्योनुभाव्यो बुद्ध्यात्तिस्तस्यानानुभवोन्यः
ग्राह्यग्राहकवेधुर्यान्न स्वयं सेवप्रकाशते ॥ इतिच ॥ ननुप्रत्यक्षेण क्षणक्षयिपरमाणुस्वरूपं स्थलक्षणं कथंसंवेद्यते
इतिचेदुच्यते प्रत्यक्षंहिवर्तमानमेवसंनिहितंवस्तुनोरूपंग्रहीतिनपुनर्भाविभूतं तदसंनिहितत्वात्तस्यां तर्हिप्रत्यक्षा
नंतरं नीलरूपतादिनिर्णयवत् क्षणक्षयनिर्णयः कुतोनोत्पद्यते इतिचेदुच्यते ॥ तदेवस्मृतिः पूर्वकालदृशासंबंधितं
वस्तुनोध्यवस्यंती क्षणक्षयमुत्पद्यमानं निवारयति अतएवसौगतैरिदमभिधीयते दर्शनेन क्षणिकाक्षणिकत्वसाधार ॥११॥

* स्वविषयस्यघटादेरिंद्रियज्ञानविषयस्यानंतरोविषयो द्वितीयः क्षणः तेन सहकारिणा सहमिलित्वा इंद्रियज्ञानेनोपादानेन समनंतरप्रत्ययेन
य जनितं मनोविज्ञानं मानसं ६ पंक्ति

णस्यार्थस्यविषयीकरणात् कुतश्चिद्भ्रमनिमित्तादक्षणिकत्वारोपेपिनदर्शनमक्षिकत्वे प्रमाणंकिंतु प्रत्युताप्रमाणंवि
परीतावसायकांतत्वात् क्षणिकत्वेपिनतत्प्रमाणं तदनुरूपाध्यवसायाजननात् नीलरूपेतुतथाविधनिश्चयकरणात्प्र
माणमितितदीयमुक्तं निर्विकल्पकमभ्रांतंचप्रत्यक्षमिति अत्राभ्रांतमितिविशेषणग्रहणादनुमानेनतदग्रहणाद
नुमानंभ्रांतमित्यावेदयति तथाहि भ्रांतमनुमानंसामान्यप्रतिभासित्वात् सामान्यस्यचबहिः स्वलक्षणेव्यतिरेकाव्यति
रेकविकल्पाभ्यामुपाक्रियमाणतया योगात् सामान्यस्वलक्षणरूपतयानुमानेनविकल्पनात् अतस्मिन्नस्वलक्षणे त
द्ग्रहस्यस्वलक्षणतयापरिछेदस्य भ्रांतिलक्षणत्वात् प्रामाण्यंपुनः प्रणालिकयाबहिः स्वलक्षणबलायातत्वादनुमान
स्यातथाहि ॥ नार्थंविनातादात्म्यतदुत्पत्तिरूपसंबंधप्रतिबद्धलिंगसद्भावोनतर्हिना तद्विषयज्ञानं नतद्ज्ञानमंतरेण
प्राढावधारितसंबंधस्मरणं तदस्मरणेनानुमानं इत्यर्थव्यभिचारत्वाद्भ्रांतमपि प्रमाणमितिसंगीयते तदुक्तं अतस्मि
न्तद्ग्रहो भ्रांतिरपिसंधानतः प्रमेति अनुमेनार्थदर्शंतपूर्वकंनिश्चये धर्मकीर्तिरकीर्तयत् यथा मणिप्रदीपप्रभयोर्मणि
बुध्याभिधावतोः मिथ्याज्ञानाविशेषेपिविशेषोर्थक्रियांप्रति ॥ १ यथातथा यथार्थे ज्ञेप्यनुमानं तदाभासयोः अर्थक्रि
यानुरोधेनप्रमाणत्वंव्यवस्थितं ॥ २ इति अथानुमानलक्षणमाह ॥ त्रिरूपाद्लिंगतइत्यादित्रीणिरूपाणिपक्षधर्मत्वादी
निवक्ष्यमाणानियस्यतत्त्रिरूपंत्रिस्वभावमित्यर्थः तत्त्रिरूपाद्लिंगाद्धेतोः सम्यगवगताद्लिंगिनः परोक्षस्यवस्तु
नोयज्ञानंतदनुमानसंज्ञितं प्रमाणं अनुपश्चाद्लिंगग्रहणादनंतरं परोक्षस्यवस्तुनोमानं ज्ञानमनुमानमितिव्युत्पत्त्यनुमान
शब्दस्यार्थः अत्रश्लोकेचरमपादस्यनवाक्षरत्वेप्यार्षत्वान्नदोषः इदमत्रतत्त्वंयथाजनेध्वजादिलिंगेदृष्टेलिंगीराजा
निश्चीयतेतथात्रिरूपेणलिंगेनधूमादिनाक्वचिदुपलभ्येनपरोक्षः पार्थोलिंगीवह्न्यादिस्तत्रसन्विज्ञायतेइदंचलिंगा
दलिंगिज्ञानमनुमानमभिधीयतेतच्चद्वेधास्वार्थंपरार्थंचयदात्रिरूपाद्लिंगात्स्वयंलिंगिनंसाध्यं प्रतिपद्यतेतदास्वार्थ
मनुमानंयदानुपरंप्रतिसाध्यस्यप्रतिपत्तयेत्रिरूपहेत्वभिधानंतदापरार्थमनुमानमितिलिंगिज्ञानंत्वित्यनुशब्दोविशे

पणार्थ इदं विशेषणं अत्र यद्यपि रूपं लिंगस्य लिंगिनो गमकमुक्तं तल्लिंगमनुपलब्धि स्वभावकार्यभेदान्निधैव भवतीति तत्रानु
पलब्धिश्च द्वादशधा तेषां मूलभेदापेक्षया तद्यथा विरुद्धोपलब्धि १ विरुद्धकार्योपलब्धि २ स्वभावानुपलब्धिश्च ४ विरुद्धोपलब्धि कारणानुपलब्धि
र्यथा नात्र शीतस्पर्शो ऽग्नेः १ विरुद्धकार्योपलब्धिर्यथा नात्र शीतस्पर्शो धूमात् २ कारणानुपलब्धिर्यथा नात्र धूमोऽग्नेरभा
वात् ३ स्वभावानुपलब्धिर्यथा नात्र धूम उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः ४ शेषास्तु समाप्यनुपलब्धयो धर्मविंदुप्रभृति
शास्त्रप्रतिपादिताः एवेयं चतुर्षु भेदेष्वंतर्भवंतीति प्रतिभेदरूपत्वान्नात्र पृथगभिहिताः १ स्वभावहेतुर्यथा वृक्षोयंशिं
शिपात्वात् २ कार्यहेतुर्यथा अग्निरत्र धूमात् एषु चानुपलब्ध्यादिषु हेतुषु तादात्म्यतदुत्पत्तिसंबंधबलादविनाभावो वि
ध्यते आद्यांत्ययोरनुपलब्धेः स्वभावहेतोश्च तादात्म्याभावात् मध्ययोरनुपलब्धेः कार्यहेतोश्च तदुत्पत्तिसद्भावात् अवि
नाभावश्च तादात्म्यतदुत्पत्तिभ्यामेव व्याप्तः तादात्म्यतदुत्पत्तीचानुपलब्धिस्वभावकार्येष्वेव विधेयते नान्यत्र ततस्तादात्म्य त
दुत्पत्तिप्रतिबंधविकलानामुपलब्धिस्वभावकार्यव्यतिरिक्तानामर्थानांसर्वेषां हेत्वाभासतैव प्रत्येतव्या तेन संयोग्यादिका
वैशेषिकादिकल्पिता हेतवोनभवंति व्यभिचारस्य संभवात् कारणात् कार्यानुमानंतु व्यभिचारित्वेनेष्टमप्युपगम्यते यद
पि रसतः समानसमयस्य रूपादेरनुमानं सौगतैरभ्युपगतं यदपि समवायेन हेतुना कार्यात्तादानुमानंच तेऽपि स्वभावा
नुमानत्वयाऽभ्युपेते तथाहि ईदृशरूपोत्पादसमर्थः प्राक्तनोरूपलक्षणः ईदृशरसजनकत्वात् पूर्वोपलब्धरूपवदि
रूपांतरोत्पादरूपसामर्थ्यानुमानं योग्ये यं प्रतिबंधकविकलाबीजादिसामग्री स्वकार्योत्पादने समग्रत्वात् पूर्वदृष्टबीजसा
मग्रीवदि—योग्यतानुमानं अतस्वभावहेतुप्रभवेरेवैतेनपुनः कारणात्कार्यानुमाने ॥ इति अथानुपलब्ध्यादि भेदेन त्रि
विधस्यापि लिंगस्य यानि रूपाणि भवंति तान्येवाह ॥ रूपाणि पक्षधर्मत्वं सपक्षेविद्यमानता विपक्षे नास्तिता हेतोरेवं त्रीणि
विभाव्यतां ॥११॥ साध्यधर्मविशिष्टो धर्मापेक्षः तस्य धर्मः पक्षधर्मः सद्भावः पक्षधर्मत्वं पक्षशब्देनचात्र केवलो धर्म्यभि
धीयते अवयवे समुदायोपचारात् यदि पुनर्मुख्य एवसाध्यधर्मविशिष्टो धर्मापेक्षो गृह्यते तदानुमानं व्यर्थमेव

॥१२॥

स्यात् साध्यस्यापि धर्मिवत्सिद्धत्वात् तत्रश्चपक्षधर्मत्वं पक्षे धर्मिणि हेतोः सद्भावः सचप्रत्यक्षेणानुमानतोवाप्रती
यते तत्रप्रत्यक्षतः कस्मिंश्चित्प्रदेशे धूमस्य दर्शनं अनुमानतत्वश्च शब्देरुक्तस्यनिश्चयः इदमेकंरूपं तत्रासमा
नः पक्षः सपक्षस्तस्मिन्सपक्षेदृष्टांतेविद्यमानताहेतोरस्तित्वं सामान्येनभाव इत्यर्थः इदंद्वितीयंरूपं अस्यचान्वयइति
द्वितीयेनाभिधानं विरुद्धपक्षोविपक्षः साध्यसाधनरहितस्तस्मिन् विपक्षेनास्तिताहेतोरुक्तेनासत्वं इदंतृतीयंरूपं अस्यच
व्यतिरेक इतिद्वितीयमभिधानं एतानिपक्षधर्मत्वंसपक्षत्वविपक्षासत्वलक्षणानिहेतोर्लिंगस्य त्रीणिरूपाणिएवं
शब्दस्येति शब्दार्थत्वादिति विभाव्यतां हृदयेनसम्यगवगम्यतांतत्रहेतोर्यदिपक्षधर्मत्वंनस्यात् तदाप्रमाणाभासादो
दृष्टधूमोऽन्यत्रपर्वतादौ वह्निंगमयति नचैवंगमयति ततः पक्षधर्मत्वंरूपंतथायदि सपक्षसत्वंरूपंनस्यात्तदासाध्य
साधनयोरगृहीतप्रतिबंधस्यापिपुंसोधूमोदृष्टमात्रोधर्मंजयंज्ञापयेत् नचैवंज्ञापयति अतः सपक्षसत्वंतथायदिविप
क्षासत्वंरूपंनस्यात्तदा धूमः साध्यरहितेविपक्षेजलादावपि वह्निमनुमापयेन्नचैवमनुमापयतितेनविपक्षासत्वंरू
पं अथवाअनित्यशब्दः कृतकत्वकार्ष्यात् अत्रनपक्षधर्मः अनित्यः शब्दः श्रावणत्वात् अत्रसपक्षविपक्षाभावादे
वनसपक्षसत्वविपक्षासत्वे अनित्यः शब्दः प्रमेयत्वात् लोष्टलेख्यवज्जं पार्थिवत्वात् द्रुमादिवत् सलोमामंडूक उ
त्पूतोत्पुटगमनात् हरिणवत् निर्लोमाबाहरिणउत्पूतोत्पुटगमनान्मंडूकवत् एवमनित्यादिसाध्यविपर्ययेपिहे
तुनांवर्त्तनान्नविपक्षासत्वं ततएतानित्रीणि समुदितानिरूपाणियस्य हेतोर्भवंतिसएवहेतुः स्वसाध्यस्यगमकोभवति
नापरः नन्वेवंलक्षणाहेतवः कतिभवंतीतीचेन्नन्वंकुरादएतल्लक्षणा अनुपलब्धिस्वभावकार्याख्यास्त्रयएवहेतवइ
तिएषामुदाहरणानिप्रागेवोपदर्शितानि तथापिपुनः स्वभावहेतुकदाक्रियते सर्वंक्षणिकमितिपक्षः सत्वादितिहेतुः
अयंहेतुः सर्वस्मिन्वर्त्ततेइतिपक्षधर्मत्वंयत्सत्तत्क्षणिकंयथाविद्युदादिरितिसपक्षसत्वंयत्क्षणिकंनभवतितत्स
दपिनभवतियथाख्यपुष्पंअत्रक्षणिकविपक्षेनित्येक्रमयोगपद्याभ्यामर्थक्रियालक्षणस्यसत्वस्यानुपपत्तिर्नित्या

सत्वस्यैवात्तिरिति विपक्षासत्वं सत्त्वसर्वमित्युपनयः सत्वात्सर्वक्षणिकमिति निगमनं एवमन्यहेष्वपि तेयं यथा पिशाच्युपेतं पक्षधर्मतोसंहाररूपंसौगतैरनुमानमाम्नायि तथापिमंदमतीन् व्युत्पादयितुंपंचावयवानुमानदर्शनमाश्रयंतु इमिति अयमत्रश्लोकद्वयस्यतात्पर्यार्थः पक्षधर्मान्वयव्यतिरेकलक्षणरूपत्रयोपलक्षितानित्रीण्येवलिंगानि अनुपलब्धिः स्वभावः कार्यचेति ११ अथामुक्तोपिकश्चनविशेषोलिख्यते तत्रप्रमाणादभिन्नमर्थाधिगमएवप्रमाणस्यफलं तर्कप्रभिज्ञयोरप्रामाण्यं परस्पर विनिर्लुंठितक्षणक्षयिपरमाणुलक्षणानिनिरस्तलक्षणानि प्रमाणगोचरस्तात्विकः वास नारूपं कर्मपर्यायाएवसंतिनद्रव्यं वस्तुनिः केवलं स्वसत्वमेवनपुनः परासत्वंइतिसामान्येनबौद्धमतं अथवावैभाषिक सौत्रांतिकयोगाचारमाध्यमिकभेदात्चतुर्धाबौद्धाभवंति तत्र आर्यसंमितीयापरनामकवैभाषिकमतमदः चक्षुःक्षणिकं वस्तुजातिर्जनयति स्थितिस्थापयति जराजर्जरयति विनाशोविनाशयति तथात्मापितथाविधएवपुद्गलश्चास्रवाभिधीयते पुद्गलात्मकइत्यर्थः निराकारोबोधोऽर्थसहभाव्येकसामग्र्यधीनस्तत्रार्थेप्रमाणमिति १ सौत्रांतिकमतंपुनरिदंरूपवेदनाविज्ञानसंज्ञासंस्काराः सर्वशरीरिणामेतेचस्कंधाविधंतेंपुनरात्मानएवहिपरलोकगामिनः तथाचसिद्धांतः पंचमानिभिक्षवः संज्ञामात्रंप्रतिज्ञामात्रं व्यवहारमात्रं कतमानिपंच अतीतोऽद्धाअनागतोऽद्धासहेतुकोविनाशः आकाशंपुद्गलइति अनपुद्गलशब्देनपरपरिकल्पितोनित्यत्वाद्यापकत्वादिधर्मकआत्मेतिबाह्योर्थोनित्यमप्रत्यक्षएव ज्ञानाकारान्यथानुपपत्त्यातुसन्नवगम्यतेसाकारोबोधः प्रमाणंतथाक्षणिकाः सर्वसंस्काराः स्वलक्षणंपरमार्थः यदाहुस्तद्वादिनः प्रतिक्षणंविशरारवोरूपरसगंधस्पर्शपरमाणवोज्ञानंचेत्येवतत्त्वमिति अन्यापोहः शब्दार्थः तदुत्पत्तिद्वाराताभ्यामर्थपरिछेदः नैरात्म्यभावनातोज्ञानसंबोधः प्रमाणंवासनापरिपाकतोनीलपीतादिप्रतिभासाः आलयविज्ञानंहिसर्ववासनाधारभूतंआलयविज्ञानविशुद्धिरेवापवर्गइति २ माध्यमिकदर्शनेशून्यमिदं स्वप्नोपमः प्रमाणप्रमेययोः प्रतिभागः मुक्तिस्तुशून्यतादृष्टेस्तदर्थंशेषभावनाइति केचिन्माध्यमिकाः स्वसंवेदनमाहुः

तदुक्तं ॥ अर्थोज्ञानसमन्वितोमतिमतावेद्यापिकेनोच्यते ग्राह्यंवस्तुविचारसोक्तिकेराश्रितः योगाचारमतानुगैरभिमतासाकारबुद्धिःपरा मन्यंतेबतमध्यमाःकृतधियः स्वस्थांपरांसंविदं ॥ १ इतिज्ञानसारमिताद्दश्यंधाः तर्कभाषाहेतुबिंदुस्तत्रीकार्यटतर्कनाम्नीप्रमाणवार्त्तिकंतत्वसंग्रहे न्यायबिंदुकमलशीलोन्यायप्रवेशकश्चेत्यादयस्तद्ग्रंथाइति ॥ एवंबौद्धमतमभिधाय तदेवंसंचिक्षिप्सुरुत्तरंचाभिसंधित्सुराह ॥ बौद्धराद्धांतवाच्यस्यसंक्षेपोयंनिवेदितः ॥ नैयायिकमतस्यतः कथ्यमानोनिशम्यतां ॥ १२ ॥ बौद्धराद्धांतस्यसौगतसिद्धांतस्ययद्वाच्यंतस्यसंक्षेपोयमनंतरोदितो निवेदितोऽभिहितः नैयायिकमतस्यशैवशासनस्यसंक्षेपतउर्ध्वं कथ्यमानोनिशम्यतांश्रूयतां ॥

इतितपागणनभोंगणदिनमणिश्रीदेवसुंदरसूरिशिष्यश्रीयुगरत्नसूरिविरचितायांतर्करहस्यदीपिकाभिधानायांषड्दर्शनसमुच्चयटीकायां बौद्धमतप्रकरणोनामप्रथमोऽधिकारः ॥

॥ अथादौनैयायिकानां योगापराभिधानानांलिंगादिव्यक्तिरुच्यते ॥ तेचदंडधराः ॥ मौंजकौपीनपरिधानाः कंबलिक्षाप्रावृताजराधारिणोभस्मोद्धूलनपरायज्ञोपवीतिनोजलाधारपात्रकराः नीरसाहाराः प्रायोवनवासिनो दोर्मूलेतुंबकंबिभ्राणाः कंदफलाशिन आतिथ्यकर्मनिरता सस्त्रीकानिस्त्रीकाश्चनिः स्त्रीकास्तेषूत्तमाः तेचपंचाग्निसाधनपराः करेजटादोचप्राणिलिंगधराश्चापिभवंति उन्मीलंसंयमाबस्थोन्मग्नात्मस्तुनग्नाभमंति एतेदंपदादि शैवंविधायशिवंध्यायंतोभस्मनांगंत्रिस्त्रिःस्पृशंतियजमानोवंदमानः कृतांजलिर्वक्ति ॐ नमःशिवायेतियुक्तस्तथैवशिवायनमइतिप्रतिवक्ति तेचसंसर्वेवंदंतिशैवीं दीक्षांद्वादशाब्दीमेवित्तायोपिमुंचति दासीदासोपिभवतिसोपिनिर्वाणमृच्छति १ तेषामीश्वरोदेवः सर्वज्ञः सृष्टिसंहारादिकृत्तस्यचाष्टादशावताराअमी नकुली १ शौष्य कौशिक २ गार्ग्यः ३ मैत्र ४ अकौरुषा ५ ईशानः ६ पारद्यः ७ कपिलांडः ८ मनुष्यकः ९ कुशकः १० अत्रिः ११ पिंगलः १२ पुष्पकः १३ बृहदार्यः १४ अगस्तिः १५ संतानः १६ राशीकरः १७ विद्यागुरुश्च १८ एतेषांतीर्थेशाः पूजनीयाः एतेषांपूजाप्रणिधानविधिस्तु तदागमाद्वेदितव्यः तेषांसर्वतीर्थेषुभ

रणाद्यपूजकाः देवानां नमस्कारोनसन्मुखैः कार्यः तेषुनिर्विकारात्मस्वमीमांसागतमिदंपरंदर्शयति नस्यर्ध्वनीनकपालिनोनकपालदामनंदीकल्पानगिरिजानजटानभस्मयत्रान्यदेवचनकिंचिदुपास्महेतद्रूपंपुराणमुनिशीलितमीश्वरस्य ॥१ सएवयोगिनांसेव्योत्पत्त्यर्वाचीनस्तु भोगभाक्साध्यायमानोराज्यादिसुखलुब्धैर्निषेव्यते ॥२ उक्तंचनैस्वयोगशास्त्रे ॥ वीतरागंस्मरन् योगीवीतरागत्वमश्नुते सरागंध्यायतस्तस्यसरागत्वंतुनिश्चितं ॥३ येनयेनहिभावेनयुज्यतेयंत्रवाहकः तेनतन्मयतांयाति विश्वरूपोमणिर्यथा ॥४ इतिएतत्स्वरूपंलिंगवेषदेवादिस्वरूपंवैशेषिकमतेष्वनसातव्यंमतोनैयायिकवैशेषिकाणांहिमिथः प्रमाणतत्त्वानांसंख्याभेदेसत्यव्यन्योन्यंतत्त्वानांतभीदनाःप्रतीयानेवभेदोजायतेतेनैतेषांन्यायोमतनुल्यता उभयेप्येतेतपस्विनोऽभिधीयंतेतेचशैवादिभेदेनचतुर्द्धाभवंतितदुक्तं आधारभरत्नकौपीनकषायजोपवीतिनः स्वस्वाचारादिभेदेनचतुर्धास्युस्तपस्विनः ॥१ शैवाःपंचपताश्चैवमहाव्रतधरास्तथा तुर्याःकालमुखाश्चैवभेदाएतेतपस्विनां ॥२ तेषामंतर्भेदाभरटभक्तरलिंगीकतापसादयोभवंतिभरटादीनां व्रतयज्ञोपवीतादिवर्णनियमोनास्तियस्यनुशिवेभक्तिः सद्यतीभरटादिर्भवेत्परंशास्त्रेषुनैयायिकाः सदाशिवभक्तत्वात् शैवाइत्युच्यंते वैशेषिकास्तुपाशुपताइति तेननैयायिकशासनंशैवमाख्यायतेवैशेषिकदर्शनंचपाशुपतमिति इदंमयायथादृष्टंयथाश्रुतंचाभिधेतत्तद्धिशेषस्तुतद्ग्रंथेभ्योविज्ञेयः ॥१२॥ अथपूर्वविज्ञातंनैयायिकमतसंक्षेपमेवाह ॥ अक्षपादमतेदेवःसृष्टिसंहारकृच्छिवः ॥ विभुर्नित्यैकसर्वज्ञोनित्यबुद्धिसमाश्रयः ॥१३॥ अक्षपादेनाद्येनगुरुणायतःप्रणीतंनैयायिकमतस्यमूलसूत्रंतेननैयायिकाअक्षपादाअभिधीयंतेतन्मतंचाक्षपादमतमितितस्मिन्नक्षपादमतेशिवोमहेश्वरः सृष्टिश्वराचरस्यजगतोनिर्माणंसंहारस्तद्विनाशः द्वंद्वेसृष्टिसंहारौतौसोवांत्यशक्तिमाहात्म्येनकरोतीतेसृष्टिसंहारकृत्केवलायाः सृष्टेःकरणेनिरंतरोत्पद्यमानोऽसंख्यःप्राणिगणोभुवनत्रयेपिनमायानूसृष्टिवत्संहारस्यापिकारणंअत्रप्रयोगमेवंशैवाव्याहरंतेभूभूधरसुधाकरमकराकरादिकंबुद्धि

MEMORIAL BHAU DAJI

मत्पूर्वकंकार्यत्वात् यत्कार्यं तत्तद्बुद्धिमत्पूर्वकं यथाघटकार्यं चेदं तस्माद्बुद्धिमत्पूर्वकं यश्चास्यबुद्धिमान् स्रष्टासएवेश्वरएवेत्यन्वयः व्यतिरेकेगगनंनचाममसिद्धोहेतुः भूभूधरादीनांस्वस्वकारणकलापजन्यत्वेऽवयवित्वाद्वाकार्यत्वस्यजगतिस्वप्रसिद्धत्वान्नापिविरुद्धोनैकांतिकोवा विपक्षाद्व्यावृत्तत्वात् नापिकालात्ययापदिष्टः प्रत्यक्षागमाबाध्यमानसाध्यधर्मधर्मिविषयेहेतोः प्रवर्त्तनात् नापिप्रकरणसमः तत्प्रतिपक्षिपदार्थस्वरूपसमर्थनप्रधानप्रत्यनुमानोदयाभावात् अथनिर्हेतात्मवत् अशरीरत्वादेवनसंभवति सृष्टिसंहारकर्त्तेश्वरइतिप्रत्यनुमानोदयात् कथंनप्रकरणसम इतिचेदुच्यते अत्रत्वदीयानुमानेसाध्यमानईश्वरोधर्मत्वेनप्रतीतोवाभिप्रेयते अप्रतीतश्चेत् तदात्वनूपरिकल्पितहेतोराश्रयासिद्धोदोषः सम्प्रत्येत प्रतीतश्चेन्नहियेनप्रमाणेनप्रतीतस्तेनैवस्वयमुद्भावितनिजतनुरपिकिमितिनाभ्युपेयते इतिकथमशरीरत्वं ततोनप्रकरणसमदोषताहेतोरतः साधुकंसृष्टिसंहारकृच्छिवइतितथाविभुकारणत्ववत् सर्वजगद्व्यापकः नियतैकस्थानवर्त्तित्वेत्यनियतप्रदेशवर्त्तिनांपदार्थानांप्रतिनियतयथावन्निर्माणानुपपत्तेः नह्येकस्थानस्थितकुंभकारोपि दूरतरघटादिघटनायांव्याप्रियतेनस्माद्विभुःतथानित्यैकसर्वज्ञः नित्यश्चासावेकश्चनित्यैकः सचासौसर्वज्ञश्चेतिविशेषणत्रयसमासः तत्रनित्यः प्रच्युतानुत्पन्नस्थिरैकरूपः कूटस्थः ईश्वरस्यस्वनित्यत्वेपराधीनोत्पत्तिसव्यपेक्षतयाकृतकत्वप्राप्तिःस्थोत्पत्तावपेक्षितपरव्यापारोहिभावः कृतकश्चेज्जगत्कर्त्तास्यात् तदातस्याप्यपरेणकर्त्राभाव्यमनित्यत्वादेवअपरस्यापिचकर्त्तुरन्येनकर्त्राभवनीयमित्यनवस्थानदीदुस्तरास्यात् तस्मान्नित्यएवाभ्युपगमनीयः नित्योपिसएकोऽनेकोवा तृतीयोमनव्यः बहूनांहिजगत्कर्तृत्वीकारेपरस्परंपृथग्पृथगन्योन्यविसदृशमितिव्यायतत्वेनैकैकपदार्थस्यविसदृशनिर्माणे सर्वमसमंजसमापद्यते इतियुक्तमेकइतिविशेषणंएकोपिसर्वज्ञः सर्वपदार्थानांसामस्त्येनज्ञाताहिसर्वज्ञत्वाभावेहि विधित्सितपदार्थोपयोगिजगत्प्रसृमरविप्रकीर्णपरमाणुकणप्रच

यमस्य कृसामर्थ्यमीलनाक्षमतया यथातथेनं पदार्थानां निर्माणं दुर्घटं भवेत् सर्वज्ञत्वेपुनः सकलप्राणिनां संमीलित
नसमुचितकारणकलापानुरूप्येण कार्यवस्तुनिर्माणः स्वार्जितपुण्यापापानुमानेनच स्वर्गनरकयोः सुखदुःखोपभो
गदानः सर्वथोचितीनातिवर्तनं तथाचोक्तं ज्ञानमप्रतिघंयस्य वैराग्यंचजगत्पतेः ऐश्वर्यंच धर्मश्च सहसिद्धं चतु
ष्टयं ॥१ अन्योजंतुरनीशोयमात्मनः सुखदुःखयोः ईश्वरप्रेरितोगच्छेत् स्वर्गंवाश्वभ्रमेववा ॥२ अथवानित्यैक
सर्वज्ञ इत्येकमेवविशेषणं व्याख्येयं नित्यसदेकोद्वितीयः सर्वज्ञोनित्यैकसर्वज्ञः एतेनाऽनादिसर्वज्ञमीश्वरमेकं
विहायान्यः कोपिसर्वज्ञः कदापिनभवतियतईश्वरादन्येषां योगिनां ज्ञानानि अपरं सर्वमतींद्रियमर्थजानाना
न्यपिस्वात्मानंनजानंते ततस्ते कथंसर्वज्ञाः स्युरित्यावेदितंभवति तथानित्यबुद्धिसमाश्रयोनित्याबुद्धेर्ज्ञानस्य
स्थानं क्षणिकबुद्धिमतोहिपराधीनकार्यापेक्षणेनमुख्यकर्तृत्वाभावादनीश्वरत्वप्रसक्तिरिति ईदृशविशेषणविशि
ष्टेनयायिकमतेविवादोवः १३॥ अथतन्मतेतत्त्वानिविवरीषुः प्रथमंतेषांसंख्यांनामानिचसमाख्याति॥ तत्त्वानि
षोडशामुत्रप्रमाणादीनितद्यथा ॥ प्रमाणंच प्रमेयंच संशयश्चप्रयोजनं ॥१४॥ दृष्टांताथसिद्धांतोऽवयवातर्कनिर्ण
यौ वादोजल्पोवितंडाच हेत्वाभासाश्चजातयोनिग्रहस्थानानांचप्रकृपणा ॥ अथोपलब्धिहेतुस्त्वानुप्र
माणंनत्रिविधं ॥१६॥ त्रिभिर्विशेषकं व्याख्या अमुत्राभिनूप्रकांतेनैयायिकमते प्रमाणादीनि प्रमाणप्रमेयप्र
भृतीनिषोडशतत्त्वानिभवंति तद्यथेत्युपदर्शने प्रमाणंचेत्यादितत्रप्रमितिरुपलब्धिर्ज्ञानंयेनजन्यते तद्ज्ञानस्यजनकं
कारणं प्रमाणं प्रमीयतेज्ञानंजन्यतेऽनेनेतिप्रमाणमितिव्युत्पत्तेः ज्ञानस्यचजनकंद्विविधं अचेतनंज्ञानंच तत्राचेतन
मिंद्रियतदर्थसंनिकर्षप्रदीपलिंगशब्दकं ज्ञानस्य कारणत्वात् प्रमाणं ज्ञानंच ज्ञानांतरजन्मनियद्व्यापियतोतदपिज्ञान
कत्वात् प्रामाणं ज्ञानस्वजनकंतु प्रमाणस्यफलंभवेन्नपुनः प्रमाणं ॥१ प्रमेयं प्रमाणजन्यज्ञानेनग्राह्यंवस्तु २ दोलायमा
नाप्रतीतिः संशयः चकारास्त्रयोपि प्रमाणादीनामन्योन्यापेक्षयासमुच्चयार्थाः ३ प्रयोजनमभीप्सितसाधनीकंफलं
४ दृष्टांतोवादिप्रतिवादिसंमतंनिदर्शनं अपिसमुच्चये ५ अथशब्दआनंतर्येसर्वदर्शनसंमतंशास्त्रप्रभृतिः ६ अवय
वाः पक्षादयोनुमानस्यांगानि ७ सदेहदूर्ध्वंमन्वयधर्मचिंतनंतर्कः स्थाणुरत्राथुनासंभवतीति ८ स्थाणुरेवायमित्यव
धारणंनिर्णयः द्वंद्वेतर्कनिर्णयौ ९ गुरुणासमंतत्वनिर्णयार्थंवदनंवादः १० परेणसमंजिगीषयाजल्पनंजल्पः ११ अप
रामृष्टवस्तुतत्वंमोक्षार्थमात्मंवितंडा १२ हेतुवदाभासमानाः हेत्वाभासाः सम्यगहेतवइत्यर्थः॥ १३॥ परवचनवि
घातार्थंविकल्पोपपादनानिछलानि १४ जातयोऽसम्यग्दूषणानि १५ यैरुक्तैर्यस्मानिगृह्यतेतानिनिग्रहस्थानानि
१६ इति तत्रामनंतरोक्तानांप्रमाणादीनामेवमिदंप्ररूपणास्वरूपप्रदर्शनाभवति अत्रादौप्रमाणस्यरूपणांचिकीर्षुः
अथमतस्यस्यसामान्यलक्षणंसंख्यांचाहुः॥ अर्थोपलब्धिरहेतुः स्यात् प्रमाणं अर्थस्यग्राह्यस्यवाह्यस्यसंभवंभां
गोरुहादेर्गोतरस्यचज्ञानसुखादेरुपलब्धिर्ज्ञानं अर्थेपलब्धिः व्याख्यानतोविशेषप्रतिपत्तिरितिन्यायाद्व्याभिचारि
णी अव्यपदेश्याव्यवसायात्मिकाचार्थोपलब्धिग्रहणं नतुपलब्धिमात्रं तस्यायोहेतुः कारणं सप्रमाणंस्यात् भवेन्न अ
र्थोपलब्धिस्तुप्रमाणस्यफलं अयमत्रभावः अव्यभिचारादिविशेषणविशिष्टार्थोपलब्धिजनिकासामर्थ्यातदेकदेशो
वा चक्षुःप्रदीपज्ञानादिर्वोधरूपोऽबोधरूपोवासाधकतमत्वात् प्रमाणंतज्ज्ञानकत्वंचतस्यप्रामाण्यंतज्जन्याऽन्वर्थोप
लब्धिः फलमिति इंद्रियजत्वलिंगजत्वादिविशेषणविशेषितासेवोपलब्धिर्यतः स्यात्तदेवप्रत्यक्षादिप्रमाणस्यविशेषलक्ष
णं वक्ष्यते केवलमव्यपदेश्यमितिविशेषणं नशब्देसंबंधनीयतस्यशब्दजन्यत्वेनव्यपदेश्यत्वात् अथप्रमाणस्य
भेदानाह तच्चतुर्विधंतत्प्रमाणंचतुर्विधंचतुर्भेदं १४।१५।१६ अथतच्चातुर्विध्यमेवाह ॥ प्रत्यक्षंमनुमानंचोपमानंशा
ब्दिकंतथा ॥ तत्रेंद्रियार्थसंनिकर्षोत्पन्नमव्यभिचारिच ॥१७॥ व्यवसायात्मकंज्ञानं व्यपदेशविवर्जितं ॥ प्रत्यक्षमनुमानंतु
पूर्ववत्त्रिविधंभवेत् ॥१८॥ पूर्ववच्छेषवच्चैवदृष्टंसामान्यतस्तथा तत्राद्यंकारणात्कार्यानुमानमिहगीयते ॥१९॥ ॥ प्रत्य
क्षमक्ष्णि अनुमानंलैंगिकं चकारः समुच्चयार्थः उपमानमुपमितिः तथाशब्दस्यसमुच्चयार्थत्वात् शाब्दिकंचशब्देभवं

शाब्दिकमागमइत्यर्थः अथप्रत्यक्षस्यलक्षणंलक्षयतितत्रेंद्रियार्थेत्यादि तत्रेतितेषुप्रमाणेषुप्रथमंप्रत्यक्षमुच्यते अत्रास्येदमक्षपादप्रणीतंसूत्रं इंद्रियार्थसन्निकर्षोत्पन्नंज्ञानमव्यपदेश्यमव्यभिचार्यव्यवसायात्मकंप्रत्यक्षमिति इंद्रियंचक्षुरादिमनःपर्यंतं तस्यार्थःपरिछेद्यः इंद्रियार्थः इंद्रियविषयभूतोऽर्थोरूपादिः रूपादयस्तदर्थाइतिवचनात् तेनसंनिकर्षप्रत्यासत्तेरिंद्रियस्यप्राप्तिः संबंधइतियावत् सचषोढा इंद्रियेणसाक्षाद्द्रव्यस्यसंयोगएव १ रूपादिगुणानांसंयुक्तसमवायेनैवद्रव्ये समवेतत्वात् २ रूपत्वादिषुगुणसमवेतेतैषुसंयुक्तसमवेतेषुसमवायएव ३ शब्दसमवायएवआकाशस्यश्रोत्रत्वेनैवंधर्मस्थितत्वात् शब्दस्यचगुणत्वेनतत्रसमवेतत्वात् ४ शब्दत्वेसमवेतसमवायएवशब्देसमवेतत्वात् ५ समवायाभावयोर्विशेषणविशेष्यभावएव उक्तरूपंपंचविधसंबंधसंबद्धेषुसमवायघटादिदृश्याभावयोर्विशेषणत्वंविशेष्यत्वंवाभवतीत्यर्थः तद्यथावर्त्ततवः पटसमवायवंतः तंतुषुपटसमवायइतिपटशून्यंभूतलंइहभूतलेघटोनास्तीति ६ षोढासंनिकर्षः अथनिकर्षग्रहणमेवास्तुसंग्रहणंव्यर्थंनसंशब्दग्रहणस्यसंनिकर्षस्यदृष्टप्रतिपादनार्थत्वात् एतदेवसंनिकर्षपदंज्ञानोत्पादेसमर्थकारणं नसंयुक्तसंयोगादिकमितिसंग्रहणाद्दृश्यतेइंद्रियार्थसंनिकर्षादुत्पन्नंज्ञातंउत्पत्तिग्रहणं कारकत्वज्ञापकार्थं अत्रायंभावः इंद्रियंहिनेकद्रव्यात् अर्थेनसहसंबंध्यते इंद्रियार्थसंबंधाच्चज्ञानमुत्पद्यते यदुक्तं आत्मासहेतिमनसामनइंद्रियेणस्वार्थेनचेंद्रियमितिक्रमेणैषशीघ्रः सोऽयंगोऽयमेवमनसः किमगम्यमस्तियस्मिन् मनोव्रजतितत्रगतोयमात्मा ॥१ ज्ञानग्रहणंसुखादिनिवृत्त्यर्थं सुखादीनामज्ञानरूपत्वात् सुखादयोह्यात्मादिस्वभावाभावात्तयाऽनुभूयंते ज्ञानंत्वर्थावगमस्वभावंग्राहकतयाऽनुभूयतेइतिज्ञानसुखाद्योर्भेदोऽध्यक्षसिद्धएव अव्यपदेश्यंनामकल्पनारहितंनामकल्पनायांहिशब्दःस्यात् अव्यपदेश्यपदग्रहणाभावेहिव्यपदेशःशब्दस्तेनेंद्रियार्थसंनिकर्षेणवाभाभ्यांयदुत्पादितं ज्ञानंतदव्यभिचारफलंस्यात् तन्निवृत्त्यर्थमव्यपदेश्यपदोपादानं इदमत्रतत्वंचक्षुर्गोशब्दयोर्व्यापारेसत्ययं गौरितिविशिष्टकालेयज्ज्ञानमुपजायमानमुपलभ्यतेतच्चक्षुरिंद्रियोभयजन्यत्वेपिप्रभू

तविषयत्वेनशब्दप्राधान्यात् शब्दामिष्यते नपुनरध्यक्षमिति इंद्रियजन्यस्यमरीचिपुटकज्ञानस्यशुक्तिशकलकलधौतबोधादेश्चनिवृत्त्यर्थमव्यभिचारिपदोपादानं यदतस्मिंस्तदित्युत्पद्यतेतद्व्यभिचारिज्ञानं तद्यच्छब्देनतस्मिंरूपादिति ज्ञानमव्यभिचारि व्यवसीयते अनेनेति व्यवसायोविशेषउच्यतेविशेषजनितंव्यवसायात्मकं अथवाव्यवसायात्मकं निश्चयात्मकं एतेनसंशयज्ञानमनेकपदार्थालंबनत्वादनिश्चयात्मकत्वाच्चप्रत्यक्षफलं नभवतीतिज्ञापितं नत्वेवमपिज्ञानपदार्थमनर्थकमंत्यविशेषणाभ्यांज्ञानस्यलब्धत्वात् नधर्मिप्रतिपादनार्थत्वादस्यज्ञानपदोपात्तोहिधर्म इंद्रियार्थसंनिकर्षजत्वादिभिर्विशिष्यते अन्यथाधर्म्यभावेह्याद्यव्यभिचारादीन् धर्मान्कस्तदानिंप्रतिपादयेयुः केचित्पुनरेवंव्याचक्षते अव्यपदेश्यं व्यवसायात्मकमितिपदद्वयेननिर्विकल्पकभेदेनप्रत्यक्षस्यद्वैविध्यमाहशेषाणितुज्ञानविशेषणानीति अत्रचसूत्रे फलस्वरूपसामग्रीविशेषणपक्षास्त्रयः संभवंति तेषुस्वरूपविशेषणपक्षोनयुक्तः यथोक्तविशेषणंज्ञानं प्रत्यक्षमितिहितार्थः स्यात् तथाचाकारकस्यज्ञानस्यप्रत्यक्षत्वप्रसक्तिः नचाकारकस्यप्रत्यक्षत्वंयुक्तमसाधकतमत्वात् साधकतमस्यैवप्रमाणत्वात् तुलासुवर्णादीनांप्रदीपादीनांसंनिकर्षेंद्रियादीनांचबोधरूपाणामप्रत्यक्षत्वप्रसंगश्चेष्यतेचैषांसूत्रकृताप्रत्यक्षत्वंतन्नस्वरूपविशेषणपक्षोयुक्तः नापिसामग्रीविशेषणपक्षः सामग्रीविशेषणपक्षेत्वेवंसूत्रार्थस्यात् प्रमातृप्रमेयचक्षुरादींद्रियालोकादिकादिज्ञानजनिकासामग्रीः इंद्रियार्थसंनिकर्षोत्पन्नत्वादिविशेषणविशिष्टज्ञानजननादुपचारेणेंद्रियार्थसंनिकर्षोत्पन्नत्वादिविशेषणविशिष्टा सतीप्रत्यक्षमितिएवंसामग्र्याः सूत्रोपात्तविशेषणयोगित्वं तथाविधफलजनकत्वादुपचारेणैवभवति नमुख्यतइति नयुक्तस्तत्पक्षोपिफलविशेषणपक्षस्तयुक्तिसंगतः अत्रपक्षेयतइत्याध्याहार्यं ततोयमर्थः इंद्रियार्थसंनिकर्षोत्पन्नत्वादिविशेषणं ज्ञानंयतइंद्रियार्थसंनिकर्षादेर्भवति सइंद्रियार्थसंनिकर्षादिः प्रत्यक्षं प्रमाणंज्ञानंतुप्रत्यक्षप्रमाणफलं यदातुततोपिज्ञानात् हानोपादानादिबुद्धयउत्पद्यंते तदाहानादिबुध्यपेक्षयाज्ञानंप्र

माणं हानादिबुद्धयस्तु फलं ॥ यदा ज्ञानं प्रमाणं तदा हानादिबुद्धयः फलमिति वचनात् तथा चानुभवज्ञानवेशजायाः स्मृतेरस्तथा चायमित्येवज्ञानमिंद्रियार्थसंनिकर्षजन्यात्प्रत्यक्षफलं तत्स्मृतेस्तु प्रत्यक्षत सुखदुःखसंबंधस्मृतेश्चेंद्रियार्थसंनिकर्षसहकारित्वात् तथा चायमिति सारूप्यज्ञानजनकत्वेनाध्यक्षप्रमाणता सरूपाज्ञानस्य च सुखसाधनोयमित्यानुमानिकफलजनकत्वेनानुमानप्रमाणतानच सुखसाधनत्वशक्तिज्ञानमिंद्रियार्थसंनिकर्षजं शक्तेरसन्निहितत्वात् आत्ममनोमनइंद्रियेणसंनिकर्षे सुखादिज्ञानफलं मनइंद्रियस्यतत्संनिकर्षस्यचप्रत्यक्षप्रमाणता एवमन्यत्रापियथाईं प्रमाणफलविभागोऽवगंतव्यइति एतदेवेंद्रियार्थसंनिकर्षादि सूत्रग्रंथकारः पश्चबंधानुलोम्येनेत्थमाह इंद्रियार्थसंपर्कोत्पन्नमित्यादि अत्रसंपर्कः संबंधः अव्यभिचारिचेत्यत्र चकारोविशेषणसमुच्चयार्थः अव्यभिचारिकमिति पाठेतु अव्यभिचार्येवाव्यभिचारिकं स्वार्थेकप्रत्ययः व्यपदेशोनामकल्पना अन्यत्रापिव्याख्यायां यतइत्याद्याहार्यभावार्थः सर्वेपिप्रायदर्शनेति अथप्रत्यक्षतत्फलयोरभेदविवक्षयाप्रत्यक्षस्यभेदउच्यते प्रत्यक्षंद्वेधा अयोगिप्रत्यक्षं योगिप्रत्यक्षंच यदस्मदादीनामिंद्रियार्थसंनिकर्षाज्ज्ञानमुत्पद्यते तदयोगिप्रत्यक्षं तदपिद्विविधं सविकल्पकं निर्विकल्पकं च तत्र वस्तुस्वरूपमात्रावभासकं निर्विकल्पकं यथाप्रथमाक्षसंनिपातजं ज्ञानं संज्ञासंज्ञिसंबंधोल्लेखेन ज्ञानोत्पत्तिनिमित्तं सविकल्पकं यथादेवदत्तोयंदंडीत्यादि योगिप्रत्यक्षंतुदेशकालस्वभावविप्रकृष्टार्थग्राहकं तद्द्विविधं युक्तानां प्रत्यक्षंवियुक्तानांच तत्र समाधौकाग्र्यवतां योगजधर्मश्चरादि सहकृतादात्मांतःकरणसंयोगादेव बाह्यार्थसंयोगनिरपेक्षंयदशेषार्थग्रहणं तद्युक्तानांप्रत्यक्षं एतच्चनिर्विकल्पकमेवभवति विकल्पतः समाधैकाग्र्यानुपपत्तेः इदंचात्मकयोगिनएवविज्ञेयं योगिमात्रस्यतदसंभवात् असमाध्यवस्थायांयोगिनोआत्ममनोबाह्येंद्रियरूपाश्रयचतुष्कसंयोगात्रूपादीनांआत्ममनः श्रोत्रत्रयसंयोगाच्छब्दस्य आत्ममनोद्वयसंयोगात्सुखादीनांचयद्ग्रहणं तद्वियुक्तानांप्रत्यक्षंतच्चनिर्विकल्पकं सविकल्पकंचप्रतिपत्तव्यं विस्तरार्थिनानुन्यायसारटीकाविलोकनीयेति अथानुमानल

क्षणमाह अनुमानंतुतत्पूर्वंत्रिविधंभवेत् पूर्ववच्छेषवच्चेवेत्यादि अत्रचेवशब्दोपूर्ववदादीनामथवाद्वयसूचकोऽथशब्दश्चकारार्थः समुच्चयेशेषंतु सूत्रव्याख्यायेवंव्याख्यास्यते सूत्रंत्विदं तत्पूर्वकंत्रिविधमनुमानं तत्पूर्ववत् शेषवत्सामान्यश्रुत्यासुप्तनिर्देशोद्रष्टव्यः तत्पूर्वकमित्यत्रतच्छब्देनप्रत्यक्षप्रमाणमभिसंबध्यते तत्पूर्वकं प्रत्यक्षफलं लिंगज्ञानमित्यर्थः तत्पूर्वकपूर्वकंलिंगिज्ञानं अयमत्रभावः प्रत्यक्षाद्धूमादिज्ञानमुत्पद्यते धूमादिज्ञानाच्चाग्न्यादिज्ञानमितींद्रियार्थसंनिकर्षोत्पन्नत्ववर्जानिचज्ञानादिविशेषणानि प्रत्यक्षसूत्रादत्रापिसंबंधनीयानि एषांचव्यवच्छेद्यानि प्रागुक्तानुसारेणस्वयंपरिभाव्यानितथाद्वितीयलिंगदर्शनपूर्विका याअविनाभावसंबंधस्मृतेस्तत्पूर्वकत्वात्तज्जनकस्यानुमानत्वनिरत्यर्थमर्थोपलब्धिग्रहणंकार्यं स्मृतस्त्वर्थंविनापिभावात् ततोयमर्थः अर्थोपलब्धिरूपमव्यपदेश्यंव्यवसायात्मकंज्ञानंतत्पूर्वकं पूर्वकंयतोलिंगादेः समुपजायते तदनुमानमिति तथातेहप्रत्यक्षे लिंगलिंगिसंबंधदर्शनंलिंगदर्शनंच पूर्वंयस्यतत्तत्पूर्वकमितिवियद्विशेषाश्रयणेनसर्वप्रमाणपूर्वकत्वमप्यनुमानस्यलभ्यते नचतेषांपूर्वमप्रकृतत्वात्कथंतच्छब्देनपरामर्शइतिभेर्यं यतः साक्षादप्रकृतत्वेपिप्रत्यक्षसूत्रेव्यवच्छेद्यत्वेनप्रकृतत्वादिति अस्यांव्याख्यायांनाव्याप्त्यादिदोषः कश्चनापि॥ येतुपूर्वशब्देनैकस्यसुप्तस्यनिर्देशंनाभ्युपगच्छंतितेषांप्रत्यक्षफलेऽनुमानत्वप्रसक्तिरप्रमाणफलस्यप्रत्यक्षप्रमाणपूर्वकत्वात् अथाकारकस्याप्रमाणकत्वात् कारकत्वंलभ्यतेततोयमर्थः अव्यभिचारिताव्यपदेश्यव्यवसायात्मिकार्थोपलब्धिजनकमेधाध्यक्षफलंलिंगज्ञानमनुमानमितिचेत् उच्यते एवमपिविशिष्टज्ञानमेवानुमानंप्रसज्यतेनचज्ञानस्यैवानुमानत्वं स्मृत्यनुमानागमसंशयप्रतिभास्वप्नज्ञानोहाः सुखादिप्रत्यक्षमिच्छादयश्चमनसोलिंगानीतिवचनात्सर्वस्यबोधाबोधरूपस्यविशिष्टफलजनकस्यानुमानत्वादित्यव्याप्तिर्दुरुत्तरदोषअतोऽर्थोपलब्धिरव्यभिचारादिविशेषणविशिष्टतत्पूर्वकपूर्विकायतस्तदनुमानमित्येवव्याख्यानंयुक्तिमत्नन्वत्रापित्रिविधग्रहणमनर्थकमितिचेत् नअनुमानविभागार्थत्वात् पूर्वादिग्रहणंचस्वभावादिविषयप्रतिषे

पेन पूर्ववदादिविषयसामार्थपूर्ववदाद्येवत्रिविधविभागेनविचक्षते नन्वभावादि कमिति प्रथमंव्याख्यानं अपरेत्वेवं सर्वंव्याचक्षते तत्पूर्वकंप्रत्यक्षपूर्वकंत्रिविधमिति त्रिभेदमनुमानंकेपुनर्भेदाइत्याह पूर्ववदित्यादि पूर्वशब्देनान्वयो व्यपदिश्यते व्यतिरेकात्तु प्रागवसीयमानत्वात् पूर्वोन्वयः सएवास्ति यस्यतत्पूर्ववत् केवलान्वय्यनुमानं १ शेषो व्यतिरेकः सएवास्तियस्मिंस्तच्छेषवत् केवलव्यतिरेकि २ सामान्येनान्वयव्यतिरेकयोः साधनांगयोर्यदृष्टं तत्सामान्यतोदृष्टमन्वयव्यतिरेकि चेति ३ अथवात्रिविधमिति त्रिरूपकानित्रीणिरूपाणीत्याह पूर्ववदित्यादि पूर्वमुपादीयमानत्वात् पूर्वपक्षः सोऽस्यास्तीतिपूर्ववत्पक्षधर्मत्वं शेष उपयुक्तादन्यत्वात्साधर्म्यदृष्टांतः सोस्यास्तीतिशेषवत् सपक्षेसत्वं सामान्यतोदृष्टमितिविपक्षेनागपियन्नदृष्टं विपक्षेसर्वत्रासन्वंतृतीयंरूपंच शब्दाद्प्रत्यक्षागमाविरुद्धत्वात् सप्रतिपक्षत्वरूपद्वयंच एवंचपंचरूपलिंगालंबनंयत्तत्पूर्वकंतदन्वयव्यतिरेक्यनुमानं विपक्षासत्वयोरन्यतररूपस्यानभिसंधानुचत्तरूपलिंगालंबनं केवलान्वयि केवलव्यतिरेकिचानुमानं तत्रानित्यः शब्दः कार्यत्वात् घटादिवत्सामान्यादित्यन्वयव्यतिरेकी हेतुः ॥१॥ अदृष्टादीनि कस्यचित् प्रत्यक्षाणि प्रमेयत्वात्करतलादिवदित्यत्रकस्यचित् प्रत्यक्षत्वेसाध्येअप्रत्यक्षस्यकस्यापिवस्तुनो विपक्षस्याभावादेव केवलान्वयी ॥२॥ सर्वविकर्तृपूर्वकं सर्वं कार्यं कदाचित्कत्वात् यत्तुसर्ववित्कर्तृपूर्वकंनभवति तन्नकादाचित्कं यथाकाशादि अत्रसर्वस्यकार्यस्यपक्षीकृतत्वादेवमपक्षाभावात् केवलव्यतिरेकीयथानेदंनिरात्मकंजीवच्छरीरं प्राणादिमत्त्वप्रसंगात्तोष्टवदितिप्रसंगः प्रयोगस्त्विदं इदं जीवच्छरीरं सात्मकं प्राणादिमत्वात् यन्नयात्मकं तन्नप्राणादिमत् यथात्तोष्टमितिप्रसंगपूर्वकः केवलव्यतिरेकी ३ इति एवमनुमानस्यभेदान् स्वरूपंचाव्याख्यायविषयस्यत्रैविध्यप्रतिपादनायेदमाहुः अथवातत्पूर्वकमनुमानंत्रिविधंत्रिप्रकारं केपुनस्त्रयः प्रकारा इत्याह पूर्ववदित्यादि पूर्वकारणंविद्यतेयत्रानुमाने तत्पूर्ववत् यत्रकारणेनकार्यमनुमीयते यथाविशिष्टमेघोत्पन्ना भविष्यदतिवृष्टिरिति अत्रकारणशब्देनकारणधर्म उत्पन्नत्वादि र्याह्यः

प्रयोगस्त्वेवं अमीमेघाः वृष्ट्युत्पादकाः गंभीरगर्जितत्वेः चिरप्रभावत्वेच सत्युन्नत्वात् ये एवंते वृष्ट्युत्पादका यथा दृष्टवृष्ट्युत्पादकपूर्वमेघा स्तथामी तस्मात्तथा नतून्नतत्वादि धर्मयुक्तानामपि मेघाः वृष्ट्यजनकत्वदर्शनात् कथमेकांतिकं कारणात्कार्यमनुमानमिति चेन्नविशिष्टस्योन्नतत्वादेर्धर्मस्यगमकत्वेनविवक्षितत्वात् नचतस्यविशेषोनाऽसर्वज्ञेननिश्चेतुं पर्यते इतियक्तुं शक्यंसरानुमानोच्छेदप्रसक्तेः तथाहि मशकादिकाया रक्तधूमादीनामपि स्वसाध्याव्यभिचारित्वमसर्वविदनिश्चेतुं शक्यमितिवक्तुं शक्यतएव अथसुविवेचितंकार्यं कारणंनव्यभिचरतीतिन्यायाद् धूमादेर्गमकत्वं तन्नत्रापि समानंयोहि भविष्यद्वृष्ट्यव्यभिचारिणमुन्नतत्वादिविशेषमवगंतुंसमर्थः सएवतस्मात्तामनुमिनोति नागृहीतविशेषः तदुक्तं अनुमातुरयमपराधोनानुमानस्येतिविशेषः कार्यंतदस्यास्तितच्छेषवत् यत्रकार्येणकारणमनुमीयते तथा नदीपूरदर्शनाद्वृष्टिः अत्रकार्यशब्देन कार्यधर्मोलिंगमवगंतव्यः प्रयोगस्त्वित्थं उपरिवर्त्तिमहेशसंबंधिनां नदीशीघ्रतरश्रोतस्त्वेफलफेनसमूहकाष्ठादिवहनत्वेचसतिपूर्णत्वात् तदन्यनदीवत् सामान्यतोदृष्टेनाभाः कार्यकारणभूतेनाः विनाभाविनालिंगेनयत्रलिंगिनोः अवगमोयथा बलाकया सलिलस्येतिप्रयोगस्तु अयंबलाकाः ऋजुदृष्टिः प्रदेशोजलत्वात्बलाकावत्वात् संप्रतिपन्नदेशवत् यथाचान्यवृक्षस्योपरिदृष्टस्यादित्यस्यान्यत्रदर्शनं गतेरवगमः प्रयोगः पुनरहेरन्यत्रदर्शनंगत्यविनाभूतं अन्यत्रदर्शनित्वात् देवदत्तान्यत्रदर्शनवत् अत्रयथादेवदत्तादेरन्यत्रदृष्टस्यादन्यत्रदर्शनंप्रत्यापूर्वं तथादित्यस्यापीति अन्यत्रदर्शनंचगतेः कार्यं संयोगादेर्गतिकार्यत्वात् अन्येत्वेवंविर्णयंति समानकालस्य स्पर्शरूपादेः कार्यकारणभूतात्प्रतिपत्तिः सामान्यतोदृष्टानुमानप्रभवा अत्रप्रयोगः ईदृशस्पर्शमिदं वस्त्वमेवंविधरूपत्वात् तदन्यतादृशवस्त्ववत् एकंचूतंपलितं दृष्ट्वापुष्पिताजगति चूताइति प्रतिपत्तिर्वा प्रयोगस्तु पुष्पिताजगतिचूताश्चूतत्वा दृष्टचूतत्वादित्यादि अथवापूर्वेण व्याप्तिग्राहकप्रत्यक्षेण तुल्यंवर्त्ततइति पूर्ववत् संबंधग्राहकप्रत्यक्षेण विषयतुल्यत्वात्कथंचित्परिच्छेदक्रियाया

अपि तुल्यता अनुमाने समर्थनीति क्रियातुल्यत्वेवतेः प्रयोगः सिद्धः तेनपूर्वप्रतिपन्नयानुत्या प्रतिपत्तिर्यतोभवति तत्पूर्व वदनुमानं इच्छादयः परतंत्रागुणत्वाद्रूपादिवदिति शेषवन्नामपरिशेषः सचसप्रसक्तानां प्रतिषेधेन्यत्र प्रसंगासंभवा द्धि षामाणस्यसंप्रत्ययोयथा॥ गुणत्वादिच्छादीनांपारतंत्र्येसिद्धेशरीरादिषुप्रसक्तेषु प्रतिषेधः शरीरविशेषगुणाइच्छा दयोत्रभवंति तद्गुणानांरूपादीनांस्वपरात्मप्रत्यक्षत्वेनेच्छादीनांचस्वात्मप्रत्यक्षत्वेनवेधर्म्यान्नापींद्रियाणांविषयाणां वागुणाउपहनेष्वप्यनुस्मरणदर्शनान्नचान्यस्यप्रसक्तिरस्ति अतःपरिशेषादात्मसिद्धिः प्रयोगश्चात्रयोसौसः स आ त्मशब्दवाच्यइच्छाया धारत्वात् येत्वात्मशब्दवाच्यानभवंतिते इच्छाधारापिनभवंतियथाशरीरादयः अत्रप्रत्यक्षेणाग्र हीत्वाःन्वयंकेवलव्यतिरेककेवलाद्वात्मनः प्रमाणेभवतः फलंयत्रधर्मसाधनधर्मश्चप्रत्यक्षः साध्यधर्मश्चसर्वदाः प्रत्य क्षः साध्यतेतत्सामान्यतोदृष्टं यथेच्छादयः परतंत्रागुणत्वात् रूपवत् उपलब्धिर्वाकारणसाध्याक्रियात्वाद्धिद्रिक्रियाव त् असाधारणकारणपूर्वकंजगद्वैचित्र्यात्क्षित्यादिवैचित्र्यवदित्यादिसामान्यतोदृष्टस्यानेकमुदाहरणंमंतव्यं ननुसा ध्यधर्मस्यसर्वदाप्रत्यक्षत्वेनसाध्येनहेतोः कथंव्याप्तिग्रहणमितिःचेत् उच्यते धर्मिणइच्छादेः प्रत्यक्षप्रतिपन्नत्वगुण त्वकार्यत्वादेरपिसाधनस्यतद्धर्मत्वंप्रतिपन्नमेवपारतंत्र्येणस्वसाध्येनतस्यव्याप्तिरध्यक्षतोरूपादिष्वगलेवसा ध्यव्यावृत्तासाधनव्यावृत्तिरपिप्रमाणांतरादेवावगता॥ नन्वेवंपूर्ववच्छेषवत्सामान्यतोदृष्टानां परस्परः कोविशेष उच्यते इच्छादेःपारतंत्र्यमात्रप्रतिपत्तौगुणत्वंकार्यत्वंवापूर्ववत् तदेवाश्रयांतरबाधयाविशिष्टाश्रयत्वेनबाधके नप्रमाणेनाधशीयमानंशेषवतः फलंतस्यसाध्यंधर्मस्यर धर्म्यंतरेप्रत्यक्षत्वापितत्रधर्मिणिसर्वदाप्रत्यक्षत्वंसामा न्यतोदृष्टव्यपदेशभिबंधनमतस्त्रयाणामेकमेवोदाहरणं तदेवकारणादिभेदेनत्रिविधात्रिप्रकारंलिंगं प्रमितिजनयत्तत्पूर्व कं मदनुमानमितिद्वितीयंव्याख्यानंचात्रव्याख्यातृभेदेप्रथमव्याख्यानमेवबहूनामध्ययनप्रभृतीनामभिमतंतत्रचपूर्ववदा दीनांव्याख्याद्वितीयव्याख्यानेयाचतुःप्रकाराःभिहितास्तेवदृष्टव्येति अथशास्त्रकारएवबालानामसंमोहार्थंशेषव्या

ख्या प्रकाशनुपेक्ष्यानुमानस्यत्रिविधस्यविषयज्ञापनायपूर्ववदादीनिपदानिव्याख्यानयन्नाह तत्रात्यामित्यादि तत्रते षु पूर्ववदादिषु आद्यंपूर्ववदनुमानं किमित्याह कारणाद्धिंगात्कार्यस्यलिंगिनोऽनुमानं ज्ञानंकार्यानुमानं इहानुमान प्रस्तावेगीयतेप्राच्यते कारणात्कार्यमनुमानमितिहोदितमितिपाठोवा तत्रास्तीतिशब्दाध्याहारेकारणात्कार्यमस्तीत्यनुमानं कारणात्कार्यमस्तीतिज्ञानमितिहानुमानप्रस्तावेउदितंप्रोक्तं पाठद्वयेव्यत्रयद्धिंगिज्ञानमनुमानशब्देनोक्तं तद्द्वितीयव्याख्या नकारिणांमतेननुप्रथमव्याख्यानकर्तृमतेनप्रथमव्याख्याकारिमतेनहिज्ञानस्यहेतुरेवानुमानशब्दवाच्यःस्यात् एवं शेषवत्यपिज्ञेयंयत्कारणात् स्वज्ञानविशिष्टात्कार्यस्यज्ञानंभवति तत्पूर्ववदनुमानं अत्रहिअर्थोपलब्धिहे तुः प्रमाणमितिवचनात् कार्यज्ञानमनुमानस्यफलं तद्धेतुस्त्वनुमानं प्रमाणंतेनात्रकारणंवालज्ञानं वाकारणप्रतिबंध स्मरणंवाकार्यंज्ञापयत्पूर्ववदनुमिति १७।१८।१९ तस्योदाहरणमाह ॥ यथा रोलंबगवलव्यालतमालमलिनविषः॥ सृष्टिंयभिचरंतीह नैवंभायाः पयोमुचः॥२०॥ यथेतिनिदर्शनदर्शनार्थः रोलंःभ्रमराः गवलाअरण्यजातमहिषाः व्यालादुष्टगजाः सर्पश्चितमालाः तापिंछदक्षस्तद्वत् मलिनाः श्यामलाविषः कांतयोयेषांतेतथाएतेनमेघानांकांतिमत्त्वाद्वचनेनानिर्वचनीयाकाप्यतिशयश्यामताव्यज्यते एवंभायाः एवंशब्दइदंप्रकारवचनः प्रायशब्दोबाहुल्यवाचकः ततएवं इदंप्रकाराणांप्रायोबाहुल्यंयेषु तेएवंप्रायाइदंप्रकारबाहुल्याइत्यर्थः एतेनगंभीरगर्जितत्वाच्चिरप्रभावत्वादिप्र काराणां बाहुल्यंमेघेषुसत्सूचितं उक्तविशेषणविशिष्टमेघाइहजनेदृष्टिंनव्यभिचरंतिदृष्टिकाराभवंतीत्यर्थः प्रयोगस्तुसूत्रव्याख्यावसरोक्त एवात्रापिवक्तव्यः॥२०॥अथशेषवद्व्याख्यामाह ॥ कार्यात्कारणानुमानं यच्चतच्छेषव न्मतं तथाविधनदीपूरान्मेघोदयोयथोपरि ॥२१॥ ॥ कार्याद्धिंगात्कारणस्यलिंगिनोऽनुमानं ज्ञानंयत्तच्चकारः प्रा गुक्तपूर्ववदपेक्षयासमुच्चयेतच्छेषवन्मतं अर्थमत्रतत्त्वार्थः यत्रकार्यात्कारणज्ञानं भवतितच्छेषवदनुमानं अत्रापिप्राग्वत्कारणज्ञानस्यहेतुः कार्यंकार्यदर्शनंतत्संबंधस्मरणंवाऽनुमानशब्देनप्रतिपत्तव्यं यथेत्युदाहरणेपन्यासार्थः

प्रथममत्रयोज्यः तथाविधः शीघ्रतरभोजनस्त्रफलफेनादिवहनत्वोभयत्रव्यापिनधर्मविशिष्टोयोनदीपूरस्तस्मिंगा दु
परिदेशेदृष्टोमेघोवृष्टइति ज्ञानं अत्रप्रयोगः भाग्वत्॥२१॥यत्त्वसामान्यतोदृष्टंतदेवं गतिपूर्विका ॥ पुंसिदेशांतरप्राप्ति
र्यथासूर्येपिगतथा ॥२२॥ यः पुनरर्थेयत्पुनःकार्यकारणभावात्रान्यत्र सामान्यतोऽविनाभावबलेनदृष्टंलिंगंसामान्य
तोदृष्टंतदेवंकथमित्याह यथापुंसिएकस्माद्देशाद्देशांतरप्राप्तिर्गतिपूर्विका तथासूर्येपिसादेशांतरप्राप्तिरतथागति
पूर्विका अत्रदेशांतरप्राप्तिशब्देनदेशांतरदर्शनंज्ञेयं अन्यथादेशांतरप्राप्तेर्गतिकार्यत्वेनशेषवतोऽनुमानादस्यभेदो
नस्यात् यद्यपिगगनेसंचरतःसूर्यस्यनेत्रावलोकप्रसराभावेनगतिर्नोपलभ्यते तथाप्युदयाचलात्कालांतरेऽस्ताच
लिकादौतद्दर्शनंगतिंगमयतिप्रयोगः पुनः पूर्वमुक्तएव अथवादेशांतरप्राप्तिर्गतिकार्यत्वंलोकोनभ्येतीति इदमु
दाहरणंकार्यकारणभावविवक्षयाऽनुपन्यस्तंएतत्प्रयोगस्त्वेवंसूर्यस्य देशांतरप्राप्तिर्गतिपूर्विका देशांतरप्राप्तित्वदे
वदत्तदेशांतरप्राप्तिवत्॥२२॥उपमानलक्षणमाह॥ प्रसिद्धस्यसाधर्म्यात्साध्यसाधनं ॥ उपमानंसमाख्यानंयथागो
र्गवयस्तथा ॥२३॥ प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानमिति सूत्रं अत्रयत्तद्इत्याध्याहार्यं तत्रश्वप्रसिद्धेनवरुणा
गथायत्साधर्म्यसमानधर्मत्वंतस्मात्प्रसिद्धस्यसाधर्म्यात्प्रसिद्धस्थगतयागतस्यसाध्यस्यसंज्ञासंज्ञिसंबंधस्यसाध
नंप्रतिपत्तिर्यतः साधर्म्यज्ञानाद्भवतितदुपमानं समाख्यातंसाधर्म्यस्यचप्रसिद्धिरागमपूर्विका तत आगमनसंसूच
नायाह यथागोस्तथागवयइतिगवयोरण्यगवः अयमत्रभावः कश्चित्प्रभुणागवयानयनायप्रेषितस्तदर्थमजाना
नस्तमेवापृच्छीत् कीदृग्गवयइति सप्रोचेयादृग्गोस्तादृग्गवयइति ततःसोऽरण्येऽपरिभ्रमन्तंसमानमर्थंयदापश्य
ति तदातस्यतद्वाक्यार्थस्मृतिसहायेंद्रियार्थसंनिकर्षाद्गोसदृशोयमिति यत्सारूप्यज्ञानमुत्पद्यते तत्प्रत्यक्षफ
लं तदेवाभिचार्यादिविशेषणमयं सगवयशब्दवाच्यइतिसंज्ञासंज्ञिसंबंधप्रतिपत्तिंजनयेत् उपमानं संज्ञासं
ज्ञिसंबंधप्रतिपत्तिस्तूपमानस्यफलं नपुनरागमिकीसाशब्दस्यतज्जनकस्यतदानीमभावात् गवयपिंडविषयेचहे

DR. SHAU DAJI MEMORIAL
डाक्टर भाऊदाजी स्मारक समारकम्

यादिज्ञानंयदुत्पद्यते तेनेंद्रियार्थसंनिकर्षजन्यत्वात्तत्प्रत्यक्षफलं॥२३॥अथचतुर्थंशाब्दमाह॥ शाब्दमाप्तोपदेशस्तुमान
मेवंचतुर्विधं॥ प्रमेयंत्वात्मदेहार्थंबुद्धींद्रियसुखानिच॥२४॥ शब्दजनितंशाब्दमागमइत्यर्थः नुर्भिन्नक्रमेशाब्दंतुप्र
माणमाप्तोपदेशः आप्तएकांतेनास्यादहितश्चतस्योपदेशोवचनमाप्तोपदेशः तज्जनितंतुज्ञानं शाब्दस्यफलंमानंप्र
माणमेवमुक्तविधिनाचतुर्विधं॥तदेवंप्रथमंप्रमाणंतल्व्याख्यायसंप्रतिद्वितीयंप्रमेयतत्वंव्याख्यातुमाह॥प्रमेयंत्वा
त्मदेहार्थंप्रमेयंतुप्रमाणफलस्यात्यंपुनरात्मदेहार्थंआत्माजीवः देहोवपुः तावार्थौयस्यतदात्मदेहार्थंबुद्धींद्रियसु
खादिचप्रमेयंबुद्धिर्ज्ञानंइंद्रियंचक्षुरादिमनःपर्यंतं सुखंसातंतान्यादिर्यस्यतद्बुद्धींद्रियसुखादिचकारआत्म
देहार्थापेक्षयासमुच्चयेऽविशेषणद्वयेआद्यशब्देनआदिशब्देनचशेषाणामपिसप्तानांप्रमेयानांसंग्रहोद्रष्टव्यः
तथाचनैयायिकसूत्रंतच्चात्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गभेदेनद्वादशविधंत
दितिप्रमेयंतत्रशरीरादिदुःखज्ञानादीनामाश्रय आत्मासचेतनत्वकर्तृत्वसर्वगतत्वादिधर्मैरात्माप्रतीयते॥१॥तद्भो
गायतनंशरीरं२पंचेंद्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्राणि३पंचार्थाः रूपरसगंधस्पर्शशब्दाः तत्रगंधरसरू
पस्पर्शाश्चत्वारः पृथिवीगुणाः रूपरसस्पर्शास्त्रयोऽपांगुणाः रूपस्पर्शौतेजसोगुणोएकः स्पर्शोवायोर्गुणः श
ब्दआकाशस्यगुणइति ४ बुद्धिरुपलब्धिर्ज्ञानमित्यर्थः सास्वाणिकाभोगस्वभावत्वाच्चसंसारकारणमितिहेयाः
इंद्रियार्थसन्निकर्षेसत्यपियुगपज्ज्ञानानुत्पादात् आंतरसुखादिविषयोपलब्धेश्चबाह्यगंधादिविषयोपलब्धि
प्रतिकरणसाध्यत्वादेतत्करणंमनोऽनुमीयते तत्सर्वविषयंतच्चाणुवेगवदात्मसंचारिनित्यंच ९ प्रयत्नेनः कायव्या
पारः १० धर्माधर्मफलः प्रवृत्तिः ७ रागद्वेषमोहास्त्रयोदोषाः ईर्ष्यादीनामेतेष्वेवांतर्भावः तत्सताश्चैषसंसारः ८ देहेंद्रि
यादिसंघातस्यात्मनस्त्यागेनसंघातांतरग्रहणंप्रेत्यभावः एषएवसंसारः ९ प्रवृत्तिदोषजनितं सुखदुःखात्मकं
मुख्यंफलं तत्साधनंतुगौणं १० पीडासंतापस्वभावंदुःखंफलग्रहणेनाक्षिप्तमपीदं सुखस्यापिदुःखानुषंगाभावित्वात्

दुःखत्वभावनार्थमुपदिश्यते ११ आत्यंतिकोदुःखवियोगोऽपवर्गः सर्वगुणविमुक्तस्यात्मनःस्वरूपेणावस्थानंसुखदुःखयो र्विवेकेनहानस्याशक्यत्वात् दुःखंजिहासुःसुखमपिजत्यात्यस्माज्जन्मजरामरणप्रबंधोच्छेदरूपःपरमः पुरुषार्थोपव र्गः सचतत्त्वज्ञानादवाप्यते १२ ७॥२५॥संशयप्रयोजनयोःस्वरूपंप्राहकिमेतदितिसंदिग्धः प्रत्ययः संशयोमतःप्रवर्त तेयदर्थित्वात्तत्तुसाध्यंप्रयोजनं॥२५॥ टीका॥ अथकिंशब्देक्षिप्तेपेकिंसखायोभिहृयंति अस्तिप्रश्नेकिंतेप्रियं अस्ति निवारणेकिंतेरुदितेरुदितेन अस्त्यनुनयेकिंतेहंकरोमि अस्त्यज्ञानेकस्त्वमुत्थापयते अ स्मिन्वितर्केकिमेतद्दूरेदृश्यते इहतुवितर्केदूरावलोकनेनपदार्थसामान्यमवबुध्यमानस्तद्विशेषंसंदिहानोवितर्कयि ति एतत्प्रत्यक्षमुर्ध्वस्थितंवस्तुकिंवितर्केस्थाणुर्वापुरुषोवेतियः संदिग्धोऽनेककोटिपरामर्शप्रत्ययोविमर्शःसत्सं शयोमतः संमतइति २ प्रथमप्रयोजनंयदर्थित्वात् यस्यफलस्यार्थित्वमभिलाषुकत्वंयदर्थित्वंतस्मात्प्रवर्ततेत त्तदीयसाधनेषुयत्नंकुरुते तत्तुतत्पुनः साध्यंकर्त्तव्यतयेष्टंप्रयोजनंफलंयस्यधीश्चाकृत्येषुप्रवर्त्तते तत्प्रयोजन मित्यर्थः प्रयोजनमूलत्वाच्चप्रमाणोपन्यासस्यतेः प्रमेयांतर्भूतमपिप्रयोजनंपृथगुपदिश्यते॥३॥२५॥अथदृष्टांत सिद्धांतावाचिख्यासुराह ॥दृष्टांतस्तुभवेद्देवविवादविषयोनयः ॥ सिद्धांतस्तुचतुर्भेदः सर्वतंत्रादिभेदतः ॥२६॥ दृष्टो ऽतोनिश्चयोऽनेदृष्टांतः पुनरेषोयंभवेत् एषकस्त्याह यउपन्यस्तः सन् विवादविषयोवादिप्रतिवादिनोर्मिथोवि रुद्धोवादोविवादस्तस्यविषयोगोचरोभवति वादिप्रतिवादिनोरुभयोः संमतएवानुमानादेर्दृष्टांतउपन्यस्तिव्य इत्यर्थः पंचस्वयवेषूक्ष्यमाणेषुदृष्टांतः साध्यसाधनधर्मयोः प्रतिबंधग्रहणस्थानमितिपृथगिहोपदिश्यते तावद देवत्यन्वयव्यतिरेकयुक्तोऽर्थः स्वलक्षणयावन्नंस्पष्टदृष्टांतावष्टंभः उक्तंच तावदेवचलत्यर्थो मंतार्यिषयमागतः यावन्नोत्तंभवेन्नेवदृष्टांतेनावलंब्यते १ सिद्धांतस्तुसिद्धांतः पुनश्चतुर्भेदो भवेत् कुतइत्याह सर्वतंत्रादि भेदतः सर्वतंत्रादिभेदेन प्रथमः सर्वतंत्रसिद्धांतः आदिशब्दात् प्रतितंत्रसिद्धांतोऽधिकरणसिद्धांतोभ्युपगमसिद्धांतश्चवे

दितव्यः इहतंत्रशब्देनशास्त्रंविज्ञेयंतत्सर्वतंत्राविरुद्धः स्वतंत्रोऽधिकृतोऽर्थः सर्वतंत्रसिद्धांतः सर्वेषांशास्त्राणां सं प्रतिपत्तिविषयोयथा प्रमाणान्यप्रमेयसाधनानिघ्राणादीनींद्रियाणि गंधादयस्तदर्थाः प्रमाणेनप्रमेयस्यपरिच्छेद इत्यादि समानतंत्रप्रसिद्धः प्रतितंत्रसिद्धांतोयथा भौतिकानींद्रियाणि योगानांकाणादीनांच अभौतिकानिसांख्यानां तथासंख्यानांसर्वदेवोत्पद्यतेनपुनरमद्देनैयायिकादीनांसर्वमस्मदेवोत्पद्यते सामग्रीवशाच्चैतानांनुसदमदुत्पद्यतइ त्यादि २ यस्यसिद्धावन्यस्यप्रक्रियमाणस्यप्रतिज्ञार्थस्यप्रसंगेनाधिकस्यसिद्धिः सोऽधिकरणसिद्धांतोयथाकार्य त्वादेः शिल्पादेर्बुद्धिमत्कारणसामान्यस्यतत्करणसमर्थस्यनित्यज्ञानेच्छाप्रयत्नाधारस्यतत्करणसिद्धिरिति ३ भौद त्वादिभिः सुबुत्पत्तिशयविख्यापयिषयायत्किंचिदुक्तमपरीक्षितमभ्युपगम्यविशेषः परीक्ष्यतेसाभ्युपगमसिद्धांतो यथाऽस्तिद्रव्यंशब्दः सनुकिंनित्योऽनित्योवेतिशब्दस्यनित्यद्रव्यत्वमनिष्टमभ्युपगम्यानित्यत्वविशेषः परीक्ष्यतेएवं चतुर्विधःसिद्धांतः ४॥६॥२६॥अवयवादितत्त्वयरूपंनरूपयति॥ प्रतिज्ञाहेतुदृष्टांतोपनयानिगमस्तथा॥ अव यवाः पंचतर्कः संदेहोपरमेभवेत् ॥२७॥ यथाकाकादिसंपातस्थाणुनाभाव्यमत्रहि ॥ ऊर्ध्वसंदेहतर्कीभ्यां प्रत्ययोनिर्ण योमतः॥२८॥ युग्मं॥ अवयवाःपंचकेपंचेत्याह प्रतिज्ञांहेतुर्दृष्टांतउपनयोनिगमशब्देननिगमनंचेति तत्रप्रतिज्ञा पक्षोधर्मधर्मिवचनंऽशानुमानयं सानुमानित्यादि हेतुःसाधनंलिंगवचनं धूमवत्त्वादित्यादि दृष्टांतउदाहरणा भिधानं तद्विविधं अन्वयमुखेनव्यतिरेकमुखेनच अन्वयमुखेनयथा योयोधूमवान् ससऽशानुमानयथा महानसमित्यादि व्यतिरेकमुखेनयथा योयःऽशानुमान्नभवति ससधूमवान्नभवति यथाजलमित्यादि उ पनयोहेतूपसंहारकंवचनं धूमवांश्चायमित्यादि निगमनंहेतूपदेशेनसाध्यधर्मोपसंहरणं ५ मत्वर्थात् ऽशानुमान यमित्यादि ७ अथतर्कस्तत्त्वंतर्कः संदेहोपरमेभवेत् सम्यगवस्तुस्वरूपानवबोधेकिमयंस्थाणुर्वापुरुषोवेति संदेहः संशयस्तस्योपरमेतर्कोऽन्वयधर्मान्वेषणरूपोभवेत् कथमित्याह यथाकाकादीत्यादि यथेत्युपदर्शनेका

कादि संपातात् वायसप्रभृतिपक्षिसंपातनादुपलक्षणत्वात् निश्चलत्ववत्त्या रोहणादिस्थाणुधर्मेभ्यश्चारण्यप्रदेशे स्थाणूनां कीलकेनाभ्यं भवितव्यंहि शब्दो ऽनिश्चयो ऽपेक्षणार्थो द्रव्यः संप्रतिहिवने ऽमानवत्त्यासंभवात् स्थाणुधर्माणमेवदर्शनाच्च स्थाणुरेवाय घटते इतिदुक्तं अरिण्यमेतत्सवितारुमागनोनचाधुनासंभवतीहमानवः भुवंतदेतेनरवगादिभाजा—अंस्मरातिसमाननाम्ना १ इत्येषतर्कः ८ अथनिर्णयतत्त्वमाह ऊर्ध्वमित्यादि पूर्वोक्तस्वरूपाभ्यां संदेहतर्काभ्यां मूर्द्धमभंतरंयः प्रत्ययः स्थाणुरेवायं पुरुष एववेतिप्रतीतिः सनिर्णयोनिश्चयोमतोऽभीष्टः यत्तदर्थसंबंधादनुक्तावपिकचनगम्येते तेनात्रतोव्याख्यातोएवमन्यत्रापिमंतव्यं ९॥२७॥२८॥ अथवादतत्त्वमाह॥ आचार्यशिष्ययोः पक्षप्रतिपक्षपरिग्रहात् ॥ याकथाभ्यासहेतुःस्यादसौवादउदाहृतः॥ २९॥ वादिप्रतिवादिनोः पक्षप्रतिपक्षपरिग्रहः कथासा हि द्विधावीतरागकथाविजिगीषुकथाच यत्रवीतरागेण गुरुणा सहशिष्यस्तत्त्वनिर्णयार्थं साधनोपालंभोकरोतिसाधनंस्वपक्षेउपालंभश्चपरपक्षेऽनुमानस्यदूषणं सावीतरागकथावादसंज्ञो वेदितव्यो वादंप्रतिपक्षस्थापनाहीनमपिकुर्यात्प्रश्नद्वारेणैवयत्रजिगीषुर्जिगीषुणासहलाभपूजाख्यातिकामोजयपराजयार्थंप्रवर्त्तते वीतरागोवापरानुग्रहार्थंज्ञानांकुरसंरक्षणार्थंप्रवर्त्तते सान्वनुरंगावादिप्रतिवादिसभापतिप्राश्निकांगाविजिगीषुकथाजल्पवितंडासंज्ञोक्ता तथाचोक्तं तत्त्वाध्यवसायसंरक्षणार्थंजल्पवितंडेबीजप्ररोहसंरक्षणार्थंकंटकशाखापरिचरणवदिति यथोक्तलक्षणोपपन्नछलजातिनिग्रहस्थानेसाधनोपालंभोजल्पः सप्रतिपक्षस्थापनाहीनोवितंडेतिवादजल्पवितंडानांव्यक्तिः अथप्रकृतं प्रस्तुमः आचार्योऽध्यापकोगुरुः शिष्योऽध्येताविनेयः तयोराचार्यशिष्ययोः पक्षप्रतिपक्षपरिग्रहात् पक्षः पूर्वपक्षः प्रतिज्ञादिसंग्रहः प्रतिपक्षउत्तरपक्षः पूर्वपक्षप्रतिपक्षइत्यर्थः तयोः परिग्रहात्स्वीकारात् अभ्यासस्यहेतुरभ्यासकारणं याकथा प्रामाणिकीवार्त्ता असौकथावादउदाहृतःकीर्तितः आचार्यः पूर्वपक्षंस्वीकृत्याचष्टेशिष्यश्चोत्तरपक्षमुररीकृत्यपूर्वपक्षंखंडयसिएवंपक्षप्रतिपक्षसंग्रहेणनिग्राहकसभापतिजयपराजयछलजात्या

यनपेक्षतयाभ्यासार्थंयत्रगुरुशिष्योगोष्ठींकुरुतः सवादोविज्ञेयः १०॥२९॥अथजल्पवितंडेविवृणोति॥ विजिगीषुकथायातुछलजात्यादिदूषणा॥ सजल्पःसावितंडानुयाप्रतिपक्षवर्जिता॥३०॥ यानुयापुनर्विजिगीषुकथाविजयाभिलाषिभ्यांप्रारब्धाप्रमाणगोष्ठी कथंभूता छलानि जातयश्च वक्ष्यमाणलक्षणानि आदिशब्दान्निग्रहस्थानादिपरिग्रहः एतैः कृत्वादूषणं परोपन्यस्तपक्षादेर्दोषोद्भावनंयस्यांसा छलजात्यादिदूषणासविजिगीषुकथारूपोजल्प उदाहृतइति सर्वश्लोकात्संबंधनीयं ननु छलजात्यादिभिः परपक्षादेर्दूषणोद्भावनंसतांकर्तुंनयुक्तमितिचेन्नसन्मार्गप्रतिपत्तिनिमित्तंतस्याभ्यनुज्ञातत्वात् अनुज्ञातंहि स्वपक्षस्थापनेनसन्मार्गप्रतिपत्तिनिमित्तया छलजात्यायुपन्यासेरपिपरप्रयोगस्यदूषणोद्भावनंतथाचोक्तं कुशिक्षितकुतर्कौशलेशवाचालितानना: शक्याः किमन्यथाजेतुं वितंडाटोपपंडिताः॥१ गतानुगतिकोलोकः कुमार्गतत्प्रसारितः मागादितिछलादीनि प्राहकारुणिकोमुनिः २ इतिसंकटेप्रस्तावेत्वसतिछलादिभिरपिस्वपक्षस्थापनमनुमतंपरविजयेहिनधर्मध्वंसादिदोषसंभवस्तस्माद्दूरंछलादिभिरपिजयः॥३॥ सावितंडात्यादि तुशब्दोऽवधारणार्थोभिन्नक्रमश्च सानुसेवविजिगीषुकथैवंप्रतिपक्षविवर्जितावादिप्रयुक्तपक्षप्रतिपंथीप्रतिषायुपन्यासः प्रतिपक्षस्तेनविवर्जितारहिताप्रतिपक्षसाधनाहीनेत्यर्थः वितंडोदाहृतावेतंहि कोहिस्वाभ्युपगतपक्षमस्थापयन् यत्किंचिद्धादेनपरोक्तमेवदूषयतीत्यर्थः २ ॥३०॥ अथहेत्वाभासादित्तत्र यस्वरूपंप्रकटयति॥ हेत्वाभासाअमिद्धाद्याश्चलंकूपीनवोदकं॥४ जातयोदूषणाभासाःपक्षादिदूषनेनयैः॥३१॥॥ असिद्धाद्या असिद्धविरुद्धानैकांतिककालात्ययापदिष्टप्रकरणसमाः पंचहेत्वाभासाः तत्रपक्षधर्मत्वंयस्यनास्ति सोऽसिद्धः अनित्यशब्दश्चाक्षुषत्वादिति १ सविपक्षेसन्सपक्षेचासन्विरुद्धः नित्यःशब्दः कार्यत्वादिति पक्षादिव यद्यनित्यश्चैवैकांतिकः अनित्यः शब्दः प्रमेयत्वादिति ३ हेतोः प्रयोगकालः प्रत्यक्षागमानुपहतपक्षपरिग्रहसमयस्तमतीत्यापदिष्टः प्रयुक्तः प्रत्यक्षागमविरुद्धेपक्षेवर्त्तमानइत्यर्थः हेतुः कालात्ययापदिष्टः अनुष्णोऽग्निः कृतकत्वात्

ब्राह्मणेन सुरापेयाद्रवद्रव्यत्वात् क्षीरवदिति ४ स्वपक्षसिद्धावेव परपक्षसिद्धावपि निरूपणे हेतुः प्रकरणसमः प्रकरणेपक्षं प्रतिपक्षेवतुल्यइत्यर्थः अनित्यशब्दः पक्षसपक्षयोरन्यतरत्वात् सपक्षवत् इत्येकेनोक्ते द्वितीयः प्राह यत्नेन प्रकारेणा नित्यत्वं साध्यते तर्हि नित्यसिद्धिरस्तु यथा नित्यः शब्दः पक्षसपक्षयोरन्यतरत्वात् सपक्षवदिति अथवा अ नित्यः शब्दो नित्यधर्मानुपलब्धेः पटवत् नित्यः शब्दो नित्यधर्मानुपलब्धेराकाशवदिति नचैतेष्वन्यतरदपि साध नं बलीयोयदितरस्य बाधकमुच्यते ५ निर्यहस्थानांतर्गताभ्यर्थीहेत्वाभासान्यायप्रविवेकं कुर्वतोवादे वस्तुशक्तिं वि दधतीतिपृथगुच्यते १३ छलंकुपोनवोदकइतिपरोपन्यस्तवादेस्वाभिमतकल्पनया वचनविघात श्छलं तच्चिवि धं वाक्छलंसामान्यछलमुपचारछलंचपरोक्तेऽर्थांतरकल्पनावाक्छलंयथानव्यः कंबलोस्त्यभिप्रायेणनवकंब लोमाणवकइत्युक्तेछलवादाह कुतोऽस्यनवसंख्याः कंबलाः इति १ संभावनयाऽतिप्रसंगिनोपिसामान्यस्योपन्या सेहेतुत्वारोपणेननिषेधः सामान्यछलंयथा अहोनवत्वात्सोब्राह्मणोविद्याचरणसंपन्नइति ब्राह्मणस्तुतिप्रसं गेकश्चिदाहेति संभवतिब्राह्मणेविद्याचरणसंपदितिछलवादी ब्राह्मणत्वस्यहेतुत्वमाशंक्यनिराकुर्वन्नभियुंक्ते व्रात्ये नानैकांतिकमेतत् यदिहि ब्राह्मणेविद्याचरणसंपद्भवति तदाव्रात्येपिसाभवेत् व्रात्योपि ब्राह्मणएवेति २ उपचारि केप्रयोगेमुख्यार्थकल्पनयाप्रतिषेध उपचारछलंयथा मंचाः क्रोशंतीत्युक्तेछलवादाह मंचस्थाः पुरुषाः क्रोशंति नमंचास्तेषामचेतनत्वादिति ३ अथग्रंथकृछलंव्याचिख्यासुरायस्यवाक्छलस्योदाहरणमाह कूपोनवोदकइति नूतनार्थनवशब्दस्यप्रयोगेसतेछलवादीदूषयति कुतएकएवकूपोनवसंख्योदकइति अनेनशेषछलद्वयोदा हरणेअपिरुचितेद्रष्टव्येइति १४ जातयइत्यादिदूषणाभासाजातयः अदूषणाएवदूषणवदाभासंते इतिदूष णाभासाः येःपक्षादिःपक्षहेत्वादिर्नदूष्यते आभासमात्रत्वान्नदूषयितुं शक्यते केवलंसम्यग्हेतौ हेत्वाभासे वा वादिनाप्रयुक्तेतगितितद्दोषत्वाप्रतिभासेहेतुप्रतिवादेनप्रायं किमपिप्रत्यवस्थानंजातिः साचतुर्विंशतिभेदा

साधर्म्यादिप्रत्यवस्थानभेदेन यथा साधर्म्यं १ वैधर्म्य २ उत्कर्ष ३ अपकर्ष ४ वर्ण्य ५ अवर्ण्य ६ विकल्प ७ साध्य८ प्राप्ति ९ अप्राप्ति १० प्रसंग ११ प्रतिदृष्टांत १२ अनुत्पत्ति १३ संशय १४ प्रकरण १५ अहेतु १६ अर्थापत्ति १७ अ विशेष १८ उपपत्ति १९ उपलब्धि २० अनुपलब्धि २१ नित्य २२ अनित्य २३ कार्यसमाः २४ तत्रसाधर्म्येणप्रत्य वस्थानंसाधर्म्यसमाजातिर्भवति अनित्यः शब्दः कृतकत्वात् घटवदिति प्रयोगेकृतेसाधर्म्यप्रयोगेणैवप्रत्यवस्था नं यथानित्यघटसाधर्म्यात्कृतकत्वादनित्यःशब्दइष्यतेतर्हिनित्याकाशसाधर्म्यादमूर्त्तत्वान्नित्यः प्राप्नोतीति १ वैधर्म्य णप्रत्यवस्थानंवैधर्म्यसमाजातिः अनित्यः शब्दः कृतकत्वाद्घटवदित्यत्रैवप्रयोगेवैधर्म्येणैवप्रत्यवस्थानं नित्यः शब्दोऽमूर्त्तत्वात् अनित्यंहिमूर्त्तद्रव्यं यथाघटादीति यदिहिनित्याकाशंवैधर्म्यात्कृतकत्वादनित्यइष्यतेतर्हिघटा यंनित्यवैधर्म्यादमूर्त्तत्वान्नित्यः प्राप्नोतिविशेषाभावादिति २ उत्कर्षापकर्षाभ्यांप्रत्यवस्थानमुत्कर्षापकर्ष समेजातीभवतः तत्रैवप्रयोगेदृष्टांतसाधर्म्यंकिंचित्साध्यधर्मिण्यापादयन्नुत्कर्षसमांजातिंप्रयुंक्ते यदिघटवत्कृ तकत्वादनित्यःशब्दस्तर्हिघटवदेवमूर्त्तोपिभवेन्नचेन्मूर्त्तोघटवदनित्योपिमाभूदितिशब्दे धर्मांतरोत्कर्षमापा दयति ३ अपकर्षस्तुघटः कृतकः सन्नश्रावणोदृष्टः एवंशब्दोपिभवतु नोचेद्घटवन्नित्योपिमाभूदितिशब्देश्राव णत्वमपकर्षति ४ वर्ण्यावर्ण्याभ्यांप्रत्यवस्थानंवर्ण्यावर्ण्यसमेजातीभवतः ख्यापनीयोवर्ण्यःकृतहेतोः वर्ण्यस्तावेतावर्ण्यावर्ण्यौ साध्यदृष्टांतधर्मौविपर्ययेणवर्ण्यावर्ण्यसमेजातीप्रयुंक्ते यथाविधः शब्दधर्मः कृ तत्वादिर्नतादृग्घटधर्मोयादृग्शब्दधर्मइतिसाध्यधर्मोदृष्टांतधर्मश्चतुल्यौ कर्त्तव्यौ अत्रतुविपर्यासःयतोया दृग्घटधर्मः कृतकत्वादिर्नित्यत्वादृग्शब्दधर्मः घटस्यह्यन्यदृशंकुंभकारादिजन्यं कृतकत्वं शब्दस्यहितत्वेष्टा दिव्यापारजन्यमिति ५ धर्मांतरविकल्पेनप्रत्यवस्थानंविकल्पसमाजातिः यथाकृतकंकिंचिन्मृद्घटेनल भ्यादिकंचिच्चकठिनंकुटादिनवंकृतकंकिंचिदनित्यंभविष्यतिघटादिकंकिंचिच्च नित्येशब्दादीति ७ साध्यसाम्या

पादनेनप्रत्यवस्थानं साध्यसमा जातिः यदि यथाघटस्तथा शब्दः प्राप्तस्तर्हि यथाशब्दस्तथाघट इति शब्दश्चसाध्य इति घटोपिसाध्योभवेत् ततश्चनसाध्यः साध्यस्य दृष्टांतः स्यात् नचेदेवं तथापि वैलक्षण्यात्सुतरांनदृष्टांत इति ८ प्राप्यप्राप्तिकृतभ्यांप्रत्यवस्थानं प्राप्त्यः प्राप्तिसमेजाती यदेतत्कृतकत्वं साधनमुपन्यस्तं तत्किंप्राप्य साध्यंसाधयत्यप्राप्यं चेत् द्वयोर्विद्यमानयोरेव प्राप्तिर्भवति नचसदसतोरितिद्वयोश्चसत्वात्किंकस्य साध्यंसाधनंवा ९ अप्राप्यंनुसाधनत्वमयुक्तमितिप्रसंगादिति १० प्रसंगापादनेनप्रत्यवस्थानं प्रसंगसमा जातिः यद्यनित्यत्वे कृतकत्वंसाधनं तदाकृतकत्वेपिकिंसाधनं तत्साधनेपिकिंसाधनमिति ११ प्रतिदृष्टांतेनप्रत्यवस्थानं प्रतिदृष्टांतसमा जातिः अनित्यः शब्दः प्रयत्नानंतरीयकत्वादुघटवदित्युक्तेजातवाह्याह यथाघटः प्रयत्नानंतरीयकोऽनित्योदृष्टः एवंप्रतिदृष्टांत आकाशं नित्यमपिप्रयत्नानंतरीयकंदृष्टं कूपखननप्रयत्नानंतरं तदुपलंभोदितिनचेदमनैकांतिकत्वोद्भावनंभंग्यंतरेणप्रत्यवस्थानात् १२ अनुत्पत्त्याप्रत्यवस्थानमनुत्पत्तिसमाजातिः अनुत्पन्नेशब्दाख्ये धर्मिणिकृतकत्वं धर्मः कथं वर्त्तेतदेवंहेत्वभावादसिद्धिरनित्यत्वस्येति १३ साधर्म्यसमावैधर्म्यसमायाजातिः पूर्वमुद्दाहरति सैवसंशयेनोपसंह्रियमाणा संशयसमाजातिर्भवति किंघटसाधर्म्यात्कृतकत्वादनित्यशब्द उतनेत्यैधर्म्यादाकाशसाधर्म्यदमूर्त्तत्वान्नित्यइति १४ द्वितीयपक्षोत्थापनबुद्ध्याप्रयुज्यमानासैवसाधर्म्यसमावैधर्म्यसमाचजातिः प्रकरणमाप्तभवति तत्रैवनित्यः शब्दः कृतकत्वाद्घटवदितिप्रयोगे नित्यः शब्दः श्रावणत्वाच्छब्दत्ववदितिउद्भावनप्रकारभेदमात्रेणचजातिनानात्वंद्रष्टव्यं १५ नैकात्म्यानुपपत्तेर्हेतोः प्रत्यवस्थानं हेतुसमाजातिः हेतुः साधनं तत्साध्यमपूर्वंपश्चात्सहवाभवेत् यदिपूर्वं असतिसाध्येतत्कस्यसाधनं अथपश्चात्साधनंतर्हिपूर्वंसाध्यंतस्मिंश्चपूर्वमिहुकिंसाधनेन अथयुगपत्साध्यसाधनं नहितयोः सव्येतरगोविषाणयोरिवसाध्यसाधनभावएवनभवेदिति १६ अर्थापत्त्याप्रत्यवस्थानमर्थापत्तिसमाजातिः यदिनित्यसाधर्म्यात्कृतकत्वादनित्यः शब्दोऽर्थादाप

यतेतदानित्यसाधर्म्यान्नित्यइति अस्यचास्यनित्येनाकाशादिनासाधर्म्यममूर्त्तत्वमित्युद्भावनप्रकारभेदत्वायमिति १७ अविशेषापादनेनप्रत्यवस्थानमविशेषसमाजातिः यदिशब्दघटयोरेको धर्मः कृतकत्वमिष्यतेतर्हिसमानधर्मयोगात्तयोरविशेषेतद्वदेवसर्वपदार्थानामविशेषः प्रसज्यतइति १८ उपपत्त्याप्रत्यवस्थानमुपपत्तिसमाजातिः यदिकृतकत्वोपपत्त्याशब्दस्यानित्यत्वं तर्हिअमूर्त्तत्वोपपत्त्यानित्यत्वमपिकस्मान्नभवतीतिपक्षद्वयोपपत्त्याःनध्यवसायपर्यवसानत्वंविवक्षितभूमित्युद्भावनप्रकारभेदत्वायं १९ उपलब्ध्याप्रत्यवस्थानमुपलब्धिसमाजातिः अनित्यः शब्दः प्रयत्नांतरीयकत्वादित्युक्तेप्रत्यवतिष्ठतेनखलुप्रयत्नानंतरीयकत्वमनित्यत्वेसाधनं साधनंहितदुच्यतेयेनविनानसाध्यमुपलभ्यतेनप्रयत्नांतरीयकत्वेनविनापिविद्युदादावनित्यत्वं शब्देपिकश्चिद्वायुवेगभज्यमानवनस्पत्यादिजन्येतर्थेवेति २० अनुपलब्ध्याप्रत्यवस्थानंअनुपलब्धिसमाजातिः तत्रैवप्रयत्नांतरीयकत्वेहेतावुपन्यस्तेस्त्याहुर्जातिवादीनप्रयत्नकार्यः शब्दः आयुच्चरणादस्योर्ध्वमाश्रवणयोग्यत्वेनोपलभ्यते आवरणानुपलंभेप्यनुपलंभान्नास्त्येवोच्चारणात् प्राग्शब्द इतिचेन्न अत्रहि यानुपलब्धिः सास्वात्मनिवर्त्ततेनवा वर्त्ततेचेत्तदीयआवरणेनोपलब्धिर्वर्त्ततेतस्यावरणस्य यथानुपलंभस्तथावरणानुपलब्धेरप्यनुपलंभः स्यात् आवरणानुपलब्धेश्चानुपलंभादभावोभवेत् तदभावेचावरणोपलब्धेर्भावोभवतितत्रश्चमृदंतरितमूलकीलोदकादिवदावरणोपलब्धिकृतमेवशब्दस्य प्रागुच्चारणाद्ग्रहणं अथानुपलब्धिः स्यान्निवर्त्ततेचेत्तर्ह्यनुपलब्धिः स्वरूपेणापिनाभिलाष्यनुपलब्धेरभावउपलब्धिरूपस्यतोपिशब्दस्यप्रागुच्चारणादव्यक्तित्वंस्यादितिद्वेधापिप्रयत्नकार्यत्वाभावान्नित्यःशब्दइति २१ साध्यधर्मनित्यानित्यकत्वेनशब्दस्यनित्यत्वापादानंनित्यसमाजातिः अनित्यः शब्दइतिप्रतिज्ञातेनाभिधारणेविकल्पयतियेयमनित्यताशब्दस्योच्यतेसाकिमनित्यानित्यावेति यद्यनित्या तदियमवश्यमपायिनीत्यनित्यतायाअपायान्नित्यः शब्दः अथानित्यतानित्येपि तथापिधर्म

स्यनित्यत्वात् तस्यचनिगृह्यस्यानुपपत्तेस्तदाश्रयभूतेः शब्दोपिनित्यः स्यात् तस्यानित्यत्वेतद्धर्मस्यनित्यत्वायोगा दित्युभयथापिनित्यः शब्दइति २२ एवंसर्वभावानामनित्यत्वोपपादनेन प्रत्यवस्थानमनित्यसमाजातिः घटसाध र्म्यमनित्यत्वेनशब्दस्यास्तीति तस्यानित्यत्वंयदि प्रतिपाद्यते तदाघटेन सर्वपदार्थानामस्त्येवकिमपि साधर्म्यमितितेषामप्यनित्यत्वंस्यात् अथपदार्थानगणांतथाभावेपिनानित्यत्वंतर्हिशब्दस्यापितन्माभूदितिअनित्यत्वमात्रापा दनपूर्वकविशेषोद्भावनाद विशेषसमागताभिन्नेयंजातिः २३ प्रयत्नकार्येनानाचोपन्यासेनप्रत्यवस्थानं कार्यसमा जातिः अनित्यः शब्दः प्रयत्नानंतरीयकत्वादित्युक्ते जातिवाद्याह प्रयत्नस्येहरूप्यंदृष्टंकिंचिदसदेवते नजन्यते यथाघटादिकंकिंचिन्नसदेवावरणव्युदासादिना ऽभिव्यज्यते यथामृदंतरितमूलकालकादिगर्भगतपुष्पादिवा एवंप्र यत्नकार्यनानात्वादेषशब्दः प्रयत्नेनव्यज्यते जन्यतेवेतिसंशयइतिसंशयापादनप्रकारभेदाच्चसंशयसमा नः कार्यसमाजातिर्भिद्यते २४ तदेवमुद्भावनविषयविकल्पभेदेन जातीनामानंत्येप्यसंकीर्णोदाहरणविवक्षया चतुर्विंशतिजातिभेदाउक्ताः प्रदर्शिताः प्रतिसमाधानंतुसर्वजातीनांपक्षधर्मत्वाद्यनुमानलक्षणपरीक्षालक्षण मेवनत्यविलुप्तलक्षणेहितावेवंप्रायाः पांशुपाताः प्रभवंतिकृतकृत्वप्रयत्नानंतरीयकत्वयोश्चदृढकृतप्रतिबं धात् नावरणादिरूपंशब्दानुपलंभनमपिवस्तुतमेवजातिप्रयोगेचपरेणकृतेसम्यगुत्तरमेववक्तव्यं ननुप्रतीपंजात्यु त्तरैरेवप्रत्यवस्थेपसासमंजस्यप्रसंगादिति २५ अथनिग्रहस्थानमाह निग्रहस्थानमाख्यातंपरोयेननिगृह्यते प्रति ज्ञाहानिसंन्यासविरोधादिविभेदनः ॥३२॥ येनकेनचित्प्रतिज्ञाहान्यायपराधेनपरोविपक्षोनिगृह्यते परवादी वचननिग्रहेणापद्यते तन्निग्रहस्थानं निग्रहपराजयस्यस्थानं आश्रयः कारणमित्यर्थः आख्यातं कथितं कुतो नामभेदतइत्याह प्रतिज्ञाहानीत्यादि हानिस्त्यागः संन्यासोऽपह्नवनं विरोधोहेतोर्विरुद्धता तेषांद्वंद्वेहानिसन्यास विरोधाः ततः प्रतिज्ञाशब्देनेत्थंसंबंधः प्रतिज्ञायाः पक्षस्यहानिसंन्यासविरोधाः प्रतिज्ञाहानि सन्यासविरोधाः

नेत्यादिर्येषांतेप्रतिज्ञाहानिसंन्यासविरोधादयः आदिशब्देनशेषानपिभेदान् परामृशति तेषांविभेदेतेविशिष्टभेद तः येनप्रतिज्ञाहान्यादि दूषणजालेनपरोनिगृह्यते तन्निग्रहस्थानमित्यर्थः निग्रहस्थानंचसामान्यतोद्विविधं विप्रतिपत्ति रप्रतिपत्तिश्च तत्रविप्रतिपत्तिः साधनाभासेसाधन बुद्धिः दूषणाभासेच दूषणबुद्धिः अप्रतिपत्तिस्तुसाधनस्यादूषणंदूष णस्याननुयोगोद्विधाहिवादीपराजायते यथाकर्त्तव्यमप्रतिपद्यमानोविपरीतंवाप्रतिपद्यमानइति विप्रतिपत्त्यप्रति पत्तिभेदाच्च द्वाविंशतिनिग्रहस्थानानिभवंति तद्यथाप्रतिज्ञाहानिःप्रतिज्ञांतरंप्रतिज्ञाविरोधः ३ प्रतिज्ञासंन्यासः ४ हेत्वंतरं ५ अर्थांतरं ६ निरर्थकं ७ अविज्ञातार्थं ८ अपार्थकं ९ अप्राप्तकालं १० न्यूनं ११ अधिकं १२ पुनरुक्तं १३ अननुभाषणं १४ अज्ञानं १५ अप्रतिभा १६ विक्षेपः १७ मतानुज्ञा १८ पर्यनुयोज्योपेक्षणं १९ निरनुयोज्यानुयोगः २० अपसिद्धांतः २१ हेत्वाभासाश्च २२ अत्राप्यननुभाषणमज्ञानमप्रतिभाविक्षेपः पर्यनुयोज्योपेक्षणमित्यप्र तिपत्तिप्रकाराः शेषाश्चविप्रतिपत्तिभेदाः अत्रहेतावनैकांतिकीकृतेप्रतिदृष्टांतधर्मस्वदृष्टांतेभ्युपगच्छतः प्रतिज्ञाहानि र्नामनिग्रहस्थानंभवति अनित्यः शब्द ऐंद्रियकत्वात् घटवदिति साधनं वादीयदनूद्यपरेणसामान्यमैंद्रियकमपि नित्यंदृष्टमितिहेतावनैकांतिकीकृतेयद्येवं ब्रूयात् सामान्यमद्रव्यंदृष्टंनित्यंभवतीति सर्वंब्रुवाणः शब्दानित्यत्व प्रतिज्ञातत्यात् शब्दोपिनित्यएवंस्यात् ततः प्रतिज्ञाहान्यापराजीयते प्रतिज्ञानार्थप्रतिषेधेपरेणकृते तत्रैवधर्मिणि धर्मांतरसाधनीयमभिदधतः प्रतिज्ञांतरंनामनिग्रहस्थानंभवति अनित्यः शब्द ऐंद्रियकत्वादित्युक्ते तथैवसामा न्येनव्यभिचारेणोदिते यद्ब्रूयादयुक्तंयत्सामान्यमैंद्रियकंनित्यंतर्हिसर्वगतं अस्मर्वशब्देगते इतिसोयमनित्यः श ब्द इति पूर्वप्रतिज्ञातः प्रतिज्ञांतरगमर्वगतः शब्द इति प्रतिजानानः प्रतिज्ञांतरेणनिगृहीतो भवति २ प्रतिज्ञाहेतो र्विरोधःप्रतिज्ञाहेतोर्विरोधो नामनिग्रहस्थानंभवति गुणव्यतिरिक्तंद्रव्यं रूपादिभ्योऽर्थांतरस्यानुपलब्धेरिति सोयं प्रतिज्ञाहेतोर्विरोधो यदिहि गुणव्यतिरिक्तंद्रव्यं नतर्हिरूपादिभ्योऽर्थांतरस्यानुपलब्धिः अथरूपादि-

भ्यो ऽर्थांतरस्यानुपलब्धिः कथंगुणव्यतिरिक्तं द्रव्यमिति तदयंप्रतिज्ञाविरुद्धाभिधानात् पराजीयते ३ पक्षस्वाधनेपरेण दूषितेनदुद्धरणाशक्त्या प्रतिज्ञामेवनिन्हानस्य प्रतिज्ञासन्यासोनाम निग्रहस्थानं भवति अनित्यः शब्दऐंद्रियकत्वादित्युक्ते तथैवसामान्येनानैकांतिकतायांयदिब्रूयात् करणवाह्य अनित्यः शब्द इति प्रतिज्ञासंन्यासात्पराजितोभवति ४ अविशेषाभिहितेहेतौ प्रतिषिद्धविशेषणमभिदधतो हेत्वंतरंनामनिग्रहस्थानंभवति तस्मिन्नेवप्रयोगेतथैवसामान्यस्यव्यभिचारेणदूषितेजातिमत्त्वेसतीत्यादि विशेषगुणेपादानोहेत्वंतरेणनिगृहीतोभवति।।५ प्रकृतादर्थादर्थांतरंतदर्थिनोपयोगिकमभिदधतोऽर्थांतरं नामनिग्रहस्थानं भवति अनित्यः शब्दः कृतकत्वादितिहेतुः हेतुरिति चहिनोतेर्धातोस्तुप्रत्यये कृदंतंपदंपदंचनामाख्यातोपसर्गनिपातभराज्ञतुर्विधमितिप्रसुतनामादीनित्याचक्षाणः प्रकृतानुपयोगिनाऽर्थांतरेणनिगृह्यतइति ६ अभिधेयरहितवर्णानुपूर्वप्रयोगमात्रंनिरर्थकंनामनिग्रहस्थानं भवति अनित्यः शब्दः कचटतपानांगजडदबत्वात् षडभवदित्येतदपि सर्वथाभर्थशून्यत्वान्निग्रहायभवति साध्यानुपयोगाद्वा ७ यत्साधनंवाक्यं दूषणंवाक्यंवाकिंचिन्निर्भिहितमपिपर्यंतपदादिभ्यांबोधुंनशक्यतेतत्किल शब्दमात्रमसाधुप्रयोगः मतिरस्मोच्चारितमित्येवंप्रकारमविज्ञातार्थंनामनिग्रहस्थानंभवति असामर्थ्यसंवरणप्रकारोह्ययमितिनिगृह्यते ८ पूर्वापरासंगतपदसमूहप्रयोगादप्रतिष्ठितवाक्यार्थमपार्थकं नामनिग्रहस्थानंभवति यथा दशदाडिमानिषडपूपाः कुंडमजाजिनंपललपिंडइत्यादि ९ प्रतिज्ञाहेतूदाहरणोपनयनिगमनवचनक्रममुल्लंघ्याऽवयवविपर्यासेन प्रयुज्यमानमनुमानवाक्यमप्राप्तकालंनामनिग्रहस्थानंभवति स्वप्रतिपत्तिवत् परप्रतिपत्तिजननेपरार्थानुमानक्रमस्याभ्युपगमात् १० चावयवेवाक्येप्रयोक्तव्येनदन्यतमेनाप्यवयवहीनेप्रयुंजानस्यन्यूनंनामनिग्रहस्थानंभवति प्रतिज्ञादीनांपंचानामपि परप्रतिपत्तिजनन्युपयोगादिति ११ एकेनैवहेतूदाहरणेनयाव

DR BHAU DAJI MEMORIAL

त्तिपादितेऽर्थेहेत्वंतरमुदाहरणांतरंवाब्रुवतोऽपिकंनामनिग्रहस्थानंभवति निःप्रयोजनाभिधानात् १२ शब्दार्थयोःपुनर्वचनंपुनरुक्तंनामनिग्रहस्थानंभवति अन्यत्रानुवादात् शब्दपुनरुक्तंनामयत्रसएवशब्दः पुनरुच्चार्यते यथानित्यःशब्दोऽनित्यशब्दइति अर्थपुनरुक्तंनुयत्रसोर्थः प्रथममन्येनशब्देनोच्चार्यतेपुनश्चपर्यायांतरेणोच्यते यथाऽनित्यःशब्दोविनाशीध्वनिरिति अनुवादेतुपौनरुक्त्यंनदोषोयथाहेतूपदेशेनप्रतिज्ञायाः पुनर्वचनंनिगमनमिति १३ पर्षदाविदितस्यवादिनात्रिरभिहितस्यापियदप्रत्युच्चारणं तदननुभाषणंनामप्रतिवादिनोनिग्रहस्थानं भवति अप्रत्युच्चारयन् किमश्रोत्रप्राप्तंदूषणंदूषणमभिधीते १४ पर्षदाविज्ञातस्यापिवादिवाक्यार्थस्यप्रतिवादिनोयदज्ञानंनामनिग्रहस्थानंभवति अविदितोत्तरविषयोहिकिमुत्तरंब्रूयात् नचानुभाषणमेवेदंज्ञानंपिचत्वनुभाषणासामर्थ्यादर्शनात् १५ परपक्षेगृहीतेप्यनुभाषितेपितस्मिन्ननुयोगप्रतिपत्तिरभवतिभानिग्रहस्थानंभवति १६ कार्यव्यासंगात्कथाविच्छेदेविक्षेपोनामनिग्रहस्थानंभवति गिसाधयिषितस्यार्थस्याशक्यसाधनतामवसायकथांविच्छिनत्ति इदंमेकरणीयमपरिहीयतेपीनसेनकंठउपरुद्ध इत्यायभिधायकथांविच्छिंदन्विक्षेपेणपराजीयते १७ स्वपक्षेपरापादितदोषमनुद्धृत्यतमेवपरपक्षेप्रतीपमापादयतोमतानुज्ञानामनिग्रहस्थानंभवति-चौरोभवान् पुरुषत्वान्मत्सिद्धचोरवदिति युक्तेभवानपिचौरः पुरुषत्वादितिक्रुध्यन्नात्मनः परापादितंचौरत्वदोषमभ्युपगतवान्भवतीति मतानुज्ञयानिगृह्यते १८ निग्रहप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणंनामनिग्रहस्थानंभवति पर्यनुयोज्यानामनिग्रहोपपत्त्याऽवश्यनोदनीयदंडेनिग्रहस्थानमुपनतमतोनिगृहीतोसिइतिवचनीयमनुपेक्ष्यमनिगृह्णतियः सपर्यनुयोज्योपेक्षणेननिगृह्यते १९ अनिग्रहस्थानेनिग्रहस्थानानुयोगान्निरनुयोज्यानुयोगोनामनिग्रहस्थानंभवति उपपन्नवादिनमप्रसादिनमनिग्रहार्हमपिनिगृह्णतो—— योब्रूयात् मएवसमर्थोनदोषोद्भावनयानिगृह्यते २० सिद्धांतमभ्युपेत्यानियमात् कथाप्रसंगोऽपसिद्धांतोनामनिग्रहस्थानंभवति यः प्रथमं कंचित्सिद्धांतमभ्युग

म्यकथामुपक्रमते तत्रचसिसाधयिषितोर्थोसाधनायवापरोपालंभायवासिद्धांतविरुद्धमभिधत्तेसोऽपसिद्धांतेननिगृह्यते यथामीमांसा- भ्युपगम्यः कश्चिदग्निहोत्रं स्वर्गसाधनमित्याह कथंपुनरग्निहोत्रक्रियाध्वस्तासती स्वर्गस्यसाधिकाभवतीत्यनुयुक्तः प्राह ॥ अनयाक्रिययागधितोमहेश्वरफलंददाति राज्यादिवदितितस्यमीमांसानभिमश्वरस्वीकारादयमसिद्धांतनिग्रहस्थानेभवति ॥२१ हेत्वाभासाश्चयथोक्ताअसिद्धविरुद्धादयोनिग्रहस्थानं ॥२२ इतिभेदांतरानंत्यमपिनिग्रहस्थानानांद्वाविंशतिर्मूलभेदानिवेदिताइतितेदंछलजातिनिग्रहस्थानरूपभेदाभिज्ञःस्ववाक्येतानिवर्जयन् परवाक्युक्तानिसमादधत् यथाभिमतसाध्यसिद्धिंलभतेइति अत्रानुक्रमपिकिंचिन्निगद्यते अर्थोपलब्धिहेतुः प्रमाणंएकात्मसमवायिज्ञानांतरवेद्यंज्ञानं प्रमाणाद्भिन्नफलं पूर्वं२ प्रमाणंउत्तरफलं स्मृतेरप्रामाण्यं परस्परविभक्तोसामान्यविशेषोनित्यानित्यत्वे सदसदंशोज्ञप्रमाणस्यविषयः परमार्थिकः तमस्थाये अदृश्ये आकांक्षागुणः शब्दोपाहलिकः संकेतवशादेवशब्दादर्थप्रतीतिनपुनरुक्तप्रतीतिपादनसामर्थ्यात् धर्मधर्मिणोर्भेदः सामान्यमनेकस्थं। आत्मविशेषगुणलक्षणं कर्मयपुर्विषयेंद्रियबुद्धिसुखदुःखानामुछेदादात्मसंस्थानेमुक्तिरिति न्यायसारे पुनरेवं॥ नित्यसंवेद्यमानेनसुखेनविशिष्टात्यंतिकीदुःखनिवृत्तिः पुरुषस्यमोक्षइति एषांतर्कग्रंथान्यायसूत्र १ भाष्यन्यायवार्त्तिक २ तात्पर्यटीका ४ तात्पर्यपरिशुद्धि ५ न्यायालंकारवृत्तयः क्रमेणाक्षपाद १ वात्स्यायनो २ द्योतकर ३ वाचस्पति ४ श्रीउदयन ५ श्रीकंठाभयतिलकोपाध्याय ६ विरचिताः ५४००० भासर्वज्ञप्रणीतेन्यायसारे १ दशटीकाः तासुमुख्याटीका न्यायभूषणाख्यान्यायकालिका जयंतरचिता न्यायकुसुमांजलितर्कश्च अथतन्मतमुपसंहरन्नुत्तरंचमंतमुपक्षिपन्नाह॥ नैयायिकमतस्येषः समासः कथितोऽजसा सांख्याभिमतभावानामिदानीमयमुच्यते ॥२३॥ एषोनंतरोदितोनैयायिकमतस्यसमासः संक्षेपः कथितउक्तोऽजसाद्राग् संख्याभिमतभावानांसांख्याः कापिलामूषामभिमताअभीष्टाभावायेषंचविंशतितत्वादयः पदार्थास्तेषामयंसमासइदानीमुच्यते ॥ इति

= ॐ नमोभगवते वासुदेवायेतिद्वादशाक्षरोमंत्रः

श्रीतपागणनभोंगणदिनमणिश्रीदेवसुंदरसूरिपट्टोपजीविश्रीगुणरत्नसूरिविरचितायां तर्करहस्यदीपिकाभिधानायांषड्दर्शनसमुच्चयवृत्तौनैयायिकमतस्वरूपप्रकटनोनामद्वितीयोधिकरः ॥२॥ अथादौसांख्यमतप्रपेन्द्रानांपरिज्ञानायलिंगादिकंनिगद्यते ॥ त्रिदंडाएकदंडाश्चकौपीनवसनाधातुरक्तांबराः शिखावंतोजटिनः क्षुरमुंडाश्चर्मासनादिनग्रहाशनाःपंचयामीपराव॥ द्वादशाक्षरजीविनः परिव्राजकादयस्तदुक्ता॥ ॐ नमोनारायणायेतिनरदंतिवदंतिवंदमानाः तेनुनारायणायनमः इतिप्राहुतेषांचमहाभारतेधीरेतिख्यातारावीमुखवस्त्रिका मुखनिःश्वासनिरोधिकाभूतानांदयानिमित्तंभवति यदाहुक्तं घ्राणादितोनुयातेनश्वासेनैकेनजंतवः हन्यंतेशतशोब्रह्मन्नणुमात्राक्षरादिनां॥१ तेचजलजीवदयार्थं स्वयंगलनकं धारयतिभक्तानांचोपदिशंति॥ षट्त्रिंशदंगुलायामं विंशत्यंगुलविस्तृतं दृढंगलनकं कुर्यात् भूयोजीवान्विशोधयेत् ॥१ म्रियंतेमिश्रतोयेनपूतराः क्षारसंभवाः क्षारतोयेनतुपरेन कुर्यात्संकरंततः॥२ यूतास्यतंतुगलिते येविंदोसंतिजंतवः क्ष्मोसूक्ष्ममरमानास्ते नेक्षंतिविविक्षपे॥३ इतिगलनकविचारेमीमांसायां सांख्याःकेचिदीश्वरदेवाः अपरेचनिरीश्वराः येचनिरीश्वरास्तेषांनारायणोदेवः तेषामाचार्याविष्णुप्रतिपादकाःश्वेतन्यग्रभृतिशब्दैरभिधीयंतेतेषांमतयस्कारः कपिलासुरिपंचशिखभार्गवोलूकादयः ततः सांख्याः कापिलाइत्यादिनामभिरभिधीयंते तथाकपिलस्यपरमर्षिरितिद्वितीयंनाम तेषांपांचरात्रा इत्यपिनामज्ञातव्यं भाणारस्यांतेषांप्राचुर्येबह्वीमासोपवासिका ब्राह्मणाअर्चिर्मार्गविरुद्धधूममार्गानुगामिनः सांख्यास्त्वर्चिर्मार्गानुगाः तत्रैवब्राह्मणावेदक्रियायज्ञमार्गानुगाः सांख्यास्तुहिंसायावेदविरताअध्यात्मवादिनः तेचस्वमतस्यमहिमानमेवामनंति सदुक्तंमाठरभाष्यांते हसपिबललखादमोदनित्यंभुंक्ष्वचभोगान्यथातिकामंयदिविदितंतेकपिलमतंतत्प्राप्स्यसिमोक्षसौख्यमचिरेण ॥१ शास्त्रांतरेप्युक्तं ॥ पंचविंशतितत्वज्ञोयत्रतत्राश्रमेरतः शिखीमुंडीजटीवापिमुच्यतेनात्रसंशयः॥१॥ ३३॥ अथशास्त्रकारः सांख्यमतमुपदर्शयति ॥ ॥

सांख्यानिरीश्वराः केचित्केचित्सेश्वरदेवताः सर्वेषामपितेषांस्यात्तत्त्वानांपंचविंशतिः ॥३४॥ केचित्सांख्यानिरीश्वरा ईश्वरोयेषांनिरीश्वराः केवलाध्यात्मिकमानिनः केचिदीश्वरदेवताः ईश्वरोदेवतायेषां तेतथा तेषांसर्वेषामपिनिरीश्वराणां सेश्वराणांचोभयेषामपितत्त्वानां पंचविंशतिःस्यात् सांख्यमतेकिलदुःखत्रयाभिहतस्य पुरुषस्य तदुपघातहेतुज्ञत्वविज्ञासोत्पद्यते आध्यात्मिकमाधिदैविकमाधिभौतिकंचेतिदुःखत्रयं अत्राध्यात्मिकं द्विविधं शारीरंमानसंच तत्र वातपित्तश्लेष्मणां वैषम्यनिमित्तं यदुःखमात्मनोदेहमधिकृत्यज्वरातीसारादि समुत्पद्यते तत् शारीरंमानसंचकामक्रोधलोभमोहेर्ष्याविषयादर्शननिबंधनं सर्वंचैतदांतरोपायसाध्यत्वादाध्यात्मिकंदुःखं बाह्योपायसाध्यंदुःखंद्वेधा आधिभौतिकं मानुषपशुपक्षिमृगसरीसृपस्थावरनिमित्तं आधिदैविकं यक्षराक्षसग्रहावेशहेतुकं अनेनदुःखत्रयेण रजःपरिणामभेदेनबुद्धिवर्त्तिनाऽभिहतस्य प्राणिनस्तत्त्वानांजिज्ञासाभवति दुःखविघातायतत्त्वानिपंचविंशतिर्भवति ३४ अथतत्त्वपंचविंशतिमेवविवक्षुरादौसत्त्वादिगुणस्वरूपमाह ॥ सत्त्वंरजस्तमश्चेति त्रयंतावद्गुणत्रयं ॥ प्रसादतापदैन्यादि कार्यलिंगं क्रमेणतत् ॥३५॥ तावत्शब्दःक्रमेतेषु पंचविंशतेतत्त्वेषु सत्त्वंसुखलक्षणं रजोदुःखलक्षणं तमश्चमोहलक्षणं इत्येवंप्रथमंतावद्गुणत्रयंज्ञेयं तस्यगुणत्रयस्यकानिलिंगानीत्याह प्रसादेत्यादि तत् सत्त्वादिगुणत्रयंक्रमेण प्रसादतापदैन्यादि कार्यलिंगं प्रसादः प्रसन्नता तापः संतापः दैन्यंदीनवचनादि हेतुर्विषणता द्वंद्वेप्रसादतापदैन्यानितानि आदिः प्रकारोयेषां कार्याणांतानिप्रसादतापदैन्यानिप्रसादतापदैन्यादीनि कार्याणि लिंगंगमकंचिन्हं यस्य तत्प्रसादतापदैन्यादि कार्यलिंगंअयंभावः प्रसादबुद्धिपाटवात्साधवप्रसन्नाभिहांगाऽद्वेषप्रतीत्यादयः कार्यसत्त्वस्य लिंगं तापशोषभेदचलचित्ततास्तंभोद्वेगाः कार्यरजोलिंगं दैन्यमोहमरणासादनबीभत्सज्ञानगौरवादीनि कार्यतमसोलिंगं एभिःकार्यैः सत्त्वादीनि ज्ञायंतेतथाहि लोकेयः कश्चित्सुखमुपलभते सआर्जवमार्दवंसत्यशौचह्री

बुद्धिक्षमाः कृपाप्रसादादिस्थानंभवति तत्सत्त्वंयः कश्चिद्दुःखमुपलभते सतथाद्वेषद्वेहमत्सरनिंदावंचनबंधनतापादिस्थानंभवति तद्रजः यः कश्चित्कदापिमोहंलभते ज्ञानमदात्मस्यभयकैन्याकर्मण्यतानास्तिकतादिषादोन्मादस्वप्नादिस्थानंभवति तत्तमइति सत्त्वादिभिश्चपरस्परोपकारिभिस्त्रिभिरपिगुणैः सर्वंजगद्व्याप्तंवियते परंकृत्स्नेकेप्रायोदेवेषु सत्त्वस्य बहुलताः धोलोकेतिर्यक्षुनारकेषुचतमोबहुलता नरेषुरजोबहुलता यद्दुःखप्रायाभवंति ॥ यदुक्तं ॥ ऊर्ध्वंसत्त्वविशालस्तमोविशालश्चमूलतः सर्गः मध्येरजोविशालो ब्रह्मादिस्तंबपर्यंतः ॥१अ त्रब्रह्मादिस्तंबपर्यंतइति ब्रह्मादिपिशाचांतोऽष्टविधःसर्गइति ॥ एतेषांयासमावस्था सामकृतिः किलोच्यते ॥ प्रधानमव्यक्तशब्दाभ्यांवाच्यानित्यस्वरूपिका ॥ ३६ ॥ एतेषांसत्त्वादिगुणानांयासमानुत्यप्रमाणावस्था अवस्थानं सामत्वादीनांसमावस्थैवप्रकृतिरुच्यते किलेतिपूर्ववार्तायां सत्त्वरजस्तमसांगुणानां क्वचिद्वादोकस्यचिदाधिक्येपिमिथः प्रमाणापेक्षया त्रयाणामपिसमाना वस्था प्रकृतिः कीर्त्यतेइत्यर्थः प्रधानमव्यक्तंशब्दाभ्यांवाच्यासाचप्रकृतिः प्रधानमव्यक्तं योच्यतेनामांतराभ्यांनित्यमव्युतानुत्पन्नस्थिरैकस्वभावंकूटस्थंस्वरूपंयस्याः साःनित्यस्वरूपिका अविचलितस्वरूपेत्यर्थः अतएवसाःनवयवासाधारणीअशब्दाअस्पर्शाअरसाअरूपाअगंधाअव्ययाचोच्यंतेमोक्ष्यसांख्याहिआत्मानं २ प्रतिपृथक्प्रधानंवदंति उत्तरेतुसांख्याः सर्वात्मस्वप्येकंनित्यंप्रधानंइतिप्रतिपन्नाः ॥ प्रकृत्यात्मसंयोगात्सृष्टिर्जायतेऽतः सृष्टिक्रममाह ॥ ततः संजायतेबुद्धिर्महानितियकाच्यते ॥ अहंकारस्ततोपिस्यात्तस्मात्षोडशकोगणः ॥३७॥ ततःप्रकृतेर्बुद्धिः संजायते उत्पद्यते सात्रगवादौपुरोदृश्यमानेगौरयंनाश्वः स्थाणुरेवायंनपुरुषइतिविषयनिश्चयाध्यवसायरूपामहान् इतियकाच्यतेयद्वदाख्यायाऽभिधीयतेबुद्धेश्चतस्र्याअपिरूपाणि धर्मज्ञानवैराग्यैश्वर्यरूपाणिचत्वारिसात्विकानिअधर्मादीनितुतत्प्रतिपक्षभूतानिचत्वारितामसानीतिततोऽपिबुद्धेरध्यहंकारःस्यादुत्पद्यतेत्रचाहं सुभगोहंदर्शनीयइत्याद्यभिमानरूपःतस्माद्दहंका

गतू षोडशकोगणः इत्यर्थते षोडशसंख्यामानमस्यषोडशकोगणःसमुदायः॥ अथषोडशसंख्यंगणंश्लोकद्वयेनाह ॥
स्पर्शनंरसनंघ्राणंचक्षुःश्रोत्रंचपंचमं॥ पंचबुद्धींद्रियाण्यत्रतथाकर्मेंद्रियाणिच ॥३८॥ पायूपस्थवचःपाणिपादाख्या
निमनस्तथा ॥ अन्यानिपंचरूपादितन्मात्राणीतिषोडशः॥३९॥ युग्मं॥ स्पर्शनंत्वक्रसनंजिह्वा घ्राणंनासिका च
क्षुर्नेत्रं श्रोत्रंचश्रवणंपंचमं एतानिपंचबुद्धींद्रियाणि अत्रषोडशके गणेभवंति स्वंस्वंविषयंबुध्यतेइतिकृत्वाइंद्रियाण्ये
व बुद्धींद्रियाणिभण्यंते तथाहि स्पर्शनंस्पर्शविषयंबुध्यते एवंरसनंरसं घ्राणंगंधंच चक्षुरूपंच श्रोत्रंचशब्द
मिति तथाशब्दः पंचेतिपदस्यानुकर्षणार्थः पंचसंख्यानि कर्मकारणत्वात्कर्मेंद्रियाणिच कानितानीत्याह पायूपस्थ
वाक्पाणिपादाख्यानि तत्रपायुर्गुदं उपस्थः स्त्रीपुंसचिन्हद्वयं वचश्चेहउच्यते।नेनेतिवच उरःकंठादिस्थानाश्रि
या वचनमुच्चारयति पाणीपादेचप्रसिद्धौ एतेर्मलोत्सर्गसंभोगवचनादानचलनादीनिकर्माणिसिध्यंतीतिकर्मेंद्रियाण्युच्यं
ते तथाशब्दः समुच्चये एकादशंमनश्चमनोहिबुद्धींद्रियमध्येबुद्धींद्रियंभवति कर्मेंद्रियमध्येकर्मेंद्रियं तच्चसत्वा
र्थमंतरेणापिसंकल्पवृत्तिः तद्यथा कश्चिद्वृः शृणोति ग्रामांतरभोजनमस्तीति तत्रतस्यसंकल्पः स्यात्तत्रयास्यामित
त्रवाहंकिंगुडधिरूपंभोजनंलप्स्ये उतश्विद्दधि किंवाकिमपिनेत्येवंरूपंमनइति तथाः हंकारादन्यात्परागितन्मा
त्राणि सूक्ष्मसंज्ञानिपंचोत्पद्यंत तत्ररूपतन्मात्रं शुक्लकृष्णादिरूपविशेषः रसतन्मात्रंतिक्तादिरसविशेषः गंधत
न्मात्रं सुरभ्यादिगंधविशेषः शब्दतन्मात्रं मधुरादिशब्दविशेषः स्पर्शतन्मात्रंमृदुकठिनादि स्पर्शविशेषः इतिषो
डशअयंषोडशकोगणइत्यर्थः ३८॥३९ अथतन्मात्रेभ्योपंचभूतानि उत्पद्यंते इत्याह॥रूपात्तेजोरसादापो गं
धाद्भूमिः स्वगात्मभः॥स्पर्शाद्वायुरथेपंचपंचभ्योभूतपंचकं ॥४०॥ रूपतन्मात्रसूक्ष्मसंज्ञात्तेजोऽग्निरुत्पद्यतेर
सतन्मात्रादपोजलानिजायंतेगंधतन्मात्रात्पृथ्वी समुत्पद्यते स्वराच्छब्दतन्मात्रादाकाशमुद्भवति तथास्पर्श
न्मात्राद्वायुः प्रादुर्भवति एवंचपंचभ्यस्तन्मात्रेभ्योभूतपंचकंभवतीति ॥४०॥ एवंचतुर्विंशतितत्वरूपंनि

वेदितंसांख्यमतेप्रधानं ॥ अन्यत्सत्कर्तृविगुणश्चभोक्तातत्वंपुमान्नित्यचिदुच्यतेपरः ॥४१॥ एवमनुक्तप्रकारे
ण सांख्यमतेचतुर्विंशतितत्वरूपंप्रधानंप्रकृतिर्महानहंकारश्चेतित्रयं पंचबुद्धींद्रियाणि पंचकर्मेंद्रियाणि मनश्चेदं
पंचतन्मात्राणि पंचभूतानिचेतिचतुर्विंशतितत्वानि रूपंस्वरूपंयस्यतच्चतुर्विंशतितत्स्वरूपंप्रधानंप्रकृतिर्निवे
दितं तथाचोक्तं प्रकृतेमहांस्ततोऽहंकारस्तस्माद्गणश्चषोडशकः तस्मादपिषोडशकात्पंचभ्यः पंचभूतानि।
इतिप्रकृतिर्विकारोऽनुत्पन्नत्वात्बुद्ध्यादयश्चसप्तपरेषांकारणतयाप्रकृतयः कार्यतयाचविकृतयउच्यंतेषो
डशकश्चगणोविकृतिरेवकार्यत्वात्पुरुषश्चनप्रकृतिर्नविकृतिः अनुत्पादकत्वात्अनुत्पन्नत्वाच्चतथाचेश्वर
कृष्णः सांख्यसप्ततौ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्तषोडशकश्चविकारोनप्रकृतिर्नवि
कृतिःपुरुष इति तथामहदादयः प्रकृतेर्विकारानेचव्यक्ताः संतः पुनरव्यक्ता अपिभवंतीतिस्वस्वरूपाद्दृश्यं
त्वनित्यत्वात् प्रकृतिस्त्वविकृतानित्याभ्युपगम्यतेततोनकदाचिदपिसास्वस्वरूपाद्दृश्यति तथाच महदादिकस्यप्र
कृतेश्चस्वरूपंसांख्यैरित्थमूचे हेतुमदनित्यमव्यापिसक्रियमनेकमाश्रितंलिंगंसावयवंपरतंव्यक्तं विपरीतम
व्यक्तं ॥ इतितत्रहेतुमत्कारणवत् महदादिकं अनित्यमिति उत्पत्तिधर्मत्वाद्बुद्ध्यादेः अव्यापीतिप्रतिनियतंनस
र्वगं सक्रियमितिसहक्रियाभिरध्यवसायादिभिर्वर्त्तत इतिसक्रियं सव्यापारंसंचरणक्रियावत् अनेकमितित्रयो
विंशतिभेदात्मकं आश्रितमिति आत्मोपकारकत्वेनप्रधानमचलंव्यवस्थितंलिंगमिति यद्यस्माद्गुत्पन्नं तत्तस्मि
न्नेवतत्प्रलयंगच्छतीतिलिंगं तत्रभूतानि तन्मात्रेषुलीयंते तन्मात्राणींद्रियाणि मनश्चाहंकारेसचबुद्धौ साचाव्यक्ते
तच्चानुत्पद्यमानत्वान्नकचित्प्रतीयते सावयवमिति शब्दस्पर्शरूपरसगंधात्मकैरवयवैर्युक्तत्वात् परतंचमिति
कारणायत्तत्वात्इत्येवंरूपव्यक्तं महदादिकं अव्यक्तंनुप्रकृत्याख्यं एतद्विपरीतमिति तत्रविपरीततासुयोज्यैवनव
रंप्रधानंदिविभुव्यंतरिक्षेचसर्वत्रव्यापितयावर्त्तत इतिव्यापित्वंतस्यतथाव्यक्तस्य व्यापकत्वेनसंचरणरूपायाःक्रि

याया अभावान्निःक्रियत्वं चद्रष्टव्यमिति दिग्मात्रमिदर्शितं विशेषणं व्याख्यानंतु सांख्यमतसादेरुक्तास्वानुदवसेयमिति अथपंचविंशतितमं पुरुषत्वमाह अन्यस्त्वकर्त्तेत्यादि प्रकृतेश्चतुर्विंशतितत्वरूपाया अन्यस्तुपृथग् भूतः पुनरकर्त्ताविगुणोभोक्तानित्यचिदभ्युपेतश्चपुमान् पुरुषस्तत्वं तत्रात्माविषयसुखादिकंतत्कारणं पुण्यादिकं मचनकरोतीति अकर्त्ता आत्मन् स्तृणमात्रकुञ्जीकरणेप्यसमर्थोत्वात् कर्त्रीतुप्रकृतिरेवतस्या प्रतिसंभावत्वात् तथाविगुणः सत्वादि गुणरहितः सत्वादीनांप्रकृतिधर्मत्वादात्मनश्चतद्भागात् तथाभोक्ता नुभवितापि सा क्षान्नभोक्ता किंतुप्रकृतिविकारभूतायांहि उभयमुखदर्पणाकारायांबुद्धौ संक्रांतानांसुखदुःखादीनांपुरुषः स्वात्मनिनिर्मलेप्रतिबिंबोदयमात्रेण भोक्ताव्यपदिश्यते बुध्यध्यवसितमर्थंपुरुषश्चेतयतेइति वचनात् यथाजपाकुसुमादिसन्निधानवशात् स्फटिकेरक्ततादिव्यपदिश्यते तथाप्रकृत्युपधानवत्वात् सदुःखात्मकाः नामर्थानांपुरुषस्यभोजकत्वंयुक्तमेवव्यपदिश्यते वारिमहार्णवोव्याह बुद्धिदर्पणसंक्रांतमर्थंप्रतिबिंबकंद्वितीयदर्पणकल्पंपुंसिअध्यारोपितेतिततदेवभोक्तृत्वमस्यनत्वात्मनोविकारापत्तिरितितथाचासुरिः बिंबिकेदृग्परिणतौबुद्धौभोगस्यकथ्यतेप्रतिबिंबोदयः स्वच्छेयथाचंद्रमसोजलादिषुवासीत्वंभोगमाचष्टे पुरुषोविकृतात्मेवस्वनिर्भासमचेतनंमनः करोतिसांनिध्यादुपाधिः स्फटिकंयथा ॥२ इतितथानित्यायाविज्ञेतनायाः अभ्युपेतः एतेनपुरुषस्यचैतन्यमेवस्वरूपंनतुज्ञानंज्ञानस्यबुद्धिधर्मत्वादित्यावेदितंद्रष्टव्यं केवलमात्मास्वंबुद्धेरव्यतिरिक्तमभिमन्यते सुखदुःखादयश्चविषयाइंद्रियश्चद्वारेणबुद्धौसंक्रामंतिबुद्धिभ्योभयमुखदर्पणाकारातततस्मस्यांचैतन्यशक्तिःप्रतिबिंबितेततः सुख्यहंदुःखहंज्ञाताहमित्युपचर्यतेआहचपातंजलिः शुद्धोपिपुरुषः प्रत्ययंबोद्धमनुपश्यतितमनुपश्यन्नतदात्मापितदात्मकइवप्रतिभासतेइति बुद्धिश्चाचेतनापिचिच्छक्तिसन्निधानाच्चेतनावतीवाऽवभासतेइतिपुमानित्यंजात्यपेक्षयैकवचनंतेनात्माः नैकोऽभ्युपगंतव्योजन्मजरामरणकारणानांनियमदर्शनात्

धर्मादिप्रवृत्तिनानात्वाच्चतेचसर्वेष्वात्मानःसर्वमतानिस्याश्चवसेयाः ॥ उक्तंच अमूर्तश्चेतनोभोगीनित्यःसर्वगतोऽक्रियः अकर्त्तानिर्गुणःसूक्ष्म आत्मकापिलदर्शने ॥१ इति ॥ ४१ तत्वान्युपसंहरन्नाह ॥ पंचविंशतितत्वानिसंख्ययैवंभवंतिच प्रधानवरयोश्चात्रवृत्तिःपंगुंधयोरिव ॥ ४२ ॥ चकारोभिन्नक्रमएवंचसंख्यथापंचविंशतितत्वानिभवंति ननुप्रकृतिपुरुषावुभावपिसर्वगतोमिथः संयुक्तौकथंवर्त्तेत इत्याशंक्याह ॥ प्रधानेत्यादि प्रधानपुरुषयोश्चात्रविश्वेपंगुंधयोरिववृत्तिर्वर्त्तनंयथाकश्चित् अंधः सार्धेनसमंपारलिपुरनगरंप्रस्थितःससार्धश्चौरैरभिहितं अंधत्वेनैवरहितइतश्चेतश्चधावन् वनांतरस्थेनपंगुनादृष्टः अभिहितश्च भोभोअंधमाभैषीः अहंपंगुर्गमनादिविकलत्वेनाक्रियश्चक्षुर्भ्यांसर्वंपश्यन्नस्मि त्वंतुगमनादिक्रियावान्नपश्यन्नसितततोः धेनोचेरुचिरमिदं अहंभवंतंस्कंधेकरिष्यामि एवमावयोर्वर्त्तनमस्विति ततोः धेनपंगुदृष्ट्वयुणेनस्वंस्कंधमधिरोपितोनगरंप्राप्यनाटकादिपश्यन् गीतादिकं चेंद्रियविषयमन्यमप्युपलभमानोयथामोदतेतथापंगुकल्पः शुद्धचैतन्यस्वरूपः पुरुषोपि अंधकल्पांजडांप्रकृतिं सक्रियामाश्रितोबुध्यध्यवसितं शब्दादिकंस्वात्मनि प्रतिबिंबंचेतयमानोमोदतेमोदमानश्चप्रकृतिंसुखस्वभावांमोहान्मन्यमानः संसारमाश्रयति ॥ तर्हितस्यकथंमुक्तिःस्यात्स्यादित्याह ॥ प्रकृतिवियोगोमोक्षः पुरुषस्यतेतद्वंतरज्ञानात् ॥ मानत्रितयंचानप्रत्यक्षंलैंगिकंशास्त्रं ॥ ४३ ॥ ततेतिप्रश्नकानामामंत्रणे एतयोः प्रकृतिपुरुषयोयदंतरंविवेकस्तस्यज्ञानात्पुरुषस्ययः प्रकृतेर्वियोगोभवतिसमोक्षः ॥ तथाहिशुद्धचैतन्यरूपोयंपुरुषःपरमार्थतःप्रकृत्यंतरज्ञात्वामोहात्संसारमाश्रितः ॥ १ ततः प्रकृतेसुखदुःखमोहस्वभावायायावन्नविवेकेनग्रहणंतावन्नमोक्षः प्रकृतेर्विवेकदर्शनेनुप्रवृत्तेरुपरतायांप्रकृतौपुरुषस्यस्वरूपेणावस्थानंमोक्षइति मोक्षश्चबंधविच्छेदाद्भवतिबंधश्चप्राकृतिकवैकारिकदाक्षिणभेदात्त्रिविधः तथाहिप्रकृतावात्मज्ञानादयेप्रकृतिमुपास

ने तथांत्रकृतिकोवंधः येविकारानेवभूतेंद्रियाहंकारबुद्धीः पुरुषबुद्ध्योपासते तेषांवैकारिकः इक्षापूर्नेदाक्षिणः पुरुषतन्त्रानभिज्ञोहीक्षापूर्त्तकारीकामोपहतमनाबध्यतेइति इक्षापूर्तंमन्यमानावरिष्टंनान्यदभेयोऽभिनंदंतिमूढाः नाकस्यपृष्टेते सुकृतेनभूत्वा इमंलोकंहीननरंवाविशंतीति बंधाच्च प्रेत्यसंसरणरूपःसंसारः प्रवर्त्तते सांख्यमते च पुरुषस्य प्रकृतिविरूत्यनात्मकस्यनबंधमोक्षसंभवः किंतुप्रकृतेरेवनथाचरूपिणाः ।। तस्मान्नबध्यतेनेत्यमुच्यते नापिसंसरतिकश्चित् संसरतिबध्यतेमुच्यतेचनानाश्रयाप्रकृतिरिति नवरममीबंधमोक्षसंसाराः पुरुषेउपचर्यंते यथाजयपराजयौभृत्यगतावपिस्वामिन्युपचर्येते तत्फलस्यकोशलाभादेःस्वामिनिबंधनात् तथा भोगापवर्गौप्रकृतिगतावपिविवेकाग्रहात् पुरुषेसंबंधइति ।। अथप्रमाणस्यसामान्यंलक्षणमुच्यते अर्थापत्तिहेतुःप्रमाणमिति अथात्तरार्थमानत्रितयंचप्रमाणत्रयंचात्रसोक्तमतः किंनेदित्याह ॥ प्रत्यक्षंप्रतीतंलैंगिकमनुमानं शाब्दंचागमः चकारोऽत्रापिसंबंधनीयः तत्रप्रत्यक्षलक्षणमाख्यायते श्रोत्रादिवृत्तिरविकल्पिकाप्रत्यक्षमिति श्रोत्रंत्वक् चक्षुर्जिह्वानासिकाचेतिपंचमीति श्रोत्रादीनींद्रियाणितेषांवृत्तिर्वर्त्तनं परिणामइतियावत इंद्रियाण्येवविषयाकारपरिणतानिप्रत्यक्षमितिहितेषांमिद्धांतः अविकल्पिकानाम जात्यादिकल्पनारहिताशाक्यमताध्यक्षमति नद्व्याख्येयेतिईश्वरकृष्णस्तुप्रतिनियताध्यवसायःश्रोत्रादि स्वमुत्थोऽध्यक्षमितिप्राह अनुमानस्यतिदंलक्षणं पूर्ववच्छेषवत्सामान्यतोदृष्टंचेतित्रिविधमनुमानमिति तत्रनद्युन्नतिदर्शनात् उपरिवृष्टोदेवः इत्यनुमीयते यत्तत्पूर्ववत् तथासमुद्रोदकविंदुग्राशनात् शेषंजलं क्षारं अनुमाननज्ञायते तथास्थात्यांमिश्रीकर्चंपनात् शेषमन्नंपक्वंनातायते तत् शेषवत् २ यत्सामान्यतोदृष्टंतल्लिंगिपूर्वकंयत्राग्निरंडदर्शनादृष्टोलिंगीपरिव्राजकोस्तीत्यवगम्यते ३ इतित्रिविधं ।। अथवातल्लिंगलिंगिपूर्वकमित्येवानुमानं लक्षणं सांख्येसमाख्यायते शाब्दंत्वाप्तश्रुतिवचनं आप्तारागद्वेषा

रिरहिता ब्रह्मसनत्कुमारादयः श्रुतिर्वेदस्तेषां वचनंशाब्दं अत्रानुक्तमपिकिंचिदुच्यते चिच्छक्तिर्विषयपरिछेदशू न्यार्थंजानाति बुद्धिश्च जडानचेतयते संनिधानान्नयोरन्यथाप्रतिभासनं प्रकृत्यात्मसंयोगात्सृष्टि रुपजायते प्रकृतिविकारस्वरूपं कर्म तथाचैगुण्यरूपंसामान्यंप्रमाणविषयस्तात्त्विकइति अत्रत्रयोगुणाः सत्वरजस्तमांसि तत्रस्वार्थे ष्यो नंदादिनिष्यः यथात्रयोलोकास्त्रैलोक्यं अत्रगुणाः षाड्गुण्यं तत्रत्रैगुण्यं स्वरूपंस्वभावोयस्यसामान्यस्य तत्रैरूपगुण्यमिति प्रमाणस्यफलमित्थं पूर्वं २ प्रमाणंउत्तरंतुफलमिति तथाकारणेकार्यं सदेवोत्पद्यते ः सत्कारणाभ्यांदिहेतुभ्यः तदुक्तं असत्कारणादुपादानग्रहणात् सर्वसंभवाभावात् शक्तस्यशक्यकरणात्कारणभावाच्च सत्कार्यं ॥१ इति ।। अत्रसर्वसंभवादिति यदिह्यसत्कार्यं स्यात्तदैतत्सर्वं सर्वत्रभवेत् ततश्चतृणादिभ्योपिसु अ वर्णादीनि भवेयुः नचभवंति तस्मात्कारणे कार्यं सदेवतथाद्रव्याण्येवकेवलानिसंति नपुनरुत्पत्तिविपत्तिधर्माणः त्रयायाः केपि अविर्भावंतिरोभावमात्रंत्वात्तेषामिति संख्यानांतर्कग्रंथाः पठितंगौडद्वारूपं माठरभाष्यं सांख्यसप्ततिनामकंतत्त्वकौमुदीगौडपादं आत्रेयतंत्रंचेत्यादयः ॥४३ सांख्यमतमुपसंजिहीर्षुरुत्तरत्रजैनमतमभिधित्सन्नाह ॥ एवंसांख्यमतस्यापि समासयोगदितोः धुना ।। जैनधर्मनसंक्षेपः कथ्यतेसुविचारवान् ।। ४४ ।। एवमुक्तविधिनासांख्यमतस्यापि नकेवलंबोद्धनैयायिकयोरित्यपिशब्दार्थः समासः संक्षेपोऽधुनागदितः जैनदर्शनसंक्षेपः कथ्यते कथंभूतः सुविचारवान् सुष्ठुसर्वप्रमाणेरबाधितस्वरूपत्वेनशोभनाविचाराः सुविचारास्ते विद्यंतेयस्यससुविचारवान् नपुनरविचारितरमणीयविचारवानिति अनेनापरदर्शनान्यविचारितरमणीयानि इत्यावेदितंमंतव्यंयदुक्तंपरैरेवं पुराणंमानवोधर्मः सांगोवेदश्चिकित्सितं आज्ञासिद्धानिचत्वारिनहंतव्यानिहेतुभिः ॥१ परैर्हिदोषसंभावनयेवस्वमतविचारणानादियते ॥ यदुक्तं आलोच्यकथ्यतांकाचिन्नेनेदंनविचार्यते निर्दोषंकांचनंचेत्स्यात् परीक्षायांविभेतिकिं ॥१ इति अतएवजैनाजिनमतस्यनिर्दूषण

तथापरीक्षातोनिर्भीकारवमुपदिशंति सर्वथास्वदर्शनपक्षपातंपरित्यज्यमाध्यस्थेनैवयुक्तिशतैः सर्वदर्शनानिषु
नर्विचारणीयानि येषुचयदेवदर्शनंयुक्तियुक्तंतथाचभासतेयत्रचपूर्वापरैर्विरोधगंधोपिनेक्ष्यतेतदेवविशारदै
रादरणीयंनापरमिति तथाचोक्तं पक्षपातोनमेवीरे नद्वेषःकपिलादिषु युक्तिमद्वचनंयस्यतस्यकार्यःपरिग्रहः
इति ॥१॥ इतिश्रीतपागगनांगणनभोमणि षड्दर्शनसमुच्चयवृत्तौसांख्यमतरहस्यप्रकटनोनाम तृतीयोऽधिकारः
॥ अथदीजैनमतेलिंगवेषाचारादिप्रोच्यते ॥ जैनादिविधाः श्वेतांबरदिगंबराश्च तत्रश्वेतांबराणां रजोहरण मुख
वस्त्रिका लोचादिलिंगं शीलपट्टकल्पादिकोवेषः पंचसमितयास्तिस्रश्चगुप्तयस्तेषांआचारः ईर्याभाषैषणादाननि
क्षेपोत्सर्गसंज्ञिका ॥ पंचाहुः समितीस्तिस्रोगुप्तीस्त्रियोगनिग्रहादितिवचनात् अहिंसासत्यास्तेयब्रह्माकिंचिन्य
वाच कोधादिविजयी शांतेंद्रियो निर्ग्रंथोगुरुः माधुकर्यावृत्त्यानवकोटीविशुद्धभिक्षाणां नित्यमाहारः संयमनिर्वाहार्थमे
ववस्त्रपात्रादिधारणं वंद्यमानाधर्मलाभमाचक्षते ॥ दिगंबराः पुनर्नाग्न्यलिंगाः पाणिपात्राश्चतेचतुर्द्धा काष्ठसंघ१ मू
लसंघ२ माथुरसंघ३ गोप्यसंघ४ भेदात् काष्ठासंघेचमरीबालैः पिछिका१ मूलसंघेमायुरपिछैःपिछिका२
माथुरसंघेमूलतोपिपिछिकानादृता३ गोप्यामायूरपिछिकाआर्यास्त्रयोपिसंघाः वंद्यमानाधर्मवृद्धिं भणंति
स्त्रीणांमुक्तिं केवलिनांभुक्तिं सद्भूतस्यापिसचीवरस्यमुक्तिंचनमन्यंते गोप्यास्तुवंद्यमानाधर्मलाभं भणंति स्त्रीणां
मुक्तिं केवलिनांभुक्तिंचमन्यंते गोप्यायापनीया इत्युच्यंते सर्वेषांचाभिक्षाटने भोजनेच द्वात्रिंशदंतराया मलाश्च
नुर्दशवर्जनीयाः शेषमाचारेगुरौचदेवेचसर्वैश्वेतांबरैस्तुल्यं नास्तिलेषांमिथःशास्त्रेषुतर्केष्वपरोभेदः ४४ अथ
देवस्यलक्षणमाह ॥ जिनेंद्रोदेवतातत्वरागद्वेषविवर्जितः हतमोहमहामल्लः केवलज्ञानदर्शनः ॥४५॥ सुग
तुरेंद्रमंपूज्यः सद्भूतार्थप्रकाशकः ॥ कृत्स्नकर्मक्षयंकृत्वापरमंपदंसंप्राप्तइतिसंबंधः कीदृशःसन्याह ॥ रागद्वेषविवर्जि
तः मायालोभोरागः क्रोधमानोद्वेषः रागद्वेषाभ्यां विशेषेण पुनरपुनर्भावेन विवर्जितोरहितो रागद्वेषविवर्जितो
वीतरागइत्यर्थः रागद्वेषोहि दुर्जयोयो दुरंतभवसंपातहेतुतयाचमुक्तिप्रविरोधकोसमयेप्रसिद्धो यदाह कोदुक्खं
पाविज्जाकस्सवसुरकेहिंविम्हउडुज्जा कोयनलहिज्जामुक्खं रागद्दोसाजइनहुज्जा ॥१ इति तत्स्वरूपोर्विशेषउक्तस्तथा
हतमोहमहामल्लः मोहनीयकर्मोदयाद्धि साध्यात्मकशास्त्रेभ्योपि मुक्तिकांक्षणादिध्यामोहो मोहः सएवसकलजग
द्दुर्जयत्वेन महामल्लइवमहामल्लः हतोमोहमहामल्लोयेनसतथा एतेनविशेषणद्वयेन देवस्यापायापगमा
तिशयोध्वंजितोद्रष्टव्यस्तथारागद्वेषमहामोहरहितोर्हन्नेवदेवइतिज्ञापितंच यदुक्तंचैरागोंगनासंगमतोनु
मेयोद्वेषोहिषहारणहेतिगम्यः मोहःकुवृत्तामदोषसाध्योनोयस्यदेवः ससचैवमर्हन् ॥१ इति॥ केवलेअ
न्यज्ञानानपेक्षत्वेनासहाये संपूर्णेवाज्ञानदर्शनेयस्य सतथा केवलज्ञानकेवलदर्शनात्मकोहिभगवान् करतल
कलितामलकफलवद्द्रव्यपर्यायात्मकंनिखिलमनवरतंजगत्स्वरूपंजानातिपश्यतिचेति केवलज्ञानदर्शन इ
तिपदंसाभिप्रायं छद्मस्थस्यहि प्रथमंदर्शनमुत्पद्यते ततोज्ञानं केवलिनस्त्वादौज्ञानंततोदर्शनमिति तत्रसामान्य
विशेषात्मके पूर्वस्मिन् प्रमेयवस्तुनि सामान्यस्योपसर्जनीभावेनविशेषाणांचप्रधानभावेनचयद्ग्राहकं तज्ज्ञान
विशेषाणामुपसर्जनीभावेन सामान्यस्यचैंप्राधान्येनयद्ग्राहकं तद्दर्शनं एतेनविशेषणेन ज्ञानातिशयः साक्षा दु
क्तोऽवगंतव्यः तथासुराः सर्वेदेवाः असुराश्चदैत्याः सुरशब्देनासुराणां संग्रहेणापि पृथगुपादानंलोकरूढ्या ज्ञात
व्यं लोकोहि देवेभ्यो दानवांस्तद्विपक्षत्वेन पृथग्निर्दिशतीति तेषांमिंद्राः स्वामिनस्तेषांतैर्वा संपूज्योऽभ्यर्च्यनी
यः तारेशैरपिपूज्यस्यमानवतिर्यक्खचरकिंनरादिनिकरसेव्यत्वमानुषंगिकमिति अनेनपूजातिशयउक्तः
तथा सद्भूतयथावस्थिता येऽर्थाजीवादयःपदार्थास्तेषां प्रकाशकः उपदेशकः अनेनवचनातिशयउक्तः तथाकृत्स्ना

LIBRARY ACHARYA SHRI VIJAY DARSHAN SURI MEMORIAL DR. BHANU DAVE

नि संपूर्णानि घात्यघातीनि कर्माणि ज्ञानावरणादीनि तेषां क्षयः सर्वथाप्रलयः तं कृत्वा परमं पदं सिद्धिं संप्राप्त एतेन कृत्स्न कर्मक्षयलक्षणा सिद्धावस्थाऽभिहिते अपरे हि सुगतादयो मोक्षमवाप्यापि तीर्थनिकरादि संभवे भूयो भव मवतरंति यदाहुरन्ये ज्ञानिनो धर्मतीर्थस्य कर्तारः परमं पदं गत्वागच्छंति भूयोपि भवंती र्थनिकारत इति ततः परमार्थतो मोक्षगतिभाजः कर्मक्षयाभावात् नहि मक्तवतः कर्मक्षयेपुनर्भवावतारः यदुक्तं॥ दग्धे बीजे यथात्यंतं प्रादुर्भवति नांकुरः कर्मबीजे तथा दग्धे नारोहति भवांकुरः॥१ उक्तं च श्रीसिद्धसेनदिवाकरपादैरपि भवाभिनंदिमुखानां प्रबलमोहविजृंभितं दग्धेंधनः पुनरुपैति भवं प्रमथ्य निर्वाणमप्यनवधारितभीरनिदं मुक्तः स्वयं कृतनुश्च पराधशूरस्त्वाध्यास न प्रतिहतेस्त्विह मोहरात्रयं॥१ इत्यलं विस्तरेण॥ तदेवमेभिश्चतुर्भिर्गतिशेषैः सनाथोमुक्तश्च योदेवाभवति सएवदेवत्वेनाश्रयणीयः सएवचपरानसिद्धिं प्रापयति नपुनरितः सरागोभवेः बतारधांश्चदेव इत्यावेदितं भवेतव्यं ननुमा भूत् सुगतादिको देवोजगत्सृष्टास्त्वीश्वरः किमितिनांगीक्रियते तत्साधकप्रमाणाभावादिति ब्रूमोवयं स्येवतत्साधकं प्रमाणं क्षित्यादिकं बुद्धिमत्कर्तृकं कार्यत्वाद्घटादिवत् नचायमसिद्धोहेतुः क्षित्यादेः सावयवत्वेनकार्यत्वप्रसिद्धेरथाहि उर्वीपर्वततर्वादिकं सर्वं कार्यं सावयवत्वात् नापिविरुद्धो निश्चितकर्तृकेघटादौ कार्यत्वदर्शनात् नाप्यनैकांतिकोनिश्चिताऽकर्तृकेभ्योव्योमादिभ्यो व्यावर्तमानत्वात् नापिकालात्ययापदिष्टः प्रत्यक्षागमाबाधितविषयत्वात् नचबाध्यंघटकर्तादिदृष्टांतस्य सर्वज्ञत्वाऽसर्वकर्तृकत्वादि धर्मानुरोधेन सर्वज्ञादिविशेषणविशिष्टसाध्यविपर्ययसाधनोद्भूतो हेतुर्दृष्टांतश्च साध्यविकलो घटादौ तथाभूतबुद्धिमतोऽभावादिति यतः साध्यसाधनयोर्विशेषेण व्याप्तौ गृह्यमाणायां सकलानुमानोच्छेदप्रसक्तिः किंतु सामान्येनान्वयव्यतिरेकाभ्यां हि व्याप्तिरवधार्यते तौचानेत्याहव्यभिचाराच्च विशेषेषु गृहीतुं नशक्यौ तेनबुद्धिमत्पूर्वकत्वमात्रेण कार्यत्वस्य व्याप्तिः प्रत्येतव्या नशरीरित्वादिना नखलु कर्तृत्वसामग्र्यां शरीरमुपयुज्यते तद्व्यतिरेकेणापि ज्ञानेच्छाप्रयत्नाश्रयत्वेन

स्वशरीरेण कर्तृत्वोपलंभात् अकिंचित्करस्यापि सहचरत्वमात्रेण कारणत्वेवह्नेर्गत्यापि धूमंप्रति कारणत्वप्रसंगस्या स्यात् दृश्यमानेपिहि शरीरज्ञानादीनां समस्तानां व्यस्तानां वाऽभावे कुलालादावपि कर्तृत्वं नोपलभ्यते अथमंहि कार्योत्पादकं कारणकलापस्तानं ततःकरणेछा॥ ततः प्रयत्न स्ततः फलनिष्पत्तिरित्यमीषां समुदितानामेव कार्यकर्तृत्वे सर्वज्ञाद्यपिचारः सर्वज्ञतोवास्यास्मिंस्तेकार्यकर्तृत्वात् सिद्धा नयोगः पीश्वरः सर्वज्ञोऽखिलक्षित्यादि कार्यकर्तृत्वात् योहियस्यकर्त्ता सतदुपादानाद्यभिज्ञो यथाघटोत्पादकः कुलालोमृत्पिंडाद्यभिज्ञो जगतः कर्त्ताचायं तस्मात्सर्वज्ञइति प्रयोगेहि जगतः पार्थिवाप्यतेजसवायवीयखलक्षणाश्चतुर्विधाः परमाणवोनित्यनिमित्तकारणमरुद्यादिभोक्तात्मा भोग्यंतत्वादि नचेतदनभिज्ञस्यक्षित्यादौ कर्तृत्वं संभवत्यस्मदादिवत् नचेतदीयज्ञानादयोनित्याः कुलालादिज्ञानादिभ्योविलक्षणत्वात् एकत्वंचक्षित्यादिकर्तुरनेककर्तृणामेकाधिष्ठातृनियमितानां प्रवृत्त्युपपत्तेः सिद्धं प्रसिद्धाहिस्थपत्यादीनामेकमूलधारचरतंत्राणां महाप्रासादादि कार्यकरणे प्रवृत्तिः नचेश्वरस्यैकरूपत्वेनित्यत्वेन कार्याणां कदाचित्कत्वं वैचित्र्यंचविरुध्यते इतिवाच्यं कदाचित्कविचित्रसहकारिलाभेनकार्याणां कदाचित्कत्व वैचित्र्यसिद्धेविरोधाभावात् ननुक्षित्यादेर्बुद्धिमद्धेतुकत्वेः क्रियादर्शिनोपिजीर्णकूपादिष्वकृतबुद्धिरुत्प्रेक्षते नचात्रसोत्प्रेक्षमाणादृष्टांतदृष्टस्यहेतोर्धर्मिण्यभावादसिद्धत्वं तदप्ययुक्तं यतः प्रामाणिकमितरंवा प्रेक्षेदमुच्येत यदीतरंतर्हि धूमादावप्यसिद्धत्वानुषंगः प्रामाणिकस्यतुनासिद्धत्वं कार्यत्वस्यबुद्धिमत्कर्तृपूर्वकत्वेन प्रतिपन्नाक्षित्यादौ प्रसिद्धे पर्वतादौ धूमादिवत् नचयावंतः पदार्थाः कृतकास्तावंतः कृतःकृतबुद्धिमात्मन्याविर्भावयतीतिनियमोस्ति स्वात्मप्रतिपूरितायां भुव्यः क्रियादर्शिनः कृतबुद्ध्युत्पादाभावात् किंचबुद्धिमत्कारणाभावोऽनुपलब्धितोभवताप्रसाध्यते एतच्चायुक्तं दृश्यानुपलब्धेरभावसाधकत्वोपपत्तेर्नचयमबसंभवति जगत्कर्तुरदृश्यत्वात् अनुपलब्धस्यचाभावसाध्यत्वेपिशाचादिरपि तत्प्रसक्तिः स्यादि

ति अत्रप्रतिविधीयते तत्रयत्नावकृत्यादेर्बुद्धिमद्धेतुकत्वसिद्धये कार्यत्वसाधनमुक्तं तत्किं सावयवत्वं १ आगमतः स्वकारणसत्तासमवायः २ कृतमिति प्रत्ययविषयत्वं ३ विकारित्वं ४ आद्यात्तु यदि सावयवत्वं तदेदमपिकिमवयवेषु वर्त्तमानत्व अवयवैरारभ्यमाणत्वं २ प्रदेशवत्वं ३ सावयवमिति बुद्धिविषयत्वंवा ४ तत्राद्यपक्षे अवयवसामान्येनानैकांतिकोयं हेतु स्तद्व्यवयवेषु वर्त्तमानमपि निरवयवमकार्यंचभ्रोच्यते द्वितीयपक्षे तुसाध्यसमोहेतुर्यथैवक्षित्यादेः कार्यत्वं साध्यमेवं परमाण्वाद्यवयवारभ्यत्वमपि तृतीयोप्याकाशेनानैकांतिक तस्यप्रदेशवत्वेप्य कार्यत्वात् साधयिष्यते चायतोऽस्यप्रदेशवत्वं चतुर्थकक्षाधामपितेनैवानैकांतो नचास्य निरवयवत्वं व्यापित्वविशेषात् परमाणुवत् नापिआगमतः स्वकारण सत्ता समवायः कार्यत्वंतस्य नित्यत्वेन तद्धक्षणयोगात् तद्धक्षणयोगेवा कार्यस्यापिक्षित्यादेस्तद्वन्नित्यत्वानुषंगात्कस्य बुद्धिमद्धेतुकत्वंसाध्यते किंचयोगिनांमशेषकर्मक्षयेपक्षेतः चातिन्यः प्रध्वंसत्वेन भागासिद्धोयं हेतु स्तत्प्रक्षस्यैयेप्रध्वंसाभावरूपत्वेनसत्तास्वकारणसमवाययोरभावात् ॥२ कृतमित्यप्रत्यय विषयत्वमपिन कार्यत्वं खननोत्खेचमादिना कृतमाकाशमित्यस्यकार्यस्याकाशेवर्त्तमानत्वेनानैकांतिकत्वात् ३ विकारित्वस्यापि कार्यत्वेमहेश्वरस्यापि कार्यत्वानुषंगः सतोवस्तुनोऽन्यथाभावोहि विकारित्वं तच्चेश्वरस्याप्यस्तीत्यस्यापरबुद्धिमद्धेतुकत्वप्रसंगादनवस्थास्यात् दविकारित्वेवास्य कार्यकारित्वमतिदुर्घटमिति कार्यस्वरूपस्य विचार्यमाणस्यानुपपद्यमानत्वादसिद्धः कार्यत्वादित्ययंहेतुः किंच कदाचित्कं वस्तुलोकेकार्यत्वेनप्रसिद्धं जगतस्तु महेश्वरवत् सदासत्वात् कथंकार्यत्वं तदंतर्गततरुतृणादीनां कार्यत्वात् कस्यापिकार्यत्वं महेश्वरांतर्गतानां बुध्यादीनां परमाण्वाद्यंतर्गतानां पाकजरूपादीनांच कार्यत्वात् महेश्वरादेरपि कार्यत्वानुषंग स्तथाचास्याप्यपरबुद्धिमद्धेतु ककल्पनायामनवस्थाऽथासिद्धांतश्चानुषज्येते अस्तुवायथाकथंचिन्नगतः कार्यत्वं तथापि कार्यत्वमात्रमत्रहेतुत्वेनविवक्षितं नद्विशेषोवायथाह्यस्तर्हिनततो बुद्धिमत्कर्तृविशे

षसिद्धिः तेनसमंव्याप्त्यसिद्धेः किंतु कर्तृसामान्यस्य तथात्वहेतोरकिंचित्करत्वं साध्यविरुद्धसाधनाद्विरुद्धत्वंवा ततः कार्यत्वं कृतबुद्ध्युत्पादकंबुद्धिमत्कर्तृगमकं नसर्वंसारूप्यमात्रेणगमकत्वेवाह्याद्देरप्यग्निं प्रतिगमकत्वप्रसंगो महेश्वरंप्रत्यात्मत्वादेः सादृश्यात् संसारित्वं किंविज्ञात्वाऽखिलजगत्कर्तृत्वानुमापकानुषंगस्तुल्यक्षेपसमाधानत्वात् ततोवाप्य धूमयोः केनचिदंशेन सम्येपि यथाकृतभिदिहिशेषाद्धूमोऽग्निंगमयतिनवाप्यादि रुथाक्षित्यादीतरकार्यत्वयोरपि कश्चिद्विशेषोऽभ्युपगम्यः अथद्वितीयस्तर्हिहेतोरसिद्धत्वं कार्यविशेषस्याभावाद्धावेवाजीर्णकूपप्रासादवदः किंवादर्शिनोपि कृतबुद्ध्युत्पादकत्वैवप्रसंगः समारोपान्नेतिचेत् सोप्युभयत्राविशेषतः किंच स्यात् उभयत्रकर्तुरतींद्रियत्वाविशेषात् अथप्रामाणिकस्यास्तेयात्र कृतबुद्धिर्नानुकथं तस्य कृतकत्वावगमोऽनेनानुमानेनानुमानांतरेणवा आद्येऽन्योन्याश्रयः रुथाहि सिद्धविशेषणाद्धेतोरस्योत्थानं तदुत्थानेवहेतोर्विशेषणसिद्धिरितिद्वितीयपक्षेऽनुमानांतरस्यापि सविशेषणहेतोरेवोत्थानं तत्राप्यनुमानांतरसिद्धावनवस्थातनकृतबुद्ध्युत्पादकत्वविशेषणसिद्धिस्तथाचविशेषणासिद्धत्वं हेतोर्यदुच्यतेग्रातप्रतिपूरितभूमिदर्शनेन कृतकानामात्मविकृतबुद्ध्युत्पादकत्वनियमाभावइति तदप्य सत्तथाकृत्रिमभूभागादि सारूप्यस्य तदनुत्पादकस्य सद्भावात् तदनुत्पादस्योपपत्तेर्नचक्षित्यादावप्य कृत्रिमसंस्थानसारूप्यमस्ति येनाकृत्रिमत्वबुद्धिरुत्पद्येत तस्येवानभ्युपगमेवाऽसिद्धांतः प्रशक्तिःस्यादिति कृतबुद्ध्युत्पादकत्वरूपविशेषणासिद्धिर्विशेषणासिद्धत्वंहेतोः सिध्यतुवा तथाप्यसौविरुद्धोघयदाविवशरीरादि विशिष्टस्यैवबुद्धिमत्कर्तृत्वप्रसाधनात् नन्वेवं दृष्टांतदार्ष्टांतिकसाध्यान्वेषणेसर्वत्रहेतुनामनुपपत्तिरितिचेन्न धूमायनुमानेमहानसेतरसाधारण्याग्नेः प्रतिपत्तेरभाव्येवं बुद्धिमत्सामान्यप्रसिद्धेर्नविरुद्धत्वमित्यप्ययुक्तं दृश्यविशेषाधारस्येवंतत्सामान्यस्य कार्यत्वहेतोः प्रसिद्धेर्नादृश्य विशेषाधारस्यतस्य स्वप्नाप्रतीतेः खरविषाणाधार

तत्सामान्यवत्तद्योदृशात्कारणादृशं कार्यमुपलब्धं तादृशादेवतादृशमनुमातव्यं यथायादृर्मात्मकाद्धेर्यादृर्मात्मकस्य धूमस्योत्पत्तिः सुदृष्टप्रमाणात्प्रतिपन्ना तादृशादेवधूमात्तादृशस्येत्यग्नेरनुमानमित्येतेनसाध्यसाधनयोर्विशेषणं व्याप्तेरुपलक्षणं व्याप्तिग्रहणायां सर्वानुमानोच्छेदप्रसक्तिरित्यादयापास्तंद्रष्टव्यमिति तथाऽनेकप्रभवैस्तृणादिभिर्यभिचार्ययंहेतुर्विरुद्धानिकार्याण्युपलभ्यंते कानिचिद्बुद्धिमत्पूर्वकाणि यथाघटादीनि कानिचिन्नबुद्धिपूर्वकाणि यथाअनेकप्रभवतृणादीनि तेषांपक्षीकरणाद्व्यभिचारेसत्यामस्तत्पूर्वत्वादितरतत्पूर्वकादित्यादेरेपिगमकत्वप्रसंगान्नकश्चिद्धेतुर्व्यभिचारीस्याद्व्यभिचारविषयस्यसर्वस्यापिपक्षीकर्तुं शक्यत्वात् ईश्वरंधुआदिभिश्चव्यभिचारस्तेषांकार्यत्वेसत्यपि समवायिकारणादीश्वराद्धिभिन्नबुद्धिमत्पूर्वकत्वाभावात् तदभ्युपगमेनाऽनवस्थातथाकालात्ययापदिष्टश्चायमनेकप्रभवोकुविंदोकर्त्राभावस्याध्यक्षेणाध्यवसायात् अग्नेरनुष्णत्वेसाध्येद्रव्यत्ववत् ननुतत्राप्यदृश्यईश्वरएवकर्त्तेतिचेन्न यतस्तत्तत्सद्भावः स्यादेवान्यथोवा प्रमाणात्सिद्धेन् प्रथमपक्षेचकृतमतोहितत्सद्भावसिद्धे सादृश्यवनानुभवसंभवसिद्धि स्तत्सिद्धौच कालात्ययापदिष्टत्वाभावतत्तश्चात्मात् तत्सद्भावसिद्धिरितिद्वितीयपक्षोप्ययुक्तस्तद्भावावेदकस्य प्रमाणांतरस्येवा
२५ भावात् अस्तुवा तत्रतत्सद्भावसाध्यस्यादृष्टेशरीराभावः कारणेविशादिप्रभवोजातिविशेषोवा प्रथमपक्षे कर्तृत्वानुपपत्तिरशरीरत्वान्मुक्तात्मवत्ननुशरीराभावेपिज्ञानेच्छाप्रयत्नाश्रयत्वेनस्वशरीरकरणेकर्तृत्वमुपपद्यते इत्यस्यासमीक्षिताभिधानं शरीरसंबंधेनैवतत्प्रेरणोपपत्तेः शरीराभावेमुक्तात्मवत् तदसंभवात् शरीराभावेचज्ञानाद्याश्रयत्वमप्यसंभाव्यं तदुत्पत्तावस्यनिमित्तकारणत्वात् अन्यथामुक्तात्मनोपितदुत्पत्तिप्रसक्तेर्विशादिप्रभवस्यचादृश्यत्वहेतुत्वेकदाचिदसादृश्यंते नखलुविशाभृतां शश्वतिकमदृश्यंत्वंदृश्येपिशाद्विजातिविशेषोपिनादृश्यत्वे हेतुरेकस्य जातिविशेषाभावादनेकव्यक्तिनिष्ठत्वात्तस्य

अस्तुतादृशोवाऽसौतथापिकिंसत्तामात्रेण १ ज्ञानवत्त्वेन २ ज्ञानेच्छाप्रयत्नवत्त्वेन ३ तत्पूर्वकव्यापारेण ४ ऐश्वर्येण ५ वास्त्यादेः कारणंस्यान्नाद्यपक्षेकुलालादीनामपिजगत्कर्तृत्वमनुषज्यतेसत्त्वादिविशेषात् १ द्वितीयतु योगिनामपिकर्तृत्वापत्तेः २ तृतीयोप्यसंप्रतिपन्नोऽशरीरस्य पूर्वमेवज्ञानाद्याश्रयत्वप्रतिषेधात् ३ चतुर्थेप्यसंभाव्योऽशरीरस्यकायवाक्कृतव्यापारवत्तासंभवात् ४ ऐश्वर्यमपिज्ञातृत्वंकर्तृत्वमन्यद्वाज्ञातृत्वंचेत्तत्किंज्ञातृत्वमात्रं सर्वज्ञातृत्वंवा आद्यपक्षेत्तावत्सोस्मदादयन्यज्ञातृवत् द्वितीयेप्यस्यसर्वज्ञत्वमयेस्यान्नैश्वर्यसुगतादिवत् अथकर्तृत्वंतर्हिकुंभकारादीनामनेककार्यकारिणामैश्वर्यप्रसक्तिर्नाप्यन्यदिज्ञानप्रयत्नव्यतिरेकेणान्यस्यैश्वर्यनिबंधनस्यैश्वरोभावात् किंचेश्वरस्यजगन्निर्माणेयंरुचिरुत्पद्यते १ कर्मपारतंत्र्येण २ करुणया ३ क्रीडया ४ निग्रहानुग्रहविधानार्थं ५ स्वभावतोवा ६ तत्रायविकल्पेचिदादृश्येवसृष्टिःस्यात् द्वितीयस्त्वनेकव्याहानि स्तृतीये सर्वमपिजगत् सुखितमेवकुर्यात् अथेश्वरः किंकरोति पूर्वार्जितैरेवकर्मभिर्वशिकृता दुःखमनुभवंतितदातस्यकः पुरुषाकारोदृष्टापेक्षस्यचकर्तृत्वेकिंतत्कल्पनयाजगतस्तदधीनतेवास्तु ३ किमनिर्मोक्षचतुर्थपक्षमयोसुधीतरागद्वेषताभावः प्रसज्यते ॥ तथाहि ॥ रागवानीश्वरः क्रीडाकारित्वाद्बालवत्तथाऽनुग्रहप्रदत्वाद्राजवत्तथाद्वेषवान्नरकादिनिग्रहप्रदत्वात्स्वद्वेषीवेति अथस्वभावतस्तर्हि अचेतनस्यापिजगत्कारणस्वभावतः प्रवृत्तिरस्तु किंतत्कर्तृकल्पनयेतिन कार्यलिंगहेतु बुद्धिमंतंकर्तारमीश्वरं साधयत्येवेतिनियमेशविशिष्टत्वाद्धेतोनोपादानत्वादभूतभावित्वादित्यादयोपि स्वयमुत्थाप्य स्वयाक्षेपसमाधानत्वात् किंचसित्पादेर्बुद्धिमत्पूर्वकत्वेसाध्येप्रतीयमानाः सर्वेपिहेतवोविरुद्धा दृष्टांतानुग्रहेणसशरीरासर्वज्ञकर्तृपूर्वकत्वसाधनात्तानच धूमात्याद्यकानुमानेव्यभिचारोप्यस्तत्रतार्णादिविशाधारयन्हिमानव्याप्तस्य धूमस्य २ दर्शनात्तेनैवमत्रसर्वज्ञकर्तृविशेषाधिकरणतत्सामान्येनकार्यत्वस्यास्तिव्याप्तिः सर्वज्ञस्यकर्तुरतोऽनुमानात् आगमसिद्धेर्व्याप्तिश्चा

रिणश्चात्मा बुद्धिमंतमंतरेणापि विद्युदादीनां प्रादुर्भाववि भावनात् स्वप्नावस्थायामबुद्धिमत्पूर्वकस्यापि कार्यस्य दर्शनाच्चेति कालात्ययापदिष्टश्चैतेनप्रत्यक्षागमबाधितपक्षानंतरंप्रयुक्तत्वात् तद्ग्राहकप्रमाणाभावाच्च पूर्वमेवदर्शितत्वात् प्रकरणसमश्चात्मा प्रकरणाचिंताप्रवर्त्तकानांहेतूनांसद्भावात्तथाहि ईश्वरोजगत्कर्त्तानभवति निरुपकरणत्वात् दंडचक्रवीवशरीरकरणरहितकुलालवत् तथाव्यापित्वादाकाशवत् एककत्वान्नद्वित्वादयइतिनित्यत्वादीविशेषणानिवस्त्ववस्थापनायानीयमानानिशरीरं प्रतिकामित्वारूपसंपन्निरूपणप्रायाण्यपकर्णनीयान्येवविचारासहत्वख्यापनार्थंतुकिंचिदुच्यते तत्रादौनित्यत्वंविचार्यते तच्चेश्वरेणघटते तथाहिनश्वरोनित्यः स्वभावभेदेनैवक्षित्यादिकार्यकर्तृत्वात् अप्रच्युतानुत्पन्नस्थिरैकस्वभावंकूटस्थंनित्यमितिहिनित्यत्वलक्षणाभ्युपगमात् स्वभावभेदानभ्युपगमेचसृष्टिसंहारादिविरुद्धकार्यकारित्वमतिदुर्घटंनापितज्ञानादीनां नित्यत्वंवाच्यं प्रतीतिविरोधात् ईश्वरज्ञानादयोनित्याज्ञानादित्वात् अस्मदादिज्ञानादिवदित्यनुमानविरोधाच्चैतेनतदीयज्ञानादयोनित्यादिपदवादितयोहितमूहनीयं सर्वज्ञत्वमप्यस्यकेनचप्रमाणेनग्राह्यं नतावत्प्रत्यक्षेणतस्येंद्रियार्थसन्निकर्षोत्पन्नत्वेनातींद्रियार्थग्रहणासमर्थत्वात् नाप्यनुमानेनाव्यभिचारिलिंगाभावात् ननुजगद्वैचित्र्यान्यथानुपपत्तिरूपंतदस्त्येवतिचेन्नतेनसहाविनाभावात् जगद्वैचित्र्यस्यसार्वज्ञंविनापिशुभाशुभकर्मपरिपाकादिवशेनोपपद्यमानत्वात् किंचायंयदिसर्वज्ञस्तदाजगदुपादानकारणस्वेरिणः पश्चादपिकर्त्तव्यनियहानसुखादींस्तदधिशेषतोऽस्मदादींश्चकिमर्थंसृजतीतिनायंसर्वज्ञः तथाबहूनामेककार्यकरणेवैमत्यसंभावनाभयेनमहेश्वरस्यैककल्पनादौव्ययभयात् कृपणस्यात्यंतवल्लभपुत्रकलत्रमित्रादित्यजनेनशून्यारण्यानीसेवनमाकलयति अनेकक्रीटिकासरघाशतसंपाद्यत्वेपिशर्करामूर्द्धमधुछत्रादिकार्याणामेकरूपतयाऽविगानेनोपलंभात् किंचेश्वरस्यापिनित्यजगत्कर्तृत्वेऽभ्युपग

म्यमाने शास्त्राणांप्रमाणेतरतात्व्यवस्थाविलोपःस्यात्तथाहि ॥ सर्वेप्रमाणंशास्त्रमीश्वरप्रणीतत्वादितरत्प्रणीतशास्त्रवत् प्रतिभाद्यादिव्यवस्थाविलोपश्च सर्वेषामीश्वरादेशविधायित्वेनतत्प्रतिलोमाचरणानुपपत्तेः प्रतिभाद्यभावप्रसंगादिति नस्मृष्टिकरस्यमहेश्वरस्यकथंचिदपिसिद्धिः ॥ ततःसद्भूतार्थप्रकाशकत्वाद्वीतरागएवसर्वज्ञोदेवोदेवत्वेनाभ्युपगमनार्होनापरःकश्चिदितिस्थितं अथजल्पंतिजैमिनीयाइहहिसर्वज्ञादिविशेषणविशिष्टोभवदभिमतःकश्चनापिदेवोभातीति तद्ग्राहकप्रमाणाभावात् तथाहि ॥ नतावत्प्रत्यक्षंतद्ग्राहकं संबंधंवर्तमानंहिगृह्यतेचक्षुरादिनेतिवचनात् नचानुमानंप्रत्यक्षदृष्टेऽर्थेतत्प्रवर्त्तनात् नचागमःसर्वज्ञस्यासिद्धत्वेनतदागमस्यापिविवादास्पदत्वात् नचोपमानंसर्वज्ञसदृशस्यापरस्याभावात् नचार्थापत्तिरपिसर्वज्ञसाधकस्यान्यथानुपपन्नार्थस्यादर्शनात् ततःप्रमाणपंचकाप्रवृत्तेरभावप्रमाणगोचरत्वंसर्वज्ञस्यदुरुक्तंप्रमाणपंचकंयत्रवस्तुरूपेणजायतेवस्तुसत्तावबोधार्थंतत्राभावप्रमाणता ॥ १ इति प्रयोगोऽत्रनास्तिसर्वज्ञः प्रमाणपंचकायाह्यमाणत्वात् खरविषाणवत् किंचयथाऽनादेरपि सुवर्णमलस्य क्षारमृत्पुटपाकादिप्रक्रियाविशोध्यमानस्यनिर्मलत्वमेवमात्मनोपिनिरंतरंज्ञानाद्यभ्यासेनविगतमलत्वात्सर्वज्ञत्वंकिंनभवेदितिमतिरपिनअभ्यासेनहिशुद्धिप्रकारतस्यमेधाभेदेनपरमःप्रकर्षःनहिनरस्यलंघनमभ्यासतस्तारतम्यवदव्युत्पद्यमानंसकललोकविषयमुपलभ्यतेऽर्कंचदशसहस्रांतरंव्योम्नोयोनामोत्पुत्यगच्छतिनयोजनशतंगंतुंशक्तोभ्यासशतैरपि ॥ १ इति अपिचससर्वंवस्तुजातंकेनप्रमाणेनजानातिकिंप्रत्यक्षेणोतयथासंभवंसर्वैरेवप्रमाणैर्नतावत्प्रत्यक्षेणतस्यसंनिहितप्रतिनियतार्थग्राहित्वात् नाप्यतींद्रियप्रत्यक्षेणतत्सद्भावेप्रमाणाभावात् नापिसर्वैरेवप्रमाणैस्तेषांप्रत्यक्षपूर्वकत्वात् सर्वेषांसर्वज्ञतापत्तेश्चेति अन्यच्च अनाद्यनंतःसंसारःतद्भूतू

न्यप्यनंतानि क्रमेणविदन् कथमनंतेनापिकालेन सर्वं वेदीभविष्यति किंच यथावस्थितवस्तुवेदित्वेऽ शक्यादिरसास्वादप्रसंग स्तेषांयथावस्थितनयासंवेदनात् ॥ आहच अशक्यादिरसास्वादप्रसंगभयान्निवारित इति किंचातीतानागतवस्तूनिमकिंस्वेन २ रूपेण जानातिकिंवाऽवर्तमानयेऽप्रथमपक्षेतज्ज्ञानस्याप्रत्यक्षतापत्तिरवर्तमानवस्तुग्राहित्वात् स्मरणादिवत् द्वितीयेतुतज्ज्ञानस्यभ्रांततत्प्रसंगोन्यथास्थितस्यार्थस्याऽन्यथाग्रहणाद्विचंद्रज्ञानादिवदित्यत्रप्रतिविधीयतेतत्रयावदुक्तंद्वाहुकप्रमाणाभावादिति साधनंतदसम्यक्स्यासिद्धत्वात्तत्साधकानामनुमानप्रमाणानांसद्भावोक्तथाहिज्ञानतारतम्यंक्वचिद्विश्रांततारतम्यशब्दवाच्यत्वात् परिमाणवदितिनायमसिद्धो हेतुः प्रतिभाणिप्रज्ञामेधादियुणपाटवरूपस्य ज्ञानस्यतारतम्येनोपलभ्येस्तावश्यमस्यप्रकर्षेणभावंयथा परिमाणस्याकाशेसकलज्ञानस्यसर्ववस्तुप्रकाशकसूत्रेयत्रविश्रांतः सभगवान्सर्वज्ञः मनुसंताप्यमानपाथसऊतारतम्येसत्यपिसर्वोत्तिसर्वोतिमिवर्त्तिरूपतापत्तिरूपप्रकर्षादर्शनाद्व्यभिचार्ययंहेतुरितिचेन्नयतोद्रव्यस्यसहजोधर्मोननुसहकारिमव्यपेक्षः सहजोपिचयः स्वाश्रयेविशेषमारभतेसोभ्यासक्रमेणप्रकर्षपर्यंतमासादयतियथाकनकपाषाणस्यपुरुषप्रयत्नाहितविशुद्धिर्नैपाथसस्तापः सहजोधर्मः किंत्वग्न्यादिसहकारिसव्यपेक्षस्तत्कर्थंतत्रतापोभ्यस्यमानःपरांकाष्ठामगच्छेत् अत्यंततापेप्रत्युतपाथसः परिक्षयात्तानंतुजीवस्य सहजोधर्मः स्वाश्रयेचविशेषमारभतेतेनतस्यनिरंतराभ्यासाद्विताधिकाधिकोत्तरोत्तरविशेषाधानात्प्रकर्षपर्यंतप्राप्तिर्नायुक्तेतेनलंघनाभ्यासेत्यादिनिरस्तंलंघनस्यासहजधर्मत्वात्स्वाश्रयेचविशेषानाधानात्प्रत्युततेनसामर्थ्यपरिक्षयादितितथाजलधिजलपद्मप्रमाणादयः कस्यचित्प्रत्यक्षाः प्रमेयत्वाद्घटादिगतरूपादिविशेषवत्तत्रचप्रमेयत्वमसिद्धंमाभावप्रमाणस्यव्यभिचारप्रसक्तेः॥तथाहि प्रमाणपंचकातिक्रांतस्यहिवस्तुनोभावप्रमाणविषयताभवताभ्युपगम्यतेयदिचजलधिजलपद्मप्रमाणादि

षुप्रमाणपंचकातिक्रांतरूपमप्रमेयत्वंस्यान्नतेषव्यभावप्रमाणविषयतास्यात् नचाप्रत्यक्षेपिसर्वज्ञेभविनीतियस्यचप्रत्यक्षः सभगवान्सर्वज्ञइति तथाकश्चिदतींद्रियार्थसाक्षात्कारीअनुपदेशालिंगाविसंवादिविशिष्टदिग्देशकालप्रमाणात्मकचंद्रादियहणाद्यपदेशदायित्वाद्योयद्विषयेऽनुपदेशाविसंवायुपदेशदायीसतत्साक्षात्कारीयथाऽस्मदादिः अनुपदेशालिंगाविसंवायुपदेशदायीचकश्चित्तस्मात्तत्साक्षात्कारितथाविधश्चार्थीसर्वज्ञएवेति यथोक्तं प्रमाणपंचकाद्यत्तेरसंभवात्साहिबाधकत्वेनस्यान्नचसर्वज्ञेबाधकसंभवस्तथाहितद्बाधकं प्रत्यक्षं १ अनुमानं २ आगमः ३ उपमानं ४ अर्थापत्तिर्वा तत्रायः पक्षोनश्रेयान् यतोयदिप्रत्यक्षं वस्तुनः कारणंव्यापकं वास्यात्तदानिवर्त्तमानेवस्तुनोपि निवर्त्तिर्युक्तिमती यन्मादिकारणदक्षत्वादिव्यापकनिवृत्तौ धूमत्वादिशिंशिपात्वादिनिवृत्तिवत् नचार्थुस्याध्यक्षं कारणंतदभावेपिदेशादिव्यवधानेऽर्थस्यभावात् नापिव्यापकं तन्निवृत्तावपि देशादिविप्रकृष्टवस्तुनामनिवर्त्तमानत्वात् नचाकारणाव्यापकनिवृत्तावकार्याव्यापकनिवृत्तिरुपपन्नाऽतिप्रसक्तेरिति नाप्यनुमानंतद्बाधकं धर्मिसाध्यधर्मसाधनानांस्वरूपासिद्धेः तत्रहि धर्मित्वेनकिंसर्वज्ञोऽभिप्रेतः सुगतादिः।२ सर्वपुरुषा३ वा यदिसर्वज्ञस्तदाकिंतत्र साध्यमसत्त्व १ मसर्वज्ञत्वंवा २ यद्यसत्त्वं किंतत्रसाधनममुपलंभो १ विरुद्धविधिर्वाऽनुपलंभात्वादिकंवा ३ यद्यनुपलंभः किंसर्वज्ञस्योत तत्कारणस्य २ तत्कार्यस्य ३ तद्व्यापकस्य ४ वायदिसर्वज्ञस्यसोपिकिंस्वसंबंधी १ पर सर्वसंबंधी २ वास्वसंबंधीचेन्निर्विशेषण १ उतोपलब्धिलक्षणप्राप्तत्वविशेषणो वा २ द्योपरार्द्धेनविशेषाद्विभिन्नैर्काकिको ऽनुपलंभादितिहेतुः तेषामनुपलंभेप्यसत्त्वान्नभ्युपगमात् नाप्युपलब्धिलक्षणप्राप्तत्वविशेषणं सर्वत्रसर्वदाचसर्वज्ञाभावप्रसंगात् नहिसर्वथाप्यसतउपलब्धिलक्षणप्राप्तत्वंघटतेक्वचित्क

दाचित्कत्वोपलंभाविनाभावित्वान्नास्येनसर्वसंबंधिपक्षेपिप्रत्यवस्थानतः किंचासिद्धः सर्वसंबंध्यनुपलंभः सर्वविदा प्रतिपत्तुमशक्यत्वान्नखलु सर्वात्मनांतज्ज्ञानानांचाप्रतिपन्नौ तत्संबंधी सर्वज्ञानुपलंभः प्रतिपत्तुंशक्यः नापि कारणानुपलंभस्तत्कारणस्य ज्ञानावरणादिकर्मप्रक्षयस्यानुमानेनोपलंभादेतत्साधकंचानुमानंयुक्तयश्चाग्रे वक्ष्यंतेकार्यानुपलंभोप्यसिद्धस्तत्कार्यस्यापिसंबाधागमस्योपलब्धेः व्यापकानुपलंभोप्यसिद्धस्तद्व्यापकस्य सर्वार्थसाक्षात्कारित्वस्यानुमानेनप्रतीतेस्तथाहि अस्तिकश्चित्सर्वार्थसाक्षात्कारी तद्ग्रहणस्वभावत्वेसतिप्रक्षीणप्रतिबंधप्रत्ययत्वानुपचद्ग्रहणस्वभावत्वेसतिप्रक्षीणबंधकं तत्तत्साक्षात्करि यथापगतमितिगदितप्रतिबंधलोचनरूपसाक्षात्कारीतिनानुपलंभादितिसाधनंसर्वज्ञाभावंसाधयति विरुद्धविधिरपि साक्षात्परंपरयावासर्वज्ञाभावंसाधयति प्रथमपक्षेसर्वज्ञत्वेनसाक्षाद्विरुद्धस्यात्सर्वज्ञत्वस्यक्वचित्कदाचिद्विधानात्सर्वत्रसर्वदातत्राप्यपक्षेनो सर्वत्रसर्वज्ञाभावःसिद्ध्येद्यत्रैवहिविधानेतत्रैवतद्भावो नान्यत्रनाहिक्वचित्कदाचिदग्निर्विधानेसर्वत्रसर्वदातत्रापिव्यापकविरुद्धशीताभावादेशेहितीयोप्ययुक्तोव्यापकविरुद्धः सर्वत्रसर्वदासर्वज्ञत्वविधेः संभवात् तत्संभवेचतस्यैवसर्वज्ञत्वापत्तेः सिद्धेनः समीहितंपरंपरयापिकिंतद्व्यापकविरुद्धस्य १ तत्कारणविरुद्धस्य २ तत्कार्यविरुद्धस्यवा ३ विधिः सर्वज्ञाभावमाविर्भावयेत् नतावद्व्यापकविरुद्धविधिः सहिसर्वज्ञस्यव्यापकमखिलार्थसाक्षात्कारित्वंतेनविरुद्धं तदसाक्षात्कारित्वंनियतार्थग्राहित्वंवातस्यचविधिः क्वचित्कदाचित्तदभावंसाधयेन्नपुनः सर्वत्रसर्वदावानुषारस्यस्पर्शव्यापकशीतविरुद्धाग्निविधानात्क्वचित्कदाचित्तुषारस्यस्पर्शनिषेधवत्कारणविरुद्धविधिरपिक्वचित्कदाचिदेवसर्वज्ञाभावंसाधयेन्नसर्वत्रसर्वज्ञत्वस्याहिकारणमशेषकर्मक्षयस्तद्हिसद्भस्यकर्मणोक्षयस्यचविधिः क्वचित्कदाचिदेवसर्वज्ञाभावंसाधकोरोगहर्षादिकारणशीतविरुद्धाग्निविधात्क्वचित्कदाचित्शीतकार्यरोमहर्षादिनिषेधवत् नपुनः साकल्येनसकलकर्मप्रक्षयस्यसाकल्येनसंभवा

DR BHAU DAJI MEMORIAL

भावात् क्वचिदप्यात्मनितस्याग्रेप्रसाधयिष्यमाणत्वात् नापिविरुद्धकार्यविधिः सर्वज्ञत्वेनहिविरुद्धंकिंचिज्ज्ञानं तत्कार्यंनियतार्थविषयंवचनस्यविधिः सचनसामस्त्येनसर्वज्ञाभावंसाधयेत् यत्रैवतद्विधिस्तत्रैवास्य तद्भावसाधनसमर्थत्वात् शीतविरुद्धदहनकार्यधूमविशिष्टप्रदेशेऽथशीतस्पर्शनिषेधवत्तन्नविरुद्धविधिरपि सर्वविदोबाधकः २ नापियत्कृत्वादिकं सर्वज्ञसत्त्वानभ्युपगमेतस्यानुपपन्नासिद्धत्वात् तदुपपत्तौचस्ववचनविरोधोनास्ति सर्वज्ञोवक्तृत्वादि धर्मोपेतश्चेति तत्रसर्वज्ञस्यासत्त्वंकुतोपिहेतोः साध्ययितुंशक्यं ३ नाप्यसर्वज्ञत्वंसाध्यं सर्वज्ञोसर्वज्ञइत्येवंविरोधस्यासाध्यविशिष्टत्वात् किंचासर्वज्ञत्वेसाध्येसर्वज्ञस्यप्रमाणविरुद्धार्थवक्तृत्वं १ तद्विपरीतं २ वक्तृत्वमात्रंवा ३ हेतुत्वेनविवक्षितं प्रथमोसिद्धो हेतुः सर्वज्ञस्यतथाभूतार्थवक्तृत्वासंभवात् द्वितीयपक्षेनुविरुद्धोदृष्टेष्टाविरुद्धार्थवक्तृत्वस्यसर्वज्ञत्वेसत्येवसंभवात् तृतीयपक्षेप्यनकांतिकोवक्तृत्वमात्रसर्वज्ञत्वेनविरोधासंभवात् एतेनसुगतादि धर्मिपक्षोपिप्रत्याख्यायिप्रोक्तदोषानुषंगाविशेषात् किंचप्रतिनियतसुगतादेर्वसर्वज्ञतानिषेधे अन्येषांतद्विधिरवश्यंभावीविशेषस्यशेषाभ्यनुज्ञानांतरीयत्वात् अयमब्राह्मण इत्यादिवदिति अथसर्वपुरुषानुररीकृत्यतेषामसर्वज्ञतावक्तृत्वादेः साध्यतेतन्नविपक्षादेतस्य व्यावृत्तेरसिद्धत्वात् संदिग्धविपक्षव्यावृत्तिकत्वात् सर्वज्ञोपिभविष्यतिवक्तापीतितत्रानुमानंसर्वज्ञबाधकमाप्तागमः सहिपौरुषेयोऽपौरुषेयोवा नतावदपौरुषेयस्तस्याप्रामाण्यात् वचनानांगुणवद्भाषीनतयाप्रामाण्योपपत्तेः किंचास्यकार्यस्यार्थप्रामाण्याभ्युपगमान्नसर्वतः स्वरूपनिषेधेप्रामाण्यंस्यात् नचाशेषज्ञाभावसाधकंकिंचिद्वेदवाक्यमस्ति हिरण्यगर्भः सर्वज्ञ इत्यादिवेदवाक्यानांतत्प्रतिपादकानामनेकशः श्रवणात् नाप्यनुमानंतद्बाधकं तत्स्वरूपमानोपमेययोरध्यक्षत्वे सतिगोगवयवत्स्यान्नायशेषपुरुषाः सर्वज्ञश्चकश्चिद्दृष्टायेनाशेषपुरुषवत्सर्वज्ञः सर्वज्ञवद्वातेत्युपमानंस्यादशेषपुरुषदृष्टौच

तस्येवमसर्वज्ञत्वापत्तिरिति नाप्यर्थापत्तिरप्रद्वाधिका सर्वज्ञाभावमंतरेणानुपपद्यमानस्य कस्याप्यर्थस्यासंभवात् वेदप्रमाण्यस्यचमर्वतत्वे सत्येवोपपत्तेर्नहि गुणवक्तृभावेवचसां प्रामाण्यंघटतइतिनसर्वज्ञाबाधकसंभवस्तदभावेवप्रमाणपंचकाप्रवृत्तिरप्यसिद्धा तथाहि प्रमाणपंचकाप्रवृत्तेरभावः प्रमाणविषयत्वं तदप्यनेकांतिकं हिमवत्पलपरिमाणपिशाचादीनांप्रमाणपंचकाप्रवृत्तावप्यभावप्रमाणगोचरत्वाभावादिति प्रमाणपंचकंयत्रोपायस्तंद्रष्टव्यं यच्चोक्तं सर्वज्ञानकेनप्रमाणेनेत्यादितदप्ययुक्तं सकलज्ञानावरणविक्षयोत्थविकलकेवलोकेन सकललोकालोकादिवस्तुत्वेज्ञातृत्वात्सर्वज्ञस्येति यच्चोक्तमश्वाद्यरसास्वादइत्यादि तदपिपरप्रत्यक्षतयामात्रमेवयुक्तं किंसर्वज्ञस्यातींद्रियज्ञानित्वेनकरणव्यापारनिरपेक्षत्वान्नेंद्रियव्यापारनिरपेक्षं यथावस्थितं तदर्थतत्त्वेवेदनंनतुभवद्भूतव्यापारसापेक्षं वेदनमितियदप्यवादि कालतोनायनंतःसंसारइत्यादितदप्यसम्यग्युगपत्सर्ववेदनान्नचनदसंभविदृष्टत्वात्तथाहि यथास्वध्ययनसकलशास्त्रार्थःसामान्येनयुगपत्प्रतिभासतेएवमशेषविशेषकलितोपि यथाचोक्तं यथासकलशास्त्रार्थः स्वभ्यस्तःप्रतिभासतेमनस्येकक्षणेनैवतथाऽनंतादिवेदनं॥१ इति यथोक्तमतीतानागतेत्यादितदपिस्वप्नेतुरज्ञानित्वमेवज्ञापयति यतोयद्यपीदानींतनकालापेक्षयातेऽतीताऽनागतवस्तुनीअसती तथापियथातीतमतीतकालेवर्त्तिस्वयंभावविवर्त्तिष्यतेतथैवतयोः साक्षात्कारित्वेननकश्चनादिदोषइति सिद्धः सुखादिवत्सुनिश्चितासंभवद्बाधकप्रमाणत्वात्सर्वज्ञइति अथरिक्तयाः प्रकरयंति ननुभवनुसुनिश्चितासंभवद्बाधकप्रमाणत्वात् सर्वज्ञसिद्धिः किंत्वस्यकवलाहारइति नमृष्यामहे तथाहि केवलिनः कवलाहारोभवतितत्कारणाभावान्नचकारणाभावे कार्यस्योत्पत्तिरितिप्रसक्तेः नचतत्कारणाभावोऽसिद्धआहाराद्दानिदानभूतवेदनादिपद्वेएकस्यापितस्यकेवलिन्यभावान्तथाहि नतावत्तस्यवेदनोत्पद्यतेतद्वेदनस्यद्रव्यरज्जुस्था

निकत्वान्नसामर्थ्यंवेदनायांनतस्यतत्क्षुत्पीडाऽनंतवीर्यत्वात्वेदयावृत्यकरणंतुभगवतित्रैलोक्यपूज्येनसंभवत्येवेति ईर्यापथः पुनः केवलज्ञानावरणक्षयात्सम्यगवलोकयत्समोसंयमस्तुतस्ययथाख्यातचारित्रिणोनिष्ठितार्थत्वाच्चनाहारकारणंभवति प्राणवृत्तिरपितस्यानपवर्त्यायुष्कादनंतवीर्यत्वाच्चान्यथासिद्धैवधर्मचिंतावसरवत्पगतोनिष्ठितार्थत्वान्नदेवं केवलिनः कावलिकाहारोबहुदोषदुष्टत्वान्नघटतइत्यत्रोच्यते तत्रयत्तावदुक्तं तत्कारणाभावादितिसाधनंवदसिद्धमाहारकारणस्यकेवलिनितथैवभद्रायान्तथाचकिमितिसाशरीरीस्थितिः प्राक्तनीनास्यात् प्रायोगोवास्यात्केवलिनोभुक्तिः समयसामग्रीकत्वात् पूर्वसुक्तिवत्सामग्रीचेयंपर्याप्तंवेदनीयोदय आहारपक्तिनिमित्तंतैजसशरीरंदीर्घायुष्कंचेतिसाचसमग्रापिकेवलिनिसमस्तिद्रव्यरज्जुसंस्थानिकत्वंवेदनीयस्योच्यतेतदप्यनागमिकंमयुक्तियुक्तंवागमेत्यंतसातोदयस्यकेवलिनिप्रतिपादनात् युक्तिरपियदिघातिकर्मक्षयाज्ज्ञानादयस्तस्यभवेयुर्वेदनीयोद्भवायाः क्षुधः किमायातं येनासौनभवतिनतयोष्ठायातपयोरिवसहानवस्थानलक्षणभावाभावयोरिवपरस्परपरिहारलक्षणोवाकश्चिद्विरोधोस्ति सातासातयोरंतर्मुहूर्तेपरिवर्त्तमानतया सातोदयवदसातोदयोप्यस्तीत्यनंतवीर्यत्वे सत्यपिशरीरबलौदारचयः क्षुदुद्भवपीडाचभवत्येवनचाहारग्रहणेतस्याःकिंचित्कृतये केवलमाहोपुरुषिकामात्रमेवेतियदुच्यतेवेदनीयस्यादीरणाभावात् प्रभूततरपुद्गलोदयाभावस्तदभावाच्चासौतेषांपीडाभावइतितदयुक्तं तुर्यादिगुणस्थानेषुवेदनीयस्यगुणश्रेणिसद्भावात् प्रचुरपुद्गलोदयेसत्यपितत्कृतपीडाऽल्पत्वास्यैवदर्शनात् जिनेसातोदयवत् प्रचुरपुद्गलोदयाभावेपितीव्रत्वदर्शनाच्चेतियदप्युच्यते आहाराकांक्षोद्भवात्चपरिग्रहबुद्धिः माचमोहनीयविकारस्यचापगतत्वात् केवलिनोनभुक्तिमिति तदसम्यक्कुतोमोहनीयविपाकक्षुन्नभवतितद्विपाकस्यप्रतिपक्षभावनानिवर्त्यमानत्वात् क्रोधादीनांतथोपरमोपलब्धेरनदुक्तउपशमश्रेणिकृतामित्यादिनचक्षुर्वेदनीयंतद्द्विपक्षभावनव्यावर्त्तमानंदृष्टमतीनमोहविपाकस्वभावक्षु

दित्यंतनयदुच्यते अपवर्त्यतेस्मतार्थंनायुर्ज्ञानादयोनहीयंतेअगदुपस्कृतावनंतवीर्यंकिंगतवृषोभुक्तिरित्यादिनिःसत्व एवंवि
ध—दारिकत्वादिसामर्थ्यमद्भावेनऽस्यस्थावस्थायामपिकेवलिनोऽभुक्तिप्रसक्तः समस्तवीर्यांतरायक्षयाभावाच्छद्म
स्थस्य भुक्तिरितिचेन्नदयुक्तंयतः किंनथायुष्कस्यापवर्त्तनंस्यात्किंवाचतुर्णांज्ञानानांकाचिद्धानिःस्यादेनभुक्ति
स्तेनयथादीर्घकालस्थितेरायुष्कंकारणमेवआहारोपियथासिद्धगतेर्व्युपरतक्रियध्यानचरमक्षणकारणमेवं
सम्यक्त्वादिकमपीतिऽनंतवीर्यतापितस्याहारग्रहणेनविरुध्यते यथातस्यैवछंदादीनिविश्रामकारणानि
गमननिषीदनादिनिचभवंत्येवमाहारक्रियापिनिराबाधाभावात् नचबलवत्तरस्यवीर्यवतोऽतीयसीक्षुद्व्यभिचारा
रात्किंचागमोपिकेवलिनोभुक्तिं प्रतिपादयति तथाहितत्वार्थसूत्रंएकादशजिनइति व्याख्या एकादशपरीष
हाः क्षुत्पिपासाशीतोष्णदंशमशकचर्याशय्यावधरोगतृणस्पर्शमलाख्याजिनेकेवलिनिभवंतितत्कारणस्यवेद
नीयस्यापिविद्यमानत्वात् नचकारणानुच्छेदेकार्यस्योच्छेदःसंभाव्यतेऽतिप्रसक्तेरतः केवलिनिक्षुद्वेदनीयपीडा
संभाव्यतेकिंत्वसावनंतवीर्यत्वान्न विक्लीभवतिनचासौनिष्प्रतीकारोनिःप्रयोजनमेवपीडांसहतेनचशक्यतेवक्तु
मेवंभूतमेवभगवतः शरीरंयदुन्नक्षुत्पीड्याबाध्यतइतिअनुमानेनतस्यस्तत्रसिद्धत्वात्तथाहिकेवलिशरीरंक्षुदा
दिनापीड्यतेशरीरत्वादस्मदादिशरीरवत्तथायथातच्छरीरंस्वभावेनप्रस्वेदादिरहितमेवंप्रक्षेपाहाररहि
तमपीत्यपकर्णकर्णनीयमेवाप्रमाणकत्वात् तदेवंदेशोनपूर्वकोटिकालस्यकेवलिस्थितेःसंभवादौदारिकशरीरस्थि
तेश्चयथायुष्कंकारणमेवंप्रक्षेपाहारोपितथाहितैजसशरीरेणमृदूकृतस्याभवद्भुतस्यस्वपर्याप्त्यापरिणामितस्यो
त्तरोत्तरपरिणामक्रमेणौदारिकशरीरिणामनेनप्रकारेणक्षुद्दुःखाभवतिवेदनीयोदयेचेयंसमर्थापिसामर्थ्यी
मूर्त्तनाभ्येपेतात्मनःकर्मजीवसंबंधस्यानादित्वादेकत्वपरिणामेसतिक्षीरोदकवन्मूर्त्तएवकर्मग्रहणेव्याप्रियते। नचहस्तादिव्यापारादेयंकर्म किंतुयोगःकर्मापिसदध्यवसायविशेषाद्रागद्वेषमोहपरिणामाभ्यंजनलक्षणा। दात्मनःकर्मयोग्यपुद्गलजालश्लेषणमादानंस्नेहाभ्यक्तवपुषोरजोलगनवदिति। प्रतिप्रदेशानंतपरमाणुसंश्लेषाज्जीवस्यकर्मणासहक्षीरोदीभावात्कथंचिन्मूर्त्तत्वमपिसंसारावस्थायामभ्युपगम्यतएवस्याद्दादवादिभिरिति। सचप्रशस्ताप्रशस्तभेदाद्द्वेधा। प्रकृतिस्थित्यनुभागप्रदेशभेदाच्चतुर्धा॥ प्रकृतिःस्वभावो यथाज्ञानावरणंज्ञानाद[illegible]दनस्वभावमित्यादि। स्थिति[illegible]ध्यवसायकृतःकालविभागः। अनुभागोरसः। प्रदेशकर्मदलसंचयइति। पुनरपिमूलप्रकृतिभेदादष्टधा। ज्ञानावरणादिकः। उत्तरप्रकृतिभेदादष्टपंचाशदधिकशतभेदः। सोपिनीत्रनीचतरमंदमंदतरादिभेदादनेकविधइत्यादिकर्मग्रंथादवसेयः। उक्तंबंधतत्वं॥५१॥निर्जरातत्वमाह॥बद्धस्यकर्मणःसाटो यस्तु सानिर्जरामता। आत्यंतिकोवियोगस्तु देहादेर्मोक्षउच्यते॥५२॥यस्तुबद्धस्यजीवनसंबद्धस्यकर्मणोज्ञानावरणादेःसाटःसदनंद्वादशविधेन[illegible]पसाविचरनंसानिर्जरामतासंमता॥सचाद्विविधा।सकामाकामभेदात्। तत्राद्याचारित्रिणांदुष्करतरतपश्चरणकायक्लेशकारिणांसप्तदशशीलांगधारिणां। बाह्याभ्यंतरसर्वपरिग्रहपरिहारिणांनिःप्रतिकर्मशरीरिणांभवति। द्वितीयातुअन्यत्सरीरिणांनीत्रतरशारीरमानसानेकदुःखशतसहस्रसहनतोभवति॥अथोत्तरोर्हन्मोक्षतत्वमाह॥आत्यंतिकइत्यादि। देहादेःशरीरपंचकेंद्रियायुरादिबाह्यप्राणपुण्यापुण्यवर्णगंधरसस्पर्शपुनर्जन्मग्रहणवेदत्रयकषायादिसंगाज्ञानासिद्धत्वादेरात्यंतिकोवियोगोविरहः। पुनर्मोक्षइष्यते। योहिशश्वद्भवति। नपुनःकदाचिन्नभवति। सआत्यंतिकः॥ अत्रपरःप्राह। ननुभवतुदेहस्यात्यंतिकोवियोगोऽस्यसादित्वात्। परंरागादिभिःसहात्यंतिकोवियोगोसंभवी। प्रमाणबाधनात्। प्रमाणंहि। यदनादिमत्। नतद्विनाशमाविशति। यथाकाशं। अनादिमंतश्चरागादयइति। उच्यते। यद्यपिरागादयोदोषाजंतोरनादिमंत[illegible]थापिकस्यचित्यथावस्थितस्त्रीशरीरादिवस्तुतत्वावगमेनतेषांरागादीनांप्रतिपक्षभावनातःप्रतिक्षणमपचयोदृश्यते। ततःसंभाव्यतेविशिष्टकालादिसामग्रीसद्भावेभावनाप्रकर्षतोनिर्मूलमपिक्षयः निर्मूलस्य

यानभ्युपगमेपचयस्याप्यसिद्धेः। यथाहिशीतस्पर्शसंपाद्यारोमहर्षादयःशीतप्रतिपक्षस्यवह्नेर्मंदतायांमंदाउपलभ्यंते॥ उत्कर्षेचनिरन्वयविनाशिनः। एवमन्यत्रापिमंदतासद्भावेनिरन्वयविनाशोवश्यमेष्टव्यः। अथयथाज्ञानावरणीयकर्मोदयेज्ञानस्यमंदताभवति। तत्प्रकर्षेचज्ञानस्यनिरन्वयोविनाशः। एवंप्रतिपक्षभावनोत्कर्षेपिनरागादीनामत्यंतमुच्छेदोभविष्यतीति। तदयुक्तं॥ द्विविधंहिबाध्यं। सहभूस्वभावं। सहकारिसंपाद्यस्वभावंच। तत्रयत्सहभूस्वभावं। तन्न[illegible]धकोत्कर्षेकदाचिदपिनिरन्वयविनाशमाविशति। ज्ञानंचात्मनःसहभूस्वभावं। आत्माच परिणामिनित्यस्ततोऽत्यंतप्रकर्षवत्यपिज्ञानावरणीयकर्मोदयेज्ञानस्यनिरन्वयोविनाशः। रागादयस्तुतीव्रादिकर्मविकोदयसंपादितसत्ताकाः। ततःकर्मणोनिर्मूलमपगमेतेपिनिर्मूलमपगच्छंति। प्रयोगश्चात्र॥येसहकारिसंपाद्यायदुपघानादुपकर्षिणः॥ते तदत्यंतद्वेषिनिरन्वयविनाशधर्माणः। यथारोमहर्षादयोवह्निद्वेषिणः॥ भावनोपघानादपकर्षिणश्चसहकारिकर्मसंपाद्यारागादयइति। अत्रसहकारिसंपाद्याइतिविशेषणंसहभूस्वभावज्ञानादिव्यवछेदार्थं। यदपिचप्रागुपन्यस्तंप्रमाणंयदनादिमत्तदविनाशमाविशतीति। तदप्यप्रमाणं। प्रागभावेनहेतोर्व्यभिचारात्। प्रागभावोह्यनादिमतामपिविनाशमाविशति। अन्यथाकार्यानुत्पत्तेः। कांचनोपलयोःसंयोगेनचहेतुरनैकांतिकः॥तत्संयोगोपिह्यनादिसंततिगतोपिक्षारमृत्पुटपाकादिनोपायेनाविघटमानोदृष्टइति। अथरागादयोधर्मीधर्मिणश्चात्मनोभिन्नाश्चेत्तदासर्वेषांवीतरागत्वसिद्धत्वप्रसंगो[illegible]रागादिभ्योभिन्नत्वात्। मुक्तात्मवत्। अभिन्नाश्चेत्तदातेषांक्षयेधर्मिणोपिक्षयइति। तदयुक्तं। भेदाभेदपक्षस्यजात्यंतरस्याभ्युपगमात्। कथमितिचेत्। उच्यते। धर्मिधर्मिणांनभेदएव। अभेदस्यापिसत्वात्। नाप्यभेदएवभेदस्यापिसद्भावात्। ततोनोक्तदोषावकाशइति। अथकार्मणशरीरादेःसर्वथावियोगेकथंजीवस्योर्ध्वमात्मोत्कांतगतिरितिचेत्। पूर्वप्रयोगादिभिस्तस्योर्ध्वगतिरितिब्रूमः। तदुक्तंतत्वार्थभाष्ये। तदनंतरमेवोर्ध्वमात्मोत्कांतात्समश्रेढीति। पूर्वप्रयोगा[illegible]गत्वरबंधच्छेदोर्ध्वगौरवैः॥४॥१कुलालचक्रेदोलायामिषौचाविय[illegible]ष्यते। पूर्वप्रयोगात्कर्मेह तथासिद्धगतिस्मृतारूपसंगनिर्मोक्षात्। यथादृष्टश्चलाबुनः। कर्मसंगविनिर्मोक्षात्तथासिद्धगतिःस्मृता३एरंडबीजवत्रेपाशु

दुत्पादयिष्यते॥४ ऊर्ध्वगौरवधर्माणो जीवाइतिजिनोत्तमैः॥ अधोगौरवधर्माणः पुद्गलाइतिनोदितं॥५ यथाधस्तिर्यगूर्ध्वंचलोष्टवाय्वग्नि

बंधछेदा[व]थागतिः॥ कर्मबंधनविछेदा सिद्धः प्रवर्त्तते। तथोर्द्धगतिरात्मनः॥६ अधस्तिर्यक्कृतोर्द्धंच जीवानांकर्मजागतिः॥ ऊर्ध्वमेवचतद्धर्मा भवतिक्षणकर्मणः॥७ ततोप्यूर्ध्वगतिस्तेषां कस्मान्नास्तीतिचेन्मतिः॥ धर्मास्तिकायस्याभावात्सिद्धे र्नुर्ग तेः परः॥८ धर्मास्तिकायस्यगतिहेतुत्वंपुरापिव्यवस्थापितमेवेति। ननुकर्मणामभावेपि पूर्वप्रयोगादिभिर्जीवस्योर्द्धगतिः॥ तथापि शरीरेंद्रियादिप्राणानामभावान्मोक्षेजीवस्याजीवतत्वप्रसंगोयतोजीवनंप्राणधारणमुच्यते। तच्चेदन्नास्ति। तदाजीवस्य जीवनाभावदजीवत्वंस्यादजीवस्यचमोक्षाभावः॥ इतिचेन्नअभिप्रायापरिज्ञानात्। प्राणाहिद्विविधाः॥ द्रव्यप्राणाः॥ भावप्राणाश्च। मोक्षेचद्रव्यप्राणानामेवाभावो नपुनर्भावप्राणानां। भावप्राणाश्चमुक्तावस्थायामपिसंत्येव॥ यदुक्तं॥ यस्मात्क्षायिकसम्यक्त्ववीर्यदर्शनज्ञानैः। आत्यंतिकैःसंयुक्तो निर्द्दहेनापिचसुखेन॥१ ज्ञानादयस्तुभावप्राणा मुक्तोपिजीवतिसतैर्हि तस्मात्तज्जीवत्वंनित्यंसर्वस्यजीवस्य॥२ ततश्चानंतज्ञानानंतदर्शनानंतवीर्यानंतसुखलक्ष णंजीवनंसिद्धानामपिभवतीत्यर्थः॥ सुखंचसिद्धानांसर्वसंसारसुखविलक्षणंपरमानंदरूपंज्ञातव्यं॥ उक्तंचसिद्धांते। नविअत्थिमाणुसाणं॥ तंसुक्खंनेवसव्वदेवाणं। जंसिद्धाणंसुक्खं॥ अव्वाबाहंतुवगयाणं॥१ सुरगणसुहंसमग्गं॥ सव्वद्धापिंडियंअनंतगुणं। नयपावइमुत्तिसुहं॥ नंताहिंविवग्गवग्गूहिं॥२ सिद्धस्यसुहोरासी॥ सव्वद्धापिंडिउजइहोइ। विज्जा॥ सानंतवग्गभइतु॥ सव्वागासेनमाइज्जा॥३॥ यथायोगशास्त्रेप्युक्तं॥ सुरासुरनरेंद्राणां यत्सुखंभुवनत्रये। तत्स्यादनंतभागेपि नमोक्षसुखसंपदः॥१ स्वस्वभावजमत्यंतं॥ यस्मिन्नवैशाश्वतंसुखं॥ चतुर्वर्गाग्र णीत्वेन सहिमोक्षः प्रकीर्त्तितः॥२ अत्रसिद्धानांसुखमयत्वेत्रयोविप्रतिपद्यंते॥ तथाहि॥ आत्मनोमुक्तौबुद्ध्याद्यशेष गुणोछेदात्कथंसुखमयत्वमितिवैशेषिकाः॥१ अत्यंतचित्तसंतानोछेदतआत्मनएवासंभवादितिसौगताः॥२ अभो त्वात्कथमात्मनोमुक्तौसुखमयत्वमितिसांख्याः॥३ तत्रादौवैशेषिकाः स्वशैलीमुखेविशेषयंति॥ ॥ ननुमोक्षेविशुद्ध ज्ञानादिस्वभावतात्मनोनुपपन्नाबुद्ध्यादिविशेषगुणोछेदरूपत्वान्मोक्षस्य॥ तथाहि॥ प्रत्यक्षादिप्रमाणप्रतिपन्ने

॥ ५४ ॥

जीवस्वरूपेपरिपाकंप्राप्तेतत्वज्ञानेनवानांजीवविशेषगुणानामत्यंतोछेदेस्वरूपेणात्मनोवस्थानंमोक्षः॥ तदु छेदेचप्रमाणमिदंयथा॥ नवानामात्मविशेषगुणानांसंतानोत्यंतमुछिद्यते। संतानत्वात्॥ प्रदीपादिसंतानवत्। नचायमसिद्धोहेतुः। पक्षेवर्त्तमानत्वात्॥ नापिविरुद्धः। सपक्षेप्रदीपादौसत्वात्॥ नाप्यनैकांतिकः। केवलपरमा ण्वादिनाप्रत्यनेः॥ नापिकालात्ययापदिष्टः॥ विपरीतार्थोपस्थापकयोः॥ प्रत्यक्षानुमानयोरत्रासंभवात्। ननुसंतानोछेदेहे तुर्वक्तव्यः। इतिचेदुच्यते। निरंतरशास्त्राभ्यासात्। कस्यचित्पुंससत्तत्वज्ञानंजायते। तेनचमिथ्याज्ञाननिहतिर्विधी यते॥ तस्यनिहतौतत्कार्यभूतारागादयोनिवर्त्तंते॥ तदभावेतत्कार्यमनोवाक्कायप्रवृत्तिर्व्यावर्त्तते॥ तद्व्यावृत्तौचध र्माधर्मयोरनुत्पत्तिः। आरब्धशरीरेंद्रियकार्ययोस्सुखादिफलोपभोगात्प्रक्षयः। अनारब्धशरीरादिकार्ययोरप्यवस्थित योस्तत्फलोपभोगादेवप्रक्षयः। ततश्चसर्वसंतानोछेदान्मोक्षइतिस्थितं॥१ अत्रप्रतिविधीयते। यत्तावदुक्तंसंतानत्वा दित्यादि। तदसमीचीनं। यतआत्मनःसर्वथाभिन्नानांबुद्ध्यादिगुणानांसंतानस्योछेदः साध्यते। भिन्नानां [illegible] वाकथंचिद्भिन्नानांवा॥ आद्यपक्षेआश्रयासिद्धोहेतुः। संतानिभ्योत्यंतंभिन्नस्यसंतानस्यासत्क त्वात्॥ द्वितीयपक्षेतुसर्वथाभिन्नानांतेषामुछेदसाधनेसंतानवत्संतानिनोप्युछेदप्रसंगः। ततश्चकस्यासौमो क्षः। भिन्नाभिन्नपक्षाभ्युपगमेचापसिद्धांतः॥ किंच॥ विरुद्धश्चायंहेतुः। कार्यकारणभूतक्षणप्रवाहलक्षणसंता नस्यनित्यानित्यैकांतयोरसंभवदर्थक्रियाकारित्वस्यानेकांतएवप्रतिपादयिष्यमाणत्वात्। साध्यविकलश्चदृष्टां तः। प्रदीपादेरत्यंतोछेदासंभवात्। तेजसपरमा णूनां भास्वररूपपरित्यागेनांधकाररूपतयावस्थानात्। प्रयोग श्चात्र॥ पूर्वापरस्वभावपरिहारांगीकारस्थितिलक्षणपरिणामवान्प्रदीपः। सत्वात्॥ घटादिवत्। दृष्टांतश्चबहुवक्तव्यं॥ तन्नुअभिप्रायस्तेविस्तरेणानेकात्प्रघट्टके॥ किंचेंद्रियज्ञानांबुद्ध्यादिगुणानामुछेदः साध्यमानोस्तिभवता॥

उतानींद्रियाणां।तत्राद्यपक्षेसिद्धसाधनमस्माभिरपितत्रतदुच्छेदाभ्युपगमात्॥द्वितीयविकल्पेमुक्तौकस्यचि
दपिप्रवृत्त्यनुपपत्तेः॥मोक्षार्थंहिसर्वोपिनिरतिशयसुखज्ञानादिप्राप्त्यभिलाषेणैवप्रवर्त्तते।नपुनःशिलारा
दकल्पकल्पमपगतस्तकलसुखसंवेदनमात्मनमुपपादयितुंयतते॥ ॥यदिमोक्षावस्थायामपिपाषाण
कल्पोपगतसुखसंवेदनलेशःपुरुषःसंपद्यते॥ ॥तदाहतंमोक्षेण॥संसारएववरीयान्॥यत्रसांतरा॥पिसुख
लेशप्रतिपत्तिरप्यस्ति।अतोनवैशेषिकोपकल्पितेमोक्षेकस्यचिदुंतुमिच्छा॥उक्तंच॥वरंवृंदावनेवासः॥श्वंगोत्वेश्व
सहोषितं।नतुवैशेषिकींमुक्तिंगौतमोगंतुमिच्छति॥१एतेनयदुच्चुमींमांसकाअपि॥यावदात्मगुणाःसर्वेनो
च्छिन्नावासनादयः॥ ॐ ॥ ॥रामचंद्रायनमः॥ ॥तावदात्यंतिकीदुःखव्यावृत्तिर्नावकल्प्यते॥१धर्मीधर्मनिमित्तो
हि॥संभवः सुखदुःखयोः॥मूलभूतौचतावेव स्तोभौसंसारसद्मनः॥२तदुच्छेदेचतत्कार्यशरीराद्यनुपपत्तेः।ना
त्मनःसुखदुःखेवस्त इत्यसोमुक्तउच्यते॥३ननुतस्यामवस्थायां कीदृगात्मावशिष्यते॥स्वरूपेकप्रतिष्ठानः
परित्यक्तोःखिलैर्गुणैः॥४ऊर्मिषट्कातिगंरूपं॥तदस्वादुर्मनीषिणः॥संसारबंधनाधीनदुःखक्लेशाद्यदूषि
तं॥५॥ऊर्मयः कामक्रोधमदेगर्वदंभलोभाः॥नहिवैशरीरस्यप्रियाप्रिययोरपहतिरस्ति॥ ॥अशरी
रंवावसंतंप्रियाप्रियेनस्पृशतइत्यादितदप्यपास्तं द्रष्टव्यं॥यतःकिंशुभकर्मपरिपाकप्रभवानिभवसंभ
वानिसुखानिमुक्तौनिषिध्यमानानिसंति॥उतसर्वथातदभावः॥आद्येसिद्धसाधनं॥द्वितीयोमिथ्याः॥आत्म
नःसुखस्वरूपत्वात्॥नचपदार्थानांस्वरूपमत्यंतमुच्छिद्यतेतिप्रसंगात्॥नचसुखस्वभावत्वमेवासिद्धं
तत्साधकप्रमाणसद्भावात्॥तथाहि॥आत्मनःसुखस्वभावोत्यंतप्रियबुद्धिविषयत्वात्॥अनन्यपरत

योपादीयमानत्वाच्च।वैषयिकसुखवत्॥यथामुमुक्षोर्मुमुक्षुप्रयत्नः।प्रेक्षापूर्वकारिप्रयत्नत्वात्॥कृषीवल
प्रयत्नवदिति॥तच्चसुखंमुक्तौपरमनिरतिशयप्रार्थ्यं।साचास्यानुमानात्प्रसिद्धा॥यथासुखतारतम्यं
क्वचिद्दृष्टं।तरतमशब्दवाच्यत्वात्॥परिमाणतारतम्यवत्॥तथाहि॥~~आत्मासुखस्वभावो~~
~~मेयंप्रियबुद्धिविषयत्वात्॥अनन्यपरत योपादीयमानत्वाच्च।वैषयिकसुखवत्~~ आनंदब्रह्म
णोरूपं।तच्चमोक्षेऽभिव्यज्यते।यदादृष्ट्वापरंब्रह्म सर्वंत्यजतिबंधनं॥१तदातन्निष्यमानः
रंमुक्तःस्वात्मनिविंदतीति श्रुतिसद्भावात्॥तथा सुखमात्यंतिकंयत्र।बुद्धिग्राह्यमतींद्रियंतं
वैमोक्षंविजानीयादुःप्रापमकृतात्मभिः॥ ॥१इतिस्मृतिवचनाच्चमोक्षस्यसुखमयत्वंप्रतिपत्त
व्यमितिस्थितं॥ ॥अत्रसांख्याब्रुवते॥शुद्धचैतन्यस्वरूपोयंपुरुषस्तस्यकुंजीकरणेप्यशक्तत्वा
दकर्त्ता॥साक्षाद्भोक्ताजडांप्रकृतिंसक्रियामाश्रितोःज्ञानतमश्छन्नतयाप्रकृतिस्थमपिसुखादि
फलमात्मनिप्रतिबिंबितंचेतयमानोमोदते॥ ॥मोदमानश्चप्रकृतिंसुखस्वभावोमोहन्य
मानःसंसारमाविशति।यदातुज्ञानमस्याविर्भवति।दुःखहेतुरियंनममानयासहसंसर्गोमुक्तः
स्यात्॥तदाविवेकख्यातेर्नतत्संपादितंकर्मफलंभुंक्ते॥ ॥सापिचविरूपाहंनमदीयंकर्मफलम
नेनभोक्तव्यमितिमत्वाकुष्ठिनास्त्रीवद्दूरादवसर्पति॥ततउपरतायांप्रकृतौपुरुषस्वरूपेणावस्थानंमो
क्षः॥स्वरूपंचचेतनाशक्तिरपरिणामिमिन्यप्रतिसंक्रमाप्रतिदर्शितविषयानंताच।अतस्तदात्मक एव
मुक्तात्मा नपुनरानंदादिस्वभावः॥ तस्यप्रकृतिकार्यत्वात्॥तस्याश्चजीवनाशंनष्टत्वात्।अत्रवयंब्रू

मः॥ यत्तावदुक्तं संसार्यात्माऽज्ञानतमश्छन्नत्वेत्यादि तदसुंदरं॥ यतः किमज्ञानमेवतमः उताज्ञानंचतमः
स्यादिति॥ प्रथमपक्षेतु मुक्तात्मापि प्रकृतिस्थोऽपि सुखादिफलं किंनात्मस्थं मन्येतज्ञानस्यबुद्धिधर्मत्वात्बुद्धेश्च
प्रकृत्यात्मनोरपृथक्त्वान्मुक्तात्मनोपिज्ञानाभावेनाज्ञानतमश्छन्नत्वाविशेषात्॥ द्वितीयपक्षेतुकिमिदमन्यान्यदन्यत्तमोनाम। रागादिकमितिचेत्। तन्न। तस्यात्मनोऽर्थांतरभूतप्रकृतिधर्मतयात्माऽदकत्वानुपपत्तेः॥ आत्माऽदकत्वेवामुक्तात्मनोप्यात्माऽदनंस्यादविशेषात्॥ किंच॥ संसार्यात्मनोकर्तृत्वेपि भोक्तृत्वेऽंगीक्रियमाणे कृतनाशाकृताभ्यागमादयोदोषाः प्रसज्यंते। अपिचप्रकृतिपुरुषयोः संयोगः केनकृतः किंप्रकृत्या। उतात्मनावा। नतावत्



॥ ५६ ॥

॥ ॥ प्रकृत्या। तस्याः सर्वगतत्वान्मुक्तात्मनोपितत्संयोगप्रसंगः अथात्मना नार्हमात्माशुद्धचैतन्यस्वरूपः सन्किमर्थं
प्रकृतिभावदत्ते। तत्रकोपिहेतुरस्ति। नवेतिवक्तव्यं। अस्तिचेन्नार्हमहेतुः प्रकृतिर्योह्यात्मावाऽन्यस्य कस्याप्यनभ्युप
गमात्। अथपक्षेः यथासाप्रकृतिरकस्यात्मनः प्रकृतिसंयोगहेतुः स्यात्। तथामुक्तात्मनः किंनस्यात्। प्रकृतिसंयोगात्
पूर्वंशुद्धचैतन्यस्वरूपत्वेनोभयोरप्यविशेषात्। नियामकाभावाच्च। द्वितीयपक्षेसआत्माप्रकृत्यात्मनोः संयोगे
हेतुत्वंप्रतिपद्यमानः किंस्वयंप्रकृतिमदकृतःसन्हेतुर्भवति। नहिदृष्टंवा। आद्योतस्यापिप्रकृतिसंयोगः कथमित्यनव
स्था। द्वितीयेपुनः सप्रकृतिरहितआत्माशुद्धचैतन्यस्वरूपः सन्किमर्थंप्रकृत्यात्मनोः संयोगे हेतुत्वंप्रतिपद्यते। तत्रकोपि
हेतुर्वक्तव्यइति। नहेच्छावर्तते इत्यनवस्था। इतिमदेतुकः प्रकृत्यात्मसंयोगोनिरस्तः। अथनिर्हेतुकस्तार्हिमुक्तात्मनोपि
प्रकृतिसंयोगप्रसंगः॥ किंत्वयमात्माप्रकृतिमुपादत्तेः पूर्वंवाऽऽजन्मवा। आद्येनित्यत्वापत्तिः। द्वितीयेतदुपादान
मेवदुर्घटं। नहिबालपाबलाभ्यंतरं। देवदत्तस्तरुणंप्रतिपद्यते। तन्नकथमपिसांख्यमतेप्रकृतिसंयोगोघटते। तत
श्चसंयोगाभावाद्भोगोपिदुर्घटएव। संयोगपूर्वकत्वात्तद्भोगस्य। किंच। यदुक्तंविवेकख्यातेरित्यादितदविचारितर
मणीयं। तत्रकोयंविवेकख्यातिर्नामप्रकृतिपुरुषयोः स्वेनरूपेणावस्थितयोर्भेदेनप्रतिभासनमितिचेत्। माकस्यप्रकृतेः पु
रुषस्यवाभानप्रकृतेः। तस्याअसंवेद्यपर्वणारहितत्वादचेतनत्वादनभ्युपगमाच्च। नाप्यात्मन स्तस्याप्यसंभवेद्यपर्वणारहित
त्वात्। तथायदपिवित्तानंरूपादूमित्याद्युक्तं। तदप्यसमीक्षितांगभाषणं। प्रकृतेर्जडत्वेविवेकज्ञानानुपपत्तेः। किंचवि
ज्ञातापिप्रकृतिः संसारदृशायत्नोक्षेत्यात्मनोभोगाय। स्वभावतोवायुक्तप्रवर्तते। तत्स्वभावस्यनित्यतयातदा
पिसत्वात्। नहिप्रकृतिस्वभावोवायुर्विरुद्धतयायेनज्ञातस्तंप्रतितत्स्वभावापरमते। इतिकुतोमोक्षस्यात्। तदात्व
मेवाप्रकृतेर्नित्यैकरूपतादानिः। पूर्वस्वभावत्यागेनोत्तरस्वभावोपादानस्यनित्यैकरूपतायांविरोधात्। परि
णामिनित्यत्वंतद्विरोधात्। प्रकृतेश्चपरिणामिनित्यत्वाभ्युपगमेआत्मनोपितदंगीकर्तव्यं। तस्यापिप्राक्तु
नस्वरूपभोक्तृस्वभावपरित्यागेमोक्षः॥ तदभोक्तृस्वभावस्वीकारात्। अमुक्तादिस्वभावोपादानाच्चसिद्धा
स्यपरिणामिनित्यतेमुक्तादपरिणामेरपिपरिणामित्वमस्याभ्युपगंतव्यं। अन्यथामोक्षाभावप्रसंगः। ततश्चनक

धर्मापि मोक्षप्राप्तिकृन्नेतोक्षो घटते। इतिप्रथमोक्तस्वरूपएवानंतसुखादिस्वरूपोभ्युपगंतव्यः। अथमोक्षतः संसरंते॥
ननुक्षानक्षणप्रवाहव्यतिरेकेणकस्याप्यात्मनो भावात्कस्यमुक्तिज्ञानादिस्वभावताप्रसाध्यते। मुक्तिश्चात्मदर्शनोद्
तो मुक्तिः। योदिपश्यत्यात्मानंस्त्रिगादिरूपंतस्यात्मनिर्वेदोयथार्थगुणदर्शननिमित्तस्तेदोवश्यंभावी। आत्मस्नेहच्छात्मस्
नेषुपारितप्यन। सुखेषुतत्साधनेषुचदोषांस्तिरस्कृत्यगुणानारोपयति। गुणदृष्टिश्चपरितप्यनममेतिसुखसाधना
न्युपादत्ते॥ ततोयावदात्मदर्शनं॥ तावत्संसारएव। तदुक्तं। यःपश्यत्यात्मानं। तत्रास्यादूमितिदृष्टश्चतः स्नेहः स्ने
हात्सुखेषुतत्साधनेषुचदोषांस्तिरस्कुरुते॥१॥ गुणदृष्टिपरितप्यन। ममेतिसुखसाधना न्युपादत्ते। तेनात्माभि
निवेशो यावन्नापैतसंसारः॥२॥ आत्मनिमतिपरसंज्ञा स्वपरविभागात्परश्चदुर्दोषः। अनयोः संप्रतिबद्धाः॥
सर्वेदोषाः समायांति॥३॥ ततोमुक्तिमिछतापुत्रकलत्रादिकस्वरूपंचानात्मकमनित्यमशुद्धिदुःखमिति। श्रुतमय्याचिं
तामय्याच्चभावनयाभावयितव्यमेवंभावयतस्तत्राभिष्वंगाभावाद्भ्यासविशेषाद्वैराग्यमुपजायते॥ ततःसश्चिव
चित्तसंतानक्षणसंसारविनिवृत्तिरूपामुक्तिरूपपद्यते। अथतद्भावनाभावेपिकायकृशत्वक्षणात्तपसः सत्कर्म
प्रक्षयान्मोक्षोभविष्यतीतिचेन्न। कायकृशत्वस्यकर्मफलतयानारकादिकायसंतापवत्तत्तपरुत्वायोगात्। विचित्रशक्ति.
कंच कर्मविचित्रफलदानान्यथानुपपत्तेः। तच्चकथंकायसंतापमात्रात्क्षीयते। अतिप्रसंगात्। अथतपः कर्मशक्ति
नांसंक्लेशक्षयकरणशक्तिरूपतिरूपाएकरूपापितपसश्चित्रशक्तिकस्यकर्मणः क्षयः। नन्वेवंक्लेशेनोपवा
सादिनाप्यशेषकर्मणः क्षयापत्तिः। शक्तिसंकल्पयन्थथानुपपत्तेः॥ उच्यते। कर्मक्षयादूर्ध्वमोक्षः सचतदुभयस्तच्चकायसंता
पः। कर्मफलत्वान्नारकदुःखमिवकथंतपस्तत्स्यात्॥१॥ अन्यदपिवैकल्पं। तच्चित्तक्षयनिमित्तमिष्टंस्यात्। तद्धिसंस्कार
क्षयकारीत्यपिवचनमात्रं। तस्मान्नैरात्म्यभावनाप्रकर्षविशेषाच्चित्तस्यनिःक्लेशावस्थामोक्षः॥४॥ अत्रप्रतिविधीयते।
तत्रयत्नावदुक्तंक्षानक्षणप्रवाहेत्यादि॥ तदविचारितरमणीयं। संतानक्षणप्रवाहव्यतिरिक्तंमुक्ताकणानुस्यूतसूत्रोपमत्व
स्थिनात्मानमंतरेणकृतनाशकृतागमाद्दोषप्रसक्तेः। स्मरणाद्यनुपपत्तेश्च। यत्पुनरुक्तं। आत्मानंयः पश्यतीत्या
दि। तत्तत्रैवं। किंत्वेतावतानोदुःखानुषक्तंसुखसाधनंपश्यन्नात्मस्नेहात्। संसारिकेषुदुःखानुषक्तसुखसाधनेषुप्रव

र्तते। अपथ्याहारमूर्वातुरवत्। दृष्टादृष्टविवेचकस्तुतात्त्विकसुखसाधनमंगनादिकंपरित्यज्यात्मस्नेहादत्यंतिकसुखः
साधनेमुक्तिमार्गेप्रवर्तते॥ पथ्याहारेचतुरातुरवत्। यदपरंतु। मुक्तौमिछतेत्यादि। तदप्यज्ञानविजृंभितं। सर्वथानित्या
नात्मकत्वादिभावनायानिर्विषयत्वेनमिथ्यारूपत्वात्। मुर्वथानित्यादिभावनावन्मुक्तिहेतुत्वानुपपत्तेः। नहिकालांतरावस्थ्ये
कानुसंधानव्यतिरेकेणभावनाप्युपपद्यते॥ तथाहिनिगमादिभिर्दूरत्यजतन्मुक्तिकारणपरिज्ञानाभिसंधि
व्यापारेमतिमोक्षःस्त्रीकाधिकारएवसत्यबंधमोक्षव्यवस्थोक्तेप्रसिद्धा॥ दूरत्यजःक्षणोबद्धोन्यस्यचतन्मुक्तिकारणपरि
ज्ञानमन्यस्यचानुज्ञानाभिसंधिर्व्यापारश्चेति। वेश्यधिकरण्यात्। सर्वंप्रयुक्तं। किंच। सर्वबुद्धिमान। बुद्धिपूर्वंप्रवर्तमानः कि
ञ्चिदृष्टमतोममस्यादित्यनुसंधानेनप्रवर्तेत। दृष्टंचकृतबुद्धीमार्गाभ्यासेप्रवर्तमानोमोक्षोममस्यादित्यनुसंधात्। क्षणः
संतानोवा। नतावत्क्षणस्तस्यैकक्षणस्थितयानिर्वर्त्यकृतस्यान्येनावेदोव्यापारानकर्तुमसमर्थत्वात्। नापिसंता
निव्यतिरिक्तस्यसोगतैरभ्युपगमात्। किंचनिरन्वयविनश्वरेचेतसंस्कारणांमोक्षार्थः प्रयासोव्यर्थएवस्यात्। यतोरागाद्युपर
मोदृष्टवन्मतेमोक्षः। उपरमश्चविनाशः। सचनिर्हेतुकतयायत्नासिद्धः ततस्तदर्थानुष्ठानादिप्रयासोनिःफलएव। किंच। ते
नमोक्षार्थानुष्ठानेनप्राक्तनस्यरागादिक्षणस्यनाशः क्रियते। भाविनोवा। नुत्पादस्तदुत्पादकत्राकेवाक्षियः। संतानस्योछेदो
वा। अनुत्पादोवा। निराश्रयचित्तसंततयुत्पादोवा। तत्राद्योनुपपन्नविनाशस्यानिर्हेतुकतयाभवन्मतेकुतश्चिदुत्पत्तिवि
रोधात्। दूसीयोप्यतएवासाधीयान्। उत्पादाभावेदृष्टानुत्पादः सोभावरूपतात्कथंकुतश्चिदुत्पद्यते। पासदुत्पन्नप्र
संगात्। तृतीयेक्षयोनुपपन्नः। तस्याप्यभावरूपतयानिर्हेतुकत्वेनभवन्मतेकुतश्चिदुत्पत्तिविरोधात्। संतानस्योछेदो
र्थोनुत्पादार्थोवा। तत्प्रयासस्त्यप्येवंनिरस्तं। क्षणोछेदानुत्पादवत्। तयोरप्यभावरूपतयानिर्हेतुकत्वात्कुतोप्यस
त्यनुपपत्तेः। किंच। वासनाबल्यसंतानस्यानभ्युपगमात्। कुतस्तदुछेदादिप्रयासेन। नहिमृतस्यमारणंकुत्रापिदृष्टं तन्न
संतानोछेदरूपक्षणाभावोमुक्तिर्घटते। अथनिराश्रयचित्तसंततयुत्पादरूपक्षणः। तत्प्रयाससाध्येतिपक्षस्तुन्यायः। केवलं
साचित्तसंततिः सान्वयव्यतिरेव्याचेतिवक्तव्यं। आद्योसिद्धसाधनं। तथाभूतएवचित्तसंतानेमोक्षोपपत्तेः। बद्धोहिमु
च्यतेनाबद्धः। द्वितीयोनुपपन्नो निरन्वयेहिसंतानेनाबध्यतेनमुच्यते। तथाचबद्धस्यमुक्त्यर्थप्रवृत्तिर्नस्यात्॥

कृतनाशादयश्च दोषाः दृष्टकरणाभावेति। तथा यदुक्तं। कायक्लेशेत्यादि। तदप्यसत्यं। देसाविरतिरूपव्रतोपबृंहकस्य कायक्लेशस्य कर्मफलत्वेपि तपस्त्वाविरोधात्। व्रताविरोधीदृक्कायक्लेशः। कर्मजरादेतुत्वात्तपोभिधीयते। नचैवं नारकादिकायक्लेशस्यतपस्त्वप्रसंगः। तस्यहिंसाद्यविरोधिप्रधानतयातपस्त्वविरोधित्वात्। अतः कथंप्रेक्षावतांतेन समानतासाधकायक्लेश्या पादयितुंशक्या। यदपिउपबृंहकसंक्लेशत्वेनेत्यादिप्रोक्तं। तत्तस्तनमेव। विचित्रफलदानसमर्थानांकर्मणां। शुक्लसंक्लेशमात्रक्षीणमोहांत्यसमयेयोगिचरमसमयेवा क्लेशनत्वेनैवशुक्लध्यानेनतपसाप्रेक्षयाभ्युपगमात्। जीवन्मुक्तेः परममुक्तेश्चान्यथानुपपत्तेः। तनुतन्यूनसंक्लेशबहुतरकायक्लेशसाध्यातियुक्तस्तदर्थोनेकोपवासादिकायक्लेशाद्यनुष्ठानप्रयाससमंतरेणतत्संक्लेशानुपपत्तेः। ततः कथंचिदनवच्छिन्नोज्ञानसंतानोनेकविधतपोनुष्ठानान्मुच्यते। तस्यचानंतचतुष्टयरूपसाक्षान्मोक्षप्राप्तिप्रतिपत्तव्यं। २॥ अथान्यदिगंबराः स्वयूथ्यान्स्फोरयंति। ननुभवतुयथोक्तलक्षणोमोक्षः परंस्त्रीपुरुषस्यैवघटते। नचैतावतायाः। तथाहि। नास्त्रियोमोक्षभाजनंभवंति॥ पुरुषेभ्योहीनत्वात्। नपुंसकवत्। अत्रोच्यते। स्त्रीणांपुरुषेभ्योहीनत्वंकैश्चिदाद्यभावेन। १। द्वितीयसामर्थ्याभावेन। २ पुरुषानभिभवत्वेन। ३ संसारस्याद्यकर्तृत्वेन। ४ अमर्दृष्टिकत्वेन ५ मायादिप्रकर्षत्वेनच। ६। तत्रान तावदाद्यपक्षः क्षोदक्षमः। यतः किंचारित्राभावः सचेलत्वेन १ संश्लिष्टत्वतयावा २ तत्रयद्याद्यः पक्षस्तदासचेलस्यापिचारित्राभावहेतुत्वंकिंपरिभोगमात्रेण १ परिग्रहरूपतयावा २ यदिपरिभोगमात्रेणतदापरिभोगोपि किं वस्त्रपरित्यागसमत्वेन १ संयमोपकारित्वेनवा २ तत्रनतावदाद्यो यतः प्राणेभ्योनापरंप्रियं प्राणानप्येतान्परित्यजंतोदृश्यते। वस्त्रस्यकाकथा। अथसंयमोपकारित्वेन। तर्हिकिंपेनेदृशेनापिसंयमोपकारितयावस्त्रपरिभोगः। अथाबलात्कारेणा बलादपिपुरुषैरुपभुज्यंते। इतितदृतानासांसंयमबाधासंभवो नपुनर्नग्नानामिति। ततेषांतदुपभोगइतिचेत्। तर्हिनवस्त्राद्याश्चारित्राभावः। तदुपकारित्वान्नस्यआहारादिवत्। नापिपरिग्रहरूपतया। यतोस्यतदूपतायाकेमूर्छाहेतुत्वेन १ धारणमात्रेणवा २ अथनाम्यर्शमात्रेण ३ जीवसंसक्तिहेतुत्वेनवा ४ तत्रयद्याद्यस्तर्हिदृग्मोहनीयस्यापिमूर्छायाहेतुर्नवा। नतावद्धेतुस्तस्यांतरंगत्वेनदुर्भेदतयाविशेषतस्तद्धेतुत्वात्। अथमूर्छायाहेतुरितिपक्षस्तर्हिवस्त्रेवतनग्न्यापिकेदृश्यत्वेन १ मुक्त्यंगतयावा २ नपथमतएव परिग्रहो यद्दृश्यत्वेनेतिपक्षस्तदातद्

॥ ५८ ॥

कारणशुभमनोवीर्यपरमप्रकर्षः प्रकर्षवत्त्वात्। सममरुथीगमनकारणशुभमनोवीर्यपरमप्रकर्षवत्। नेदेतदयुक्तं। व्याप्तेरभावात्। नहिबाह्यैर्व्याप्तिमात्रेणहेतुर्गमकःस्यात्। किंतर्व्याप्या॥ अन्यथातत्पुत्रत्वादेरपिगमकत्वप्रसंगः। अंतर्व्याप्तिश्चप्रतिबंधेनैववसिध्यति। नचात्रप्रतिबंधोविद्यते। ततःसंदिग्धविपक्षव्यावृत्तिकमिदंसाधनं। चरमशरीराभिर्नैश्चित्यव्यभिचारत्व। तेषांहिसममरुथीगमनहेतुमनोवीर्यप्रकर्षाभावेपिमुक्तिहेतुमनोवीर्यप्रकर्षसद्भावात्॥ तथामत्स्यादिव्यभिचारः। तेषांहि सममरुथीगमनहेतुमनोवीर्यप्रकर्षसद्भावेपिनमुक्तिगमनहेतुशुभमनोवीर्यप्रकर्षसद्भावइति। तथानस्त्रियोमोक्षगमनं मुक्तिःलोका। तेषामूर्ध्वगतावपिमुक्तिः स्तोकैर्वाभुजपरिसर्पादिभिर्व्यभिचारात्। तथाहि। भुजपरिसर्पोभवाद्वितीयायामवरुथींगच्छति। ततस्तोभवात्क्षिप्तस्ततोमोक्षात्॥ चतुर्थीचचतुष्पदाः। पंचमीमुरगाः। अथचसर्वेभ्यूर्ध्वमुत्कर्षतःसप्तम्यांयावद्गच्छंति। अतोनसम्यग्मरुथीगमनयोग्यत्वेनविशिष्टसामर्थ्यासत्वं। नापिवादाद्विलब्धिरहितत्वेनमूकैर्वलिभिर्व्यभिचारात्। तथा। अपश्चत्वेनेतिपक्षस्तनुष्ठोप्यएव॥ मुनयवाप्यनुमितविशिष्टसामर्थ्यमाप मृषादृष्टिभिरनैकांतिकत्वात्॥ न चविशिष्टसामर्थ्यासत्वंस्त्रीणांघटते॥ नापिपुरुषानभिवंद्यत्वेनस्त्रीणांहीनत्वं। यतस्तदपिकैसामान्येन। गुणाधिकपुरुषापेक्षयावा। आद्योसिद्धःतीर्थंकरजननन्यादयः स्त्रीरपिदृश्यंते। किंमगडोषपुरुषैः द्वितीयश्चेन्नरागणधरादिभितीर्थंकरैर्नाभिवंद्यते॥ इतितेषामपिहीनत्वान्मोक्षानस्यात्। तथाचातुर्वर्ण्यस्यसंघस्यतीर्थंकरवंद्यत्वाद्यर्थांतर्गतत्वेनसंयतानामपितीर्थंकरवंद्यत्वाभ्युपगमात्। कथंस्त्रीणांहीनत्वं। अथस्मारणाद्यकर्तृत्वेनेतिपक्षस्तदाऽऽचार्याणामेवमुक्तिःस्यान्नस्त्रीणां। तेषांस्मारणाद्यकर्तृत्वात्। अथामहर्द्धिकत्वेनेतिपक्षः सोपिनदृश्यः। यतोदरिद्राणामपिकेषांचिन्मुक्तिःश्रूयते। केषांचिन्महर्द्धिकाणामपिनक्रवर्त्यादीनांतदभावः। अथमायादिप्रकर्षकत्वेनेतितदपिनयुक्तं। नारदरुद्रप्रद्युम्नादिभिर्व्यभिचारात्। तेनहीनत्वंकथमपिस्त्रीणांनाघटीतातिहीनत्वादित्यसिद्धोहेतुः। ततश्चाविज्ञानेनपुरुषाणामिवयोषाणामपिनिर्वाणप्राप्तिरुपपन्नव्या। प्रयोगश्चात्र। अस्तिस्त्रीणांमुक्तिः। अविकलकारणत्वात्। पुंवत्। तत्कारणानिसम्यग्दर्शनादीनि। स्त्रीषुसंपूर्णान्युपलभ्यंते। ततोभवत्येवस्त्रीणांमोक्षप्राप्तिःसिद्धंतमोसततत्वं॥ एतेनज्ञानिनोधर्मतीर्थस्यकर्तारःपरमंपदंगत्वागच्छंति भूत्वापिभवंतीर्थनिकारतदतिपरपरिकल्पितंपराकृतं। एतानिनवतत्वानि यःश्रद्दधातिछद्मस्थोयः सम्यग्ज्ञानयोगो

न तस्यचारित्रयोग्यता॥ ५३॥ ॥ एतान्यनंतरोदितानिनवसंख्यानितत्वानियःछद्मस्थोनपुनःसूक्ष्मादिना लब्धिचित्तः श्रद्दधातिस्यात्तानसर्वज्ञत्वात्तानेतिश्रद्दधाति। अवेपरीत्येनमन्यते एतावतज्ञानशून्यश्रद्दधानोमिथ्यादृगेवेतिसूचितं। यथोक्तं श्रीगंधहस्तिभद्यानेर्कै। द्वादशंगमपिश्रुतंविदुर्ज्ञानस्यमिथ्येति। तस्यश्रद्दधानस्यसम्यग्ज्ञानयोगेनासम्यग्ज्ञानदर्शनसद्भावेन। चारित्रस्यसर्वसावद्यव्यापारनिवृत्तिरूपस्य। देशसर्वभेदस्ययोग्यताभवति। अत्रज्ञानात्सम्यक्त्वस्याधान्येनपूर्वत्वात्। प्राग्निपातः। अनेनसम्यक्त्वज्ञानसद्भावएवचारित्रंभवति। नान्यथेत्यावेदितंद्रष्टव्यं॥ ५३॥ ॥ तथाभव्यत्वपाकेनयस्यैतन्त्रितयंभवेत्। सम्यग्ज्ञानाक्रियायोगात्तस्यायंमोक्षभाजनं॥ ५४॥ ॥ जीवाद्विधा। अभव्याभव्याश्च। अभव्यानांसम्यक्त्वाद्यभावः। भव्यानामपिभव्यत्वपाकमंतरेणतद्भावएव। तथाभवत्वपाकेतुतद्भावः ततोत्रायमर्थः। भविष्यतिविवक्षितपर्यायेणेतिभव्यः। तद्भावोभव्यत्वं। भव्यत्वेनाभिधानयोग्यत्वंजीवानामनादिपारिणामिकोभावः। एवंसामान्यतोभव्यत्वमभिधायाधुनातदेवप्रतिविशेषमभिधातुमाह। तथातेनानियतप्रकारेणभव्यत्वंतथाभव्यत्वं। उक्तंभावः। भव्यत्वमेवस्वस्वकालक्षेत्रगुणद्रव्यलक्षणसामग्रीभेदेन। नानाजीवेषुभिद्यमानंसत्। तथाभव्यत्वमुच्यते। अन्यथाऽनुसैर्वैः प्रकारैरेकाकारायांयोग्यतायांसर्वेषांभव्यजीवानांयुगपदेवधर्मप्राप्त्यादिभवेत्। तथाभव्यत्वस्ययःपाकःफलदानाभिमुख्यं तेनतथाभव्यत्वपाकेनयस्यकस्यापिसागरोपमकोटाकोट्यभ्यंतरानीतसर्वकर्मस्थितिकस्यभव्यस्येतान्त्रितयंज्ञानदर्शनचारित्रत्रयंभवेत्। यत्नरोर्नैत्यभिसंबंधात्संभव्यः। सम्यक्समीचीनेयेज्ञानक्रियेज्ञानचारित्रेयोर्योगात्संयोगात्तस्यमोक्षस्यबंधवियोगस्यानंतज्ञानदर्शनसम्यक्त्वसुखवीर्यपंचकात्मकस्यभाजनंलक्षणंज्ञायते। एतेनकेवलाभ्यांज्ञानक्रियाभ्यांनमोक्षः किंभाभ्यांसंयुक्ताभ्यांताभ्यामितिज्ञापितंभवति। अत्रज्ञानंश्रद्धानेनसदासहचरत्वेसद्दर्शनमपिग्राह्यं। यद्वाचयाचकमुख्यः सम्यग्ज्ञानदर्शनचारित्राणिमोक्षमार्गइति॥ ५५॥ ॥ प्रत्यक्षादिप्रमाणविशेषलक्षणमत्रग्रंथेकारःस्वयमेववक्ष्यति। तच्चाविशेषलक्षणंसामान्याविनाभावि। सामान्यलक्षणंचविशेषाविनाभावि।सामान्यविशेषलक्षणयोरन्योन्यापरिहारेणस्थितत्वात्। तेनप्रमाणविशेषलक्षणस्यादौ प्रमाणसामान्यलक्षणंसर्वत्रवक्तव्यं। अतोत्रापिप्रथमंतदभिधीयते। स्वपरव्यवसायिज्ञानंप्रमाणमिति। प्रकर्षणसंशयाद्यभावस्वभावेनमीयते। परिच्छिद्यतेवस्तुयेन

तत्प्रमाणं। समानात्तानस्वरूपं। परःस्वस्मादन्योर्थोऽतियावत्। तोविशेषेणयथावस्थितस्वरूपेणानुमितिनिश्चिनोतीत्येवंशी
लंयत्। ततस्वपरव्यवसायिज्ञानायतेप्राधान्येनविशेषणज्ञानेनेतिज्ञानं॥ अत्रज्ञानमितिविशेषणज्ञानस्वरूपस्यव्यवहार
मार्गानवतारिणः। सन्मात्रगोचरस्यसमयप्रसिद्धस्यदर्शनस्यसन्निकर्षादेश्चाचेतनस्यनव्यायिकादेरचेतनत्वेनप्रामाण्य
पराकरणार्थंज्ञानस्यापिचप्रत्यक्षरूपस्यशाक्यानांविकल्पतयाप्रामाण्येनकल्पितस्यसंव्यायिविषयेयानध्यवसायानांचप्रमा
णत्वव्यवच्छेदार्थंव्यवसायांत। पारमार्थिकपदार्थसार्थोपलब्धिहेतुत्वादिवादिमंतमपाकर्तुंपरोक्षबुद्धिवादि
नांमीमांसकानामेकान्तसमवायिज्ञानांतरप्रत्यक्षज्ञानवादिनांवैशेषिकयोगानामचेतनज्ञानवादिनांकापिलानांचकटाक्ष
नियत्तायत्वेति। समग्रंलक्षणवाक्यंपरापरिकल्पितस्यार्थोपलब्धिहेतुतादेःप्रमाणलक्षणत्वप्रतिक्षेपार्थं। अत्रचस्वस्यग्र
हणयोग्यःपरोऽर्थः स्वपरशब्दस्यापिसमासस्याश्रयाद्दूरव्यवहारितानापेक्षयायस्य। यथायत्रज्ञानस्याविसंवादः। तस्यतथात
वप्रामाण्यमित्यभिहितंभवति। तेनसंशयादेरपिधर्मिमात्रापेक्षयानप्रामाण्यव्यावृत्तिः॥ अथविशेषलक्षणाभिधायिप्रथ
मंतावत्प्रमाणसंख्याविषयंवाह॥ ५५॥ ॥प्रत्यक्षंचपरोक्षंचद्वेप्रमाणेतथामते॥ अनंतधर्मकंवस्तुप्रमाणविषयस्त्विह॥
॥ ५५॥ ॥ अक्षमिंद्रियंप्रतिगतमिंद्रियाधीनतयायदुत्पद्यते। तत्प्रत्यक्षमितितत्पुरुषः। इंद्र्युत्पत्तिनिमित्तमेवप्रवृत्ति
निमित्तंतुस्पष्टत्वं। तेनानिंद्रियादिप्रत्यक्षमपिप्रत्यक्षमाख्यातुं। अक्षोजीवोवाव्याख्येयोजीवमाश्रित्येवेंद्रियानि
रपेक्षमनिंद्रियादिप्रत्यक्षस्योत्पत्तेः॥ अतत्पुरुषाश्रयणात्प्रत्यक्षोबोधः प्रत्यक्षाबुद्धिरित्यादौस्त्रीपुंस्वभावोपि
सिध्यः। अक्षाणांपरमक्षव्यापारनिरपेक्षमनोव्यापारेणाः साक्षादर्थपरिच्छेदकंपरोक्षमितिपरशब्दसमानार्थे
परशब्देनासिद्धवत्तोर्द्वयोरपितुल्यकक्षतांलक्षयतः। तेनानुमानादेः परोक्षस्यप्रत्यक्षपूर्वकत्वेनप्रवृत्तेर्यत्किंश्चि
त्प्रत्यक्षंश्रेष्ठमभीष्टमेतन्नश्रेष्ठमितिसूचितं। द्वयोरपिप्रामाण्यप्रतिविशेषाभावात्। परश्यमोधावनात्पादोप्रत्यक्षस्या
पिपरोक्षपूर्वकस्यप्रवृत्तेः परोक्षस्यश्रेष्ठता प्रसंगात्। प्रत्यक्षपूर्वकमेवचपरोक्षमुपजायते। इतिनायंसर्वत्रैकांतः॥
अन्यथानुपपन्नताऽवधारितोच्छ्वासनिःश्वासादिर्जीवलिंगसद्भावसद्भाव्यंजीवसाक्षात्कारिप्रत्यक्षलक्षणोपजी
वन्प्रतीतिदर्शनात्। अन्यथालक्ष्यव्यवहाराभावप्रसंगात्। तथाह्यः प्रागुक्तनयतत्वादीपेक्षयासमुच्चेयेवा

क्यस्यसाधारणत्वात्। दूरेण। प्रत्यक्षपरोक्षेप्रमाणमतेसंमते। यदपिपरैरुक्तंत्रयातिरिक्तंप्रमाणसंख्यांतरंप्रत्य
तायि। तत्रार्थापत्त्यादिवत्प्रमाणतामात्मासात्करोति। तदन्ययोरेवप्रत्यक्षपरोक्षयो
रंतर्भावनीयं। यत्पुनर्विचार्यमाणंमीमांसकपरिकल्पितंभाववत्। प्रामाण्यमेवनातिक्रामति। ननेनबहिर्भूतेनवास
योजनं। अवस्तुत्वादित्यपकर्णनीयं। तथाहि। प्रत्यक्षानुमानागमोपमानार्थापत्यभावसंभवैतिह्यप्रतिभयुक्तयनुपलब्ध्या
दीनिप्रमाणानियानिपरैरुचुः। तत्रानुमानागमोपरोक्षप्रकारावेवविज्ञातव्यौ। उपमानंतुनैयायिकमतेकश्चित्प्रेष्यः।
प्रभुणाप्रेषयांचक्रे। गवयमानयेति। सगवयशब्दगाच्यमर्थंप्रेष्यानानाकंचनवनेचरंपुरुषमप्राक्षीत्। कादृग्गवयइति
सप्राह यादृग्गौरुतादृग्गवयइति। ततस्तस्यप्रेष्यपुरुषस्यप्राप्तिदृश्यवाक्यार्थमनुस्मरणसदृकारि। गोसदृशगवयपिं
डज्ञानमयंसगवयशब्दाद्यस्यार्थस्यप्रतिपत्तिफलरूपमुत्पादयत्प्रमाणमिति। मीमांसकमतेतु। येनप्रतिपन्नागोरूपस्य
ध्यानगवयेनचातिदेशवाक्यंगोरिव। गवयइतिश्रुतं। तस्यविकटाटवीपर्यटतोगवयदर्शनेप्रथमसमुत्पन्नेसतियत्प
रोक्षंगवियसादृश्यंतान्प्रतिपद्यते। अनेनसदृशः सगोरिति। तस्यगोरनेनसादृश्यमितिवा। तदुपमानं। यस्मात्यत्तस्मां
र्थंतेनतस्यात सादृश्येनविशेषितंप्रमेयमुपमानस्यसादृश्यंवातदन्वितं॥१॥ ॥ इतिवचनादिति। एतच्चपरोक्षभेद
नप्रत्यभिज्ञायामंतर्भाव्यं। अर्थापत्तिरपि। प्रमाणषट्कविज्ञातोयत्रार्थोनान्यथाभवन्। अदृष्टंकल्पयेदन्यं सार्थापत्ति
रुदाहृता॥२॥ इत्येवंलक्षणानुमानांतर्गतैव। अर्थापत्युत्थापकस्यार्थस्यान्यथानुपपत्तिनिश्चयेनैवादृष्टार्थपरिकल्प
नात्। अन्यथानुपपत्तिनिश्चयस्यानुमानत्वात्। अभावोवाक्यंप्रमाणं। प्रमाणपंचकाभाव॥१॥ स्वस्मादन्यत्तानरसात्मावा
त्तानविनिर्मुक्तरातन्निधाभिधीयते॥ तत्राद्यपक्षस्यासंभवनत्वप्रसज्यरूपत्वाप्रमाणपंचकाभावस्यतुच्छत्वेनावस्तुत्वा
द्भावतानज्ञानकत्वात्रोगात॥१॥ द्वितीयपक्षेतुपर्युदासरूपत्वात्तदन्यत्तानं। तत्प्रत्यक्षमेवप्रत्यक्षेणैवघटादिविवि
क्तस्यभूतलादेर्ग्रहणात्क्वचिन्नुतदघटभूतलमितिप्रत्यभिज्ञानेनवाग्निमान्नभवति। नासौधूमवानिति। तर्कोणवा।
अधूमानग्नेरित्यनुमानेनवहेरभावप्रतीतेः। वाभावप्रमाणंप्रवर्तता॥ द्वितीयपक्षस्यपुनर
संभवएव। आत्मनोज्ञानाभावेकथंवस्तुभावावेदकत्वं। वेदनस्यज्ञानधर्मत्वात्। अभावावेदकत्वेवाज्ञानविनिर्मुक्तत्वस्या

भावात्। तन्नाभावः प्रमाणांतरं। संभवोपि मुद्रायेनसमुद्रज्ञानेन। वगमरत्येवलक्षणः। संभवतिरवार्योद्रोणकुंभ्यादिकाना
मनुमानात्पृथक्। तथाहि। खारीद्रोणवती। खारीत्वात्। पूर्वोपलब्धखारीवत्। इतिलिंगवचनिर्देशप्रवृत्तेः। प्रवादपारंपर्य
मेवमवर्तेद्धाः। अर्थोपत्तिरपि प्रतिपत्तिसमानमनिर्दिष्टवक्तृकत्वेनसांशयिकत्वात्। आप्तप्रवक्तृत्वेकनिश्चयत्वागमव
ति। यदपिप्रातिभमस्खलिगत्वाद्व्यापारानपेक्षमनुमादेवाद्यंममद्दापतिप्रसादोभविते त्याकारंस्पष्टतयावेदनमुदयेते।
तदप्यनिंद्यमनिबंधनतयामानसमितिप्रत्यक्षनुक्षिनिक्षिप्तमेव। यत्पुनः प्रियाप्रियप्राप्तिप्रभृतिफलेनसार्थंगृहीतान्य
थानुपपत्तिकात्मनः प्रसादोद्भूगादेर्लिंगादुदेति॥ ततपिपीलिकापटलोत्पर्णोत्थज्ञानवदस्पष्टमनुमानमेव॥ एवंयुक्त्यः
नुपलब्ध्योरादिशब्दाद्वाक्षोपलब्धिज्ञानमनकस्यबोधाबोधरूपविशेषत्यागेनसामान्यतोलिंगितंसाक्षिणोभुक्तिः। प्रमा
णांत्रिविधंस्मृतमित्युक्तस्यप्रमाणस्यान्येषांचकेषांचित्प्रमाणांतरत्वेनपरपरिकल्पितानांयथात्कक्षणं। प्रत्यक्षपरोक्षयो
रंतर्भावेनानिराकरणंचाविरोधं। तदेवंप्रत्यक्षपरोक्षलक्षणद्वैविध्यातिक्रमंशक्रोपिकर्तुंक्षमः। अथतयोर्लक्षणाद्यभिधीय
ते। स्वपरव्यवसायिज्ञानंस्पष्टंप्रत्यक्षं। तद्विप्रकारं। सांव्यवहारिकंपारमार्थिकंच। तत्रसांव्यवहारिकं। बाह्येंद्रियादिसामग्री
मापेक्षत्वादपारमार्थिकमस्मदादिप्रत्यक्षं। पारमार्थिकंतुतावन्मात्रापेक्षमेवध्यादिप्रत्यक्षं। सांव्यवहारिकंद्वैधा
वैशद्यादींद्रियानिंद्रियनिमित्तं। मनोनिमित्तंच। तद्द्विविधमपिचतुर्धा। अवग्रहेहावायधारणाभेदात्। तत्रविषयविषयि
संनिपातानंतरसमुद्भूतसत्तामात्रगोचरदर्शनाज्जातमाद्यमवांतरसामान्याकारविशिष्टवस्त्वग्रहणमवग्रहः। अस्यार्थः। वि
षयोद्रव्यपर्यायात्मकोर्थो। विषयीचक्षुरादिरस्तयोः समीचीनोभ्रांत्याद्यजनकत्वेनानुकूलोनियतोयोग्यदेशावस्थानं त
स्मादनंतरंसमुद्भूतमुत्पन्नंयत्सत्तामात्रगोचरंदर्शनंनिराकारोबोधस्तस्माज्जातमाद्यं सत्तासामान्यादवांतरेमनुष्य
त्वादिभिन्नेतिविशेषार्वाक्शिरस्यवस्कंदतोयद्भूरूपंज्ञानं। तदवग्रहः। पुनरवग्रहीतविषयसंख्यानंतरंतद्विशेषाकांक्षणमी
हा तदनंतरंतद्विशेषनिर्णयोवायः। अथेतविषयस्मृतिहेतुस्तदनंतरंधारणा। अत्रचपूर्वपूर्वस्यप्रमाणो
त्तरोत्तरस्यचफलतेत्येकस्यापिमतिज्ञानस्यचातुर्विध्यंकथंचित्प्राणफलभेदव्यवस्थोपपद्यतः। तथायद्यपिक्रमभा
विनामवग्रहादीनांहेतुफलतयाव्यवस्थितानांपर्यायार्थादेश तथाप्येकजीवतादात्म्येनद्रव्यार्थादेशादभेदेपि

कथंचिद्विरुद्धं। अन्यथाहेतुफलभावाभावप्रसक्तेर्भवेदितिप्रत्येयं। धारणास्वरूपाचमतिरविसंवादस्वरूपस्मृतिफलस्यहे
तुत्वात्प्रमाणं। स्मृतिरपितथाभूतप्रत्यवमर्शस्वभावसंज्ञाफलज्ञानकत्वात्। संज्ञापितथाभूततर्कस्वभावचिंताफलज्ञान
कत्वात्। चिंताप्यनुमानलक्षणाभिनिबोधफलज्ञानकत्वात्। सोपिहानादिबुद्धिजनकत्वात्। तदुक्तं। मतिःस्मृतिः संज्ञाचिंता
भिनिबोध इत्यनर्थांतरं॥ अर्थांतरमिति कथंचिदेकविषयं। प्राकृशब्दयोजनान्मतिज्ञानमेतत्। शेषमनेकप्रभेदं। शब्द
योजना दृष्टव्यायमानमविसंवादं ज्ञानंश्रुतमिति केचित्। सिद्धांतिकास्तवयद्वैद्धा। बाह्यधारणाप्रभेदरूपायामतेर्वाचका
पर्यायशब्दाः। मतिःस्मृतिः संज्ञाचिंताभिनिबोध इत्येतेशब्दाःस्मृतिप्रतिपन्नाः। स्मृतिसंज्ञाचिंतादीनांचकथंचित्तद्वै
लक्षण्याद्विसंवादकत्वा दनुमानवत्प्रमाणतोभ्युपेया। अन्यथाव्याप्तिग्राहकप्रमाणेनगृहीतविषयत्वेनानुमान
स्याप्रमाणताप्रसक्तेः। अत्रचयद्यदंशंसंयोजनातप्राकूस्मृत्यादिकमवि संवादित्वव्यवहारनिवर्तनक्षमंवर्तते। तन्मतिः शब्द
संयोजनात्पाङ्भूतंसर्वंश्रुतमिति विभागः। स्मृतिसंज्ञादीनांचस्मरणतर्कानुमानरूपाणांपरोक्षभेदानामपियाद्दृ
प्रत्यक्षाधिकारे न्नंमतिश्रुतविभागज्ञानाय प्रसंगेनेतावदुक्तेयं। अथपरोक्षंभविष्यदविसंवादिज्ञानंपरोक्षं। स्म
रणप्रत्यभिज्ञानतर्कानुमानागमभेदतस्तत्पंचधासंस्कारप्रबोधसंभूतमनुभूतार्थविषयंतदित्याकारंवेदनंस्मरणं। य
थातत्रार्थकरबंबमिति। अनुभवस्मरणकारणकंसंकलनंप्रत्यभिज्ञानंतदेवेदंतत्सदृशंतद्विलक्षणंतत्प्रतियोगीत्या
दि। यथासएवायंदेवदत्तः। गोसदृशोगवयः। गोविलक्षणोमहिषः। इदमस्माद्दीर्घह्रस्वमणीयोमहीयोदवीयोवा।
दूरादयंतीव्रोवह्निः। क्रूरभीदंवंदनमित्यादि। अत्राद्यिग्राह्यातसाध्यवान्हिरनुमीयते॥ सएवानेनाप्यर्थः कथ्यते। इत्यादि
स्मरणसाचिवानुमानागमाद्यजन्यंचसंकलनमुदाहार्यं। उपलंभानुपलंभसंभवं त्रिकालीकलितसाधनसंबंधाद्यालंबन
मिदमस्मिन्सत्येवभवतीत्याकारसंवेदनंतर्कः। यथाग्नेरसत्येवधूमोभवति। तदभावेनभवत्येवेति। अनुमानंद्विधा
स्वार्थंपरार्थंच। तत्रस्वार्थंसंबंधस्मरणेतुकंसाध्यविज्ञानंस्वार्थं। निश्चितान्यथानुपपत्तिकलक्षणाद्धेतोः। इदमस्मिन्सति
तत्रैवभवितुमर्हतीत्यर्थः। साध्याविनाभुवोधर्मस्यपक्षः। पक्षहेतुवचनात्मकंपरार्थमनुमानमुपचारात्। संदर्भतोमुख्य
त्वादायंतुदृष्टांतोपनयानुगमनोन्यापिप्रयोज्यानि। दृष्टांतोद्विधा। अन्वयव्यतिरेकभेदात्। साधनसत्तायांयत्रावश्यंसा

ध्यमनाप्रस्तुत्यर्थत्वेनोपयोगाभावात्। उदाहरणं दृष्टान्तः। साध्याभावे साधनाभावो यत्र कथ्यते। सोऽन्वयव्यतिरेकदृष्टान्तः। हेतोरुपसंहारः उपनयः। प्रतिज्ञाया रूपसंहारो निगमनं। एते पक्षादयः पंचावयवाः कीर्त्यन्ते इत्याह। अत्रोदाहरणं। परिणामी वाङ्मनः कृतकत्वात्। यः कृतकः स परिणामी दृष्टो। यथा घटः। कृतकश्चायं। तस्मात्परिणामी। यस्तु न परिणामी। स न कृतको दृष्टो। यथाकाशमध्यासनमध्ययः। कृतकश्चायं। तस्मात्परिणामीत्यादि। नन्वत्रान्वयिदृष्टान्तस्यथानुपपत्तेरेव केवलो हेतोर्लक्षणमभ्यधायि। किं न पक्षधर्मत्वादित्रैरूप्यमिति चेत्। उच्यते। पक्षधर्मत्वादित्रैरूप्यं सत्यपि तत्प्रयोगता दोषो हेतोर्गमकत्वदर्शनात्। असत्यपि तत्प्रयोगता दोषो हेतोर्गमकत्वदर्शनात्। तथाहि। नक्तंचरान्नभश्चरः। कृत्तिकोदयात्पूर्वफल्गुन्युदयः पूर्वफल्गुनीतः। शशांकोदयात्समुद्रवृद्धिः। सूर्योदयात्पद्माकरबोधो। दृक्षात्छाया चेति पक्षधर्मतादिरूपं सर्वज्ञेनेरुप्यते। कालादिकमत्र धर्मिसमस्त्येवेति केनाप्यतिप्रसंगात्। एवंविधस्यानित्यत्वेसाध्येकार्थकाक्षार्थादेरपि गमकत्वप्रसक्तेः। लोकादिधर्मिणस्तत्रकल्पयितुं शक्यत्वात्। अनित्यः शब्दः श्रवणत्वात्। मद्भूतायंत्रविधस्वरान्यथानुपपत्तेः। सर्वनित्यपक्षसत्वादित्यादिष्वसपक्षसत्वस्याभावेपि गमकत्वदर्शनाच्चेति॥ ४। आप्तवचनादाप्तमर्थज्ञानमागमः॥ उपचारादाप्तवचनं च। यथास्यत्रनिधिः संतिमेर्वाक्यः। अभिधेयंवस्तुयथावस्थितं वेत्ति यथात्मानं चाभिधत्ते स आप्तोज्ञानकृतीर्थंकरादिः॥ ५। इत्यनेनपरोक्षं तेनमुख्यसंव्यवहारेण। संवादिविज्ञानं। तत्प्रमाणमक्षमन्यद्विपरोक्षमितिसंग्रहः॥ २॥ इति। यद्यर्थेयाविसंवादि प्रमाणं तत्तथामतं। विसंवादि यत्प्रमाणं च तदप्रमाणं प्रत्यक्षपरोक्षयोः॥ ३॥ ॥ ततः एकस्मिन्नेव ज्ञानेऽयमस्य प्रमाणता। इतरत्रेति ज्ञानाभासता। यथातिमिरादिदुष्टं ज्ञानं चंद्रादाविसंवादकत्वात्प्रमाणं तत्संख्यादौ चेतरत्राविसंवादकत्वादप्रमाणं प्रमाणांतरस्यवस्तुन्याया संवादाविसंवादकक्षणत्वादितिसंक्षेपतमेतत्। प्रत्यक्षं च परोक्षं च द्वे एव प्रमाणे। अत्र च मतिश्रुतावधिमनः पर्ययकेवलानां मध्येमतिश्रुते परमार्थतः परोक्षं प्रमाणं। अवधिमनः पर्यायकेवलानि तु प्रत्यक्षं प्रमाणमिति। अथोत्तरार्धमाख्यायते। अनंतधर्मकं वस्तित्यादि। इदं प्रमाणाधिकारे प्रमाणस्य प्रत्यक्षस्य परोक्षस्य चाविषयस्तुन्याद्यं। पुनरनंतधर्मकं वस्तु। अनंतास्तिकादिविषयत्वात्। परमिता धर्माः स्वभावाः सहभाविनः क्रमभाविनश्च स्वपरपर्यायास्तेस्तदनंतधर्मकमेव। स्वार्थैकप्रत्यये अनंतधर्मकमनेकांतात्मकमित्यर्थः। एकेऽनेके ताअंशाधर्मावा आत्मास्वरूपंयस्य। तदनेकांतात्मकमितिव्युत्पत्तेः

DR BHAU DAJI MEMORIAL

यस्तत्सचेतनाचेतनं सर्वद्रव्यं। अत्रानंतधर्मकं वस्त्विति पक्षः प्रमाणविषयत्वेनप्रमेयत्वादिति केवलव्यतिरेकी हेतुः सूचितः। अन्यथानुपपत्येकलक्षणत्वाद्धेतोरंतर्व्याप्त्येवसाध्यस्यासंभवात्तद्दृष्टांतादिभिर्न प्रयोजनं। यदनंतधर्मात्मकं न भवति। तत्प्रमेयमपि न भवति। यथाव्योमकुसुममिति केवलव्यतिरेकः। साधर्म्यदृष्टांतानां पक्षकुक्षिनिक्षिप्तत्वेनान्वयार्थायोगादिति। अस्यचहेतोरसिद्धविरुद्धानैकांतिकादिदोषाणां सर्वथानवकाशएव। प्रत्यक्षादिनाप्रमाणेनानंतधर्मात्मकस्यैवसकलस्यप्रतीतेः। ननुकथमेकस्मिन्वस्तुन्यनंतधर्माः प्रतीयंतेइतिचेत्। उच्यते। प्रमाणप्रमेयरूपस्यसकलस्यक्रमाक्रमाभ्यां नंतधर्मात्मकस्यैकरूपस्यवस्तुनोयथैवसपरद्रव्याद्यपेक्षयासर्वत्रसर्वदा सर्वप्रमातृणां प्रतीतिर्जायमानास्ति। तथैववयमपि सोवर्णं घटदृष्टांतेनसविस्तरंदर्शयामः। विवक्षितोपि घटः स्वद्रव्यक्षेत्रकालभावैर्विद्यते। परद्रव्यक्षेत्रकालभावैश्चनविद्यते। तथाहि। सघटोयद्रव्यमत्वेनयत्प्रमेयत्वादिधर्मैर्भिद्यंत्यते। तद्रूपतस्यसत्वाद्यः स्वपर्यायाएवसंति। ननुकेचनपरपर्यायाः सर्वस्यवस्तुनः सत्वादिनधर्मनिधिरूत्यसद्भूतायत्वात्। विजातीयस्यैवाभावान्नकुतोपिव्यावृत्तिः। द्रव्यतस्तुयद्योऽत्रिकोघटोविवक्ष्यते। तदासयोऽत्रिकद्रव्यत्वेनास्ति। धर्माधर्माकाशादिद्रव्यत्वेनतुनास्ति। अत्र चोऽत्रिकत्वंस्वपर्यायः। धर्मादिभ्यो नंतेभ्योव्यावृत्तत्वेनपरपर्यायाअनंताः। जीवद्रव्याणामनंतत्वात्। योऽत्रिकोपिसघटः पार्थिवत्वेनास्ति। नपुनराप्यादित्वेन। अत्रपार्थिवत्वंस्वपर्यायः। आप्यादिद्रव्येभ्यस्तुव्यावृत्तितस्तत्परपर्यायाअनंताः। एवमन्योपिस्वपर्यायव्यतिरिक्तोवक्तव्यः। पार्थिवोपिसधातुरूपतयास्ति। नपुनर्मृत्वादिभिः। धातुरूपोपिसौवर्णत्वेनास्ति। नपुनाराजतत्वादिभिः। सौवर्णोपिसंघटितसकलवर्णात्मत्वेनास्तिनतुघटितदूनवर्णात्मकत्वादिना। घटितसकलवर्णात्मापिदृढत्वेनघटितत्वेनास्ति। नतुशिथिलत्वादिना। घटितत्वादिनाघटितोपिपृथुबुध्नाद्याकारेणास्ति। नपुनर्मुकुटादित्वेन पृथुबुध्नोदराद्याकारोपिरुचकाकारेणास्ति। नारुचकाकारेण। रुचकाकारोपिस्वाकारेणास्ति। नपुनरन्यघटाद्याकारेण। साकारोपिस्वदार्ढ्येनास्ति। ननुपरदार्ढ्येः। एवमनयादिशापरेणापिस्वेनपर्यायेणावक्ष्यते। सतः स्वपर्यायस्तद्रव्येनुपरपर्यायाः। तद्द्रव्यसत्तोकाः स्वपर्यायाः। परपर्यायास्तुव्यावृत्तिरूपाअनंताः। अनंतेभ्यो द्रव्येभ्योव्यावृत्तत्वात्। क्षेत्रतश्चसाम्प्रतंकार्यार्तत्वेनाविवक्षितोनकुतोपिव्यावर्तते। ततः स्वपर्यायोस्ति। नपरपर्यायः। त्रिकोटी

वर्त्तापि मनुष्यलोकवर्त्तित्वेनास्ति। नपुनरूर्ध्वाधोलोकवर्त्तित्वेन। तिर्यग्लोकवर्त्तापि समुद्रबहूद्वीपवर्त्तित्वेनास्ति। नपुनरपरद्वीपादिवर्त्तितया। सापि भरतवर्त्तित्वेनास्ति। नपुनर्वैताढ्यवर्त्तित्वादनाभारतेपि सपाटलिपुत्रवर्त्तित्वेनास्ति। नपुनरन्यस्मात्
यत्नेन। पाटलिपुत्रेपि देवदत्तगृहवर्त्तित्वेनास्ति। नपुनरपरत्वागृहैकदेशस्थतयास्ति। नपुनरन्यदेशस्थादित्तया गृ
हैकदेशेपि सयज्ञदत्ताकाशप्रदेशेष्वस्ति। तत्रापि तयास्तिनपुनरन्यप्रदेशस्थतया। एवंयथासंभवं अपरप्रकारेणापि वाच्यं। तदेवं
क्षेत्रतः स्वपर्याया लोकाः परपर्यायाः स्वसंख्येया लोकस्यासंख्येयप्रदेशत्वेन। अथवा मनुष्यलोकाश्रितस्य घटस्यतद
परद्रव्यनक्षत्रग्रहेभ्योनंतेभ्योव्यावृत्तत्वेन अनंताः परपर्यायाः। एवंदेवदत्तगृहादिवर्त्तिनोपि। ततः परपर्याया अनंता
कालतस्तु नित्यतयास्वद्रव्येणावर्त्तनवर्त्तते॥ वर्तिष्यति। ततोनकृतापि व्यावर्त्तते। सच्चेदयुगीनत्वेनाविवक्ष्यमाणस्तद्र
व्यत्वेनास्ति। नत्वतीतागततादृयुगवर्त्तित्वेन। अस्मिनयुगवर्त्तित्वेन। अस्मिनयुगेपि सर्वेषमस्यतयास्ति। नपुनरतीतादि
वर्षत्वादिना। सर्वेषमस्यापि सवार्सतिकृतयास्ति। नपुनरन्यर्तुनिष्पन्नतया। तत्रापि नवत्वेनाविद्यते। नपुनः पुराणत्वेन।
तत्रापि द्यतनत्वेनास्ति। नपुनरनद्यतनत्वेन। तत्रापि वर्तमानक्षणतयास्ति। नपुनरन्यक्षणतया। एवंकालतो संख्ये
याः स्वपर्यायाएकस्य द्रव्यस्यासंख्यकालस्थितिकत्वात्। अनंतकालवर्त्तित्वाविवक्षायांतेनंता अपिवाच्याः। पर
पर्यायास्तुविवक्षितकालादन्यकालवर्त्तिद्रव्येभ्योनंतेभ्योव्यावृत्तत्वेनानंताः एवंभावतः पुनः सर्वोतत्वर्णत्वेनास्ति। न
पुनर्नीलादिवर्णेः। पीतापिसोः परपीतद्रव्यापेक्षयैकगुणपीतः सएवचतदपरापेक्षयाद्विगुणपीतः। सएवच।
तदन्यापेक्षयात्रिगुणपीतएवतावद्वक्तव्यं। यावत्कस्यापिपीतद्रव्यस्यापेक्षयाः नंतगुणपीतः। तथासएवापरा
पेक्षयैकगुणहीनरक्तवर्णादितावद्वक्तव्यं। यावत्कस्याप्यपेक्षयानंतगुणहीनपीतत्वोपिसंभवति। यदेवंपीतत्वेना
नंताः स्वपर्यायास्तथा। पीतवर्णवत्तरतमयोगेनानंतभेदेभ्योनीलादिवर्णेभ्योव्यावृत्तिरूपाः परपर्यायाअप्यनं
ताः। एवंरसतोपि स्वमधुरादिरसापेक्षयापीतत्वात्। स्वपर्यायाअनंतास्तातव्याः। नीलादित्वतेत। क्षारादिपरमापेक्ष
यापरपर्यायाअप्यनंताअवसातव्याः। एवंसुरभिगंधेनापि स्वपरपर्यायाअनंताअवसातव्याः। एवंगुरुलघुमृदुखरशीत
स्निग्धरूक्षस्पर्शादिकापेक्षयापितरतमयोगेनप्रत्येकमनंताः स्वपरपर्यायाअवगंतव्याः। यतएकस्मिन्नप्यनंतदेश

येसंधेशवचिस्पर्शाः प्राप्यंते। रतिमिश्रतेत्रोक्तेनान्नापिकल्पेः शानामभिधानं। अथवासुवर्णद्रव्येप्यनंतकालेनपंचा
पिवर्णाद्भावपरिणामाश्चाश्रित्य दूरासन्नादितयासंख्याः स्वपर्यायाः। कालतश्चयरत्वापरत्वाभ्यांसर्वद्रव्येभ्यः क्षणत्वघ
टीदनमासवर्षयुगादिभिर्घटस्यपूर्वत्वेनपरत्वेनचानंतभेदेनानंताः स्वधर्माः ज्ञानंतरविघटस्यात्रैवैः सर्वज्ञावा
नामनंतैर्मत्यादिज्ञानैर्विभंगाद्यज्ञानैश्चस्पष्टास्पष्टस्वभावभेदेनयद्गुणात्माद्यस्याप्यवश्यंस्वभावभेदः संभवी। अन्य
थाततएकाणामविस्वभावभेदेनस्यात्तथाचतेषामेक्यंभवेत्। आद्यस्यस्वभावभेदश्चयेस्वभावास्तेस्वधर्माः सर्वज्ञी
वानामेकस्यात्मद्रव्यतोनंतभेदभिन्नसुखदुःखज्ञानोपादानोपेक्षागोचरेच्छापुण्यापुण्यकर्मबंधमिथ्यादिसंस्कारः
क्रोधोमानमायालोभरागद्वेषमोहाद्यनुपाधिद्रव्यत्वगुणपतनादिवेगादीनांकारणतेनसूक्ष्मकारणत्वेनवाघटस्या
नंतधर्मत्वं। लोष्टगुरुत्वेनुपरापिस्पर्शभेदत्वेनप्राप्यते। कर्मतश्चोत्क्षेपणावक्षेपणाःकुंचनप्रसारणभ्रमणस्यंदनेच

नपूरणस्खलनकंपनान्यस्थानप्रापणज्ञानादाणज्ञानादिधारणादित्रयाणां। तत्तत्कालभेदेनतत्तत्संयोगेनवा नंतानंतेनुत्वेन
घटस्यानंताः क्रियारूपाः स्वधर्माः। तसांक्रियाणामहेतुभ्यो येभ्योव्यावृत्तत्वेनानंताः परधर्माश्च। सामान्यतः पुनः प्रागुः
त्पत्तेरनागतादिकालेषुये येविशेषवस्तुनोमनंतानंताः स्वपरपर्यायाभवंति। तेषांकृत्स्नादानंत पर्यंत धर्मैः सदृशस्यघटस्या
नंतभेदस्यानंतभेदमाहुरयाभावेनानंताः स्वधर्माः विशेषतश्चघटेनंतद्रव्येषुपरापरापेक्षयैकनद्वाभ्यांत्रिभिर्यावद
नंतैर्नाधर्मैर्विलक्षणइत्यनंतप्रकारैर्विलक्षणहेतुकाअनंताः स्वधर्माः। अनंतद्रव्यापेक्षयाचघटस्यस्थूलताकृशतासममता
विषमतासूक्ष्मता। बादरतादीव्रतावाक्चिक्यसाम्यतापृथुतासंकीर्णतानीचतोच्चतावृत्तत्वमुखतादयः। प्रत्येकमनंत
विधाःस्युः। ततः स्थूलतादिहेतुकाश्चानंताधर्माः। संबंधरतत्वनंतकालेनानंतैः पूर्वैर्वस्तुभिः समंप्रस्तुतघटस्याधारधे
यभावेनानंतविधोभवति। ततस्तदपेक्षयाप्यनंताः स्वधर्माः। एवंस्वस्वामित्वज्ञ ज्ञानकर्तृनिमित्तकर्तृपोढाकारकर्तृ
प्रकाश्यप्रकाशकर्तृभोग्यभोक्तृकर्तृबाध्यबाधकर्तृआश्रयाश्रयिभावबध्यबधकर्तृविरोध्यविरोधकर्तृहेत्वपेक्षायोगपद्यायकर्तृवाद्
संख्यातांतसंबंधेरापिप्रत्येकमनंतधर्माज्ञातव्या स्तथायेयेत्रघटस्यस्वपरपर्यायाअनंताईचिरं। तेषामुत्पादविनाशाः
स्थितयश्चपुनर्भवनेनानंतकालेनानंताअभूवन्भवंतिभविष्यंतिच। तदपेक्षयाप्यनंताधर्माएवंपीतवर्णादारभ्यभाव
तोनंताधर्माः। तथाद्रव्यक्षेत्राद्विप्रकारैर्ययेस्वधर्मापरधर्माश्चाचक्षिरे। तैरुभयैरपियुगपदादिष्टोघटोवक्तव्यःस्यात्।
यतः कोपिसमुद्योनावधृते। येनघटस्यस्वधर्मापरधर्माश्चोच्यमानाद्ययेपियुगपदुक्ताभवंतिशब्देनाभिधीयमानानां
क्रमेणैवप्रतीतेः। संकेततोपिनशब्दैः क्रमेणैवस्वपरधर्मानप्रत्याययति। ततयुगपत्सदृशानांवासदृशानांच
संकेततमछद्मस्थवत्। ततः प्रतिद्रव्यक्षेत्राद्विप्रकारंघटस्यभव्यत्वंपिस्वधर्मःस्यात्। तस्यचानंतेभ्योव्यावृत्तेभ्योधर्म
भ्योन्यद्रव्येभ्यश्चव्यावृत्तत्वेनानंताअवक्तव्याः परधर्माअपिभवंति। तदेवमनंतधर्मात्मकत्वंयथाघटेदर्शितं। तथास
र्वेष्वपिवस्तुनिभावनीयं। तत्राप्यात्मनिताववैतन्यंकर्तृत्वंभोक्तृत्वंप्रमातृत्वंप्रमेयत्वंअमूर्तत्वमसंख्यातप्र
देशत्वंनिश्चलाष्टप्रदेशत्वंलोकप्रमाणप्रदेशत्वंजीवत्वंअभव्यत्वंपरिणामित्वंस्वशरीरव्यापितामित्यादयः सद्भाविनोध
र्माः हर्षविषादौसुखदुःखेमत्यादिज्ञानदर्शनोपयोगौदेवनारकतिर्यङ्मनुष्यत्वानिसूक्ष्मादिनयापरिणामितसर्वपुद्ग
लैं

नच्चेतदनार्षं यतस्तत्रमाचारांगे॥ तेएगंजाणइजेसव्वंजाणइजेसव्वंसेएगंजाणइ॥ अस्यायमर्थः॥ यएकंवस्तूपलभते। सर्वपर्यायैः सानेयमात्मर्वमुपलभते। सर्वोपलब्धिमंतरेणाविवक्षितस्यैकस्यस्वपरपर्यायभेदभिन्नतयासर्वात्मनावगंतुमशक्यत्वात्। यश्चसर्वंसर्वात्मनासाक्षादुपलभते। सएकंस्वपरपर्यायभेदभिन्नंजानाति॥ अन्यत्राप्युक्तं॥ एकोभावः सर्वथायेनदृष्टः सर्वेभावाः सर्वथातेनदृष्टाः। सर्वेभावासर्वथायेनदृष्टाः एकोभावः सर्वथातेनदृष्टः॥१॥ ततःसिद्धंप्रमेयत्वादनंतधर्मात्मकंवस्तुसकलस्यवस्तुनइति॥५५॥ अथसत्रकारएवप्रत्यक्षपरोक्षयोर्लक्षणंलक्षयति॥ अपरोक्षतयार्थस्यग्राहकंज्ञानमीदृशं। प्रत्यक्षमितरत्तेयंपरोक्षंग्रहणेक्षया॥ ५६॥ तत्रप्रत्यक्षमिति। लक्ष्यनिर्देशः॥ अपरोक्षतयार्थस्यग्राहकंज्ञानमितिलक्षणनिर्देशः॥ परोक्षोऽक्षगोचरातीतस्ततोन्योऽपरोक्षस्तत्सद्भावस्तत्ता। तयाअपरोक्षतया। साक्षात्कारितयानपुनरस्पष्टसंदिग्धादितयाअर्थस्यभोक्तरस्यआत्मस्वरूपस्यबाह्यस्यवा॥ घटकटपटशकटलकुटादेर्वस्तुनोग्राहकंज्ञानमात्मकतयासाक्षात्कारिछेदकंज्ञानं॥ ईदृशंविशेषणस्यव्यवच्छेदकत्वादृशमेनप्रत्यक्षं॥ नत्वन्यादृशं॥ अपरोक्षतयेत्येनेनपरोक्षलक्षणसंकीर्णतामध्यक्षस्यपरिहरति॥ एतेनपरपरिकल्पितानांकल्पनापोढतादीनांप्रत्यक्षलक्षणानांनिरासःकृतोद्रष्टव्यः॥ ज्ञानवादिनोवादिषुः॥ अर्थोज्ञातोऽर्थस्यआत्मस्वरूपस्यय॥ ग्राहकंतत्प्रत्यक्षमित्येवात्रव्याख्यायते॥ अर्थशब्देनबाह्योप्यर्थः कुतोव्याख्यातः॥ नाह्यार्थस्यासत्वादित्याशंक्यायं॥ अर्थस्यग्राहकमित्यत्रापिग्रहणेक्षयेतिवक्ष्यमाणंपदंसंबंधनीयं॥ बाह्यार्थनिराकरणपरान्॥ योगाचारादीनधिकृत्येवग्रहणेक्षयेतिवक्ष्यमाणपदस्ययोजनात्। तथायमर्थः॥ ग्रहणंज्ञानात्मकं॥ बाह्यार्थस्ययत्संवेदनं॥ तस्यईक्षयापेक्षयार्थस्ययत्ग्राहकंतत्प्रत्यक्षं॥ नचार्थस्यग्राहकमित्येतावतैवबाह्यार्थापेक्षयायत्ग्राहकंतत्प्रत्यक्षमित्येतत्सिद्धमितिवाच्यं॥ यतआत्मस्वरूपस्यार्थस्यग्राहकमित्येतावतापर्थस्यग्राहकंभवत्येव॥ ततोग्रहणेक्षयेत्यनेनयेयोगाचारादयोबाह्यार्थकल्पनाकल्पितंसकलमपिज्ञानंप्रत्यपीते॥ तांनिरस्यति॥ ज्ञानाग्रहणेक्षयेतः संवेदनंयथाव्याप्रियते॥ तथाबाह्यार्थग्रहणायइतरथाबाह्यार्थग्रहणाभावेसर्वप्रमातृणामेकसंवेदनोल्लासादप्रतिभासाद्वियतेदृग्वत्तयातत्तीर्थस्तीत्यवसीयते॥ अथचिद्रूपस्येवतथाप्रतिभासनान्नबाह्यार्थग्रहणमितिचेत्॥ तर्हिबाह्यार्थवत्संवेदनं

नचैतदनार्षं यतस्तत्रमाचारांगे॥ तेएगंजाणइजेसव्वंजाणइजेसव्वंसेएगंजाणइ॥ अस्यायमर्थः॥ यएकंवस्तूपलभते। सर्वपर्यायैः सानेयमात्मर्वमुपलभते। सर्वोपलब्धिमंतरेणाविवक्षितस्यैकस्यस्वपरपर्यायभेदभिन्नतयासर्वात्मनावगंतुमशक्यत्वात्। यश्चसर्वंसर्वात्मनासाक्षादुपलभते। सएकंस्वपरपर्यायभेदभिन्नंजानाति॥ अन्यत्राप्युक्तं॥ एकोभावः सर्वथायेनदृष्टः सर्वेभावाः सर्वथातेनदृष्टाः। सर्वेभावासर्वथायेनदृष्टाः एकोभावः सर्वथातेनदृष्टः॥१॥ ततःसिद्धंप्रमेयत्वादनंतधर्मात्मकंवस्तुसकलस्यवस्तुनइति॥५५॥ अथसत्रकारएवप्रत्यक्षपरोक्षयोर्लक्षणंलक्षयति॥ अपरोक्षतयार्थस्यग्राहकंज्ञानमीदृशं। प्रत्यक्षमितरत्तेयंपरोक्षंग्रहणेक्षया॥ ५६॥ तत्रप्रत्यक्षमिति। लक्ष्यनिर्देशः॥ अपरोक्षतयार्थस्यग्राहकंज्ञानमितिलक्षणनिर्देशः॥ परोक्षोऽक्षगोचरातीतस्ततोन्योऽपरोक्षस्तत्सद्भावस्तत्ता। तयाअपरोक्षतया। साक्षात्कारितयानपुनरस्पष्टसंदिग्धादितयाअर्थस्यभोक्तरस्यआत्मस्वरूपस्यबाह्यस्यवा॥ घटकटपटशकटलकुटादेर्वस्तुनोग्राहकंज्ञानमात्मकतयासाक्षात्कारिछेदकंज्ञानं॥ ईदृशंविशेषणस्यव्यवच्छेदकत्वादृशमेनप्रत्यक्षं॥ नत्वन्यादृशं॥ अपरोक्षतयेत्येनेनपरोक्षलक्षणसंकीर्णतामध्यक्षस्यपरिहरति॥ एतेनपरपरिकल्पितानांकल्पनापोढतादीनांप्रत्यक्षलक्षणानांनिरासःकृतोद्रष्टव्यः॥ ज्ञानवादिनोवादिषुः॥ अर्थोज्ञातोऽर्थस्यआत्मस्वरूपस्यय॥ ग्राहकंतत्प्रत्यक्षमित्येवात्रव्याख्यायते॥ अर्थशब्देनबाह्योप्यर्थः कुतोव्याख्यातः॥ नाह्यार्थस्यासत्वादित्याशंक्यायं॥ अर्थस्यग्राहकमित्यत्रापिग्रहणेक्षयेतिवक्ष्यमाणंपदंसंबंधनीयं॥ बाह्यार्थनिराकरणपरान्॥ योगाचारादीनधिकृत्येवग्रहणेक्षयेतिवक्ष्यमाणपदस्ययोजनात्। तथायमर्थः॥ ग्रहणंज्ञानात्मकं॥ बाह्यार्थस्ययत्संवेदनं॥ तस्यईक्षयापेक्षयार्थस्ययत्ग्राहकंतत्प्रत्यक्षं॥ नचार्थस्यग्राहकमित्येतावतैवबाह्यार्थापेक्षयायत्ग्राहकंतत्प्रत्यक्षमित्येतत्सिद्धमितिवाच्यं॥ यतआत्मस्वरूपस्यार्थस्यग्राहकमित्येतावतापर्थस्यग्राहकंभवत्येव॥ ततोग्रहणेक्षयेत्यनेनयेयोगाचारादयोबाह्यार्थकल्पनाकल्पितंसकलमपिज्ञानंप्रत्यपीते॥ तांनिरस्यति॥ ज्ञानाग्रहणेक्षयेतः संवेदनंयथाव्याप्रियते॥ तथाबाह्यार्थग्रहणायइतरथाबाह्यार्थग्रहणाभावेसर्वप्रमातृणामेकसंवेदनोल्लासादप्रतिभासाद्वियतेदृग्वत्तयातत्तीर्थस्तीत्यवसीयते॥ अथचिद्रूपस्येवतथाप्रतिभासनान्नबाह्यार्थग्रहणमितिचेत्॥ तर्हिबाह्यार्थवत्संवेदनं

स्वज्ञानसंतानांतराण्यपि विवार्येरन्। अथ संतानांतरस्यसाधकमनुमानमस्ति। तथाहि। विवक्षितदेवदत्तादेरन्यत्रयदेवदत्तादौव्यापारव्यादिपूर्वको व्यापारव्यादित्वात्। संप्रतिपन्नव्यापारव्यादिवदिति संतानांतरसाधकमनुमानंस्वस्मिन्व्यापारव्यादेर्योजनकार्यत्वेनप्रतिबंधनिश्चयादिति चेन्न। एतस्यानुमानस्यार्थस्यैवस्वप्रदृष्टांतेनभ्रांततापत्तेः। तथाहि। सर्वेप्रत्ययानिरालंबनाः प्रत्ययत्वात्। स्वप्नप्रत्ययवदिति। तदभिप्रायेणयथाबाह्यार्थग्रहणस्यनिरालंबनतयाबाह्यार्थोभावस्तथासंतानांतरसाधनस्यापिनिरालंबनतयासंतानांतराभावःस्यादिति। इतरेतरेयंपरोक्षं। प्रागुक्तात्। प्रत्यक्षादितरस्यस्पष्टतयार्थस्यस्वपरस्यग्राहकंनि[illegible]यकंपरोक्षंज्ञेयमवगंतव्यं। परोक्षमेतत्स्वसंवेदनापेक्षयाप्रत्यक्षमेव। बहिरर्थापेक्षयानुपरोक्षव्यपदेशमश्नुते। इतिदर्शयंन्नाह। ग्रहणेस्वयेतिदृश्यग्रहणंप्रस्तावादपरोक्षेबाह्यार्थेज्ञानंव्यप्रवर्तनमुच्यते। ननुस्वस्यग्रहणं। स्वग्रहणापेक्षयाहस्पष्टत्वेनसर्वेषामेवतन्मानांप्रत्यक्षतास्यव्यवस्थाभावाद्दूरेषणवैयर्थ्यंस्यात्। ततोग्रहणस्यबाह्यप्रवर्तनंग्रयार्थेक्षान्नापेक्षातयाबाह्यप्रवृत्तिपर्यालोचनयेतियावत्। तदयमत्रार्थः। परोक्षंयद्यपिस्वसंवेदनापेक्षयाप्रत्यक्षं। तथाविधलिंगजन्यादिदूरेणबाह्यविषयग्रहणेसाक्षात्कारितयाव्याप्रियते। इतिपरोक्षमित्युच्यते॥ ७,६॥ ॥ अथप्रागुक्तमेववस्तुनोनंतधर्मात्मकतांदृढयंनाह। येनोत्पादव्ययध्रौव्ययुक्तंयत्तत्सदिष्यते॥ तद्धर्मकंवस्तुतन्नाक्षमानगोचरः॥ ७,७॥ ॥ येनेतिग्राह्येणव्याख्यास्यतेवाक्यस्यसावधारणत्वात्ययदेववस्तूत्पादव्ययध्रौव्यैःसमुदितैर्युक्तंतदेवसदित्यभिधीयतेमीमांसकैरभिधीयते। उत्पत्तिविनाशस्थितियोगएवसतोवस्तुनोलक्षणमित्यर्थः। ननुपूर्वंसतोभावस्योत्पादव्ययध्रौव्ययोगात्। यदिपश्चात्सत्वं। तर्हि[illegible]श्रृंगादेरपिततोयोगात्सत्वंस्यात्। पूर्वंसतश्चोत्तरावस्थरूपसत्यमाख्यातं। किमुत्पादादिभिः क्रियते। तथोत्पादव्ययध्रौव्याणामपिययोत्पादादित्रयेणयोगान्यत्वं। तदानवस्थाप्रसक्तेः। स्वतश्चेत्सत्वं। तदाभावस्यापिसतएवतद्भविष्यतीतिव्यर्थमुत्पादादिकल्पनामातिचेत्। उच्यते। नहिभिन्नोत्पादव्ययध्रौव्ययोगाद्भावस्यसत्वमभ्युपगम्यते। किंतूत्पादव्ययध्रौव्ययोगात्मकमेवसदितिस्वीक्रियते। तथाहि। उर्ध्वपर्वततथाद्रिकंमर्वंवस्तुद्रव्यात्मनानोत्पद्यतेविपद्यतेच। परिस्फुटमन्वयदर्शनात्। नूनपुनर्जातुनखादिष्वन्वयदर्शनेनव्यभिचारइतिनवाच्यं। प्रमाणेनबाध्यमानस्यान्वयस्यापरिस्फुटत्वात्तत्रचप्रस्तुतोन्वयः प्रमाणविदुः प्रत्यक्षंनिर्मलम्

त्वात्सर्वव्यक्तिषुनियतंक्षणेक्षणेन्यत्वमथचनविशेषः। सत्यांश्चित्यथाचित्योरागृहीतज्ञातव्यवस्थानात्। ततोद्रव्यात्मनासर्वस्यवस्तुनःस्थितिरेवपर्यायात्मनातु सर्ववस्तूत्पद्यतेविपद्यतेवा। अप्रस्खलितपर्यायानुभवसद्भावात्। नचैतदशुक्लेशंपीतादिपर्यायानुभवेनव्यभिचारस्तस्यसवलक्षपत्वात्। नचवस्तुसोस्वलक्षणोयेनपूर्वाकारविनाशाज्जहद्। हेत्तराकारोपादानाविनाभावीभवेत्। नचजीवादेर्वस्तुनिहर्षामर्षादिसोन्यादृपर्यायानुभवः स्वलक्षपः। कस्यचिद्बाधकस्याभावात्। नत्वादृश्यः परस्परंभिद्यते। नवाद्रव्यंभिद्यते। कथमेकंद्रव्यात्मकंनभिद्यतेचेत्। तथाविकथमेकंद्रव्यात्मकमितिचेत्। तदयुक्तं। कथंचिद्भिन्नलक्षणत्वेननतेषांकथंचिदैक्याभ्युपगमात्। तथाह्युत्पादविनाशध्रौव्याणिस्याद्भिन्नानिभिन्नलक्षणत्वात्। रूपादिवत्। नचभिन्नलक्षणत्वमसिद्धं। असतआत्मानंलाभमुत्पादः। सतः सत्ताव्ययोगोविनाशः। द्रव्यरूपतयानुवर्तनं॥ ध्रौव्यमित्येवमसर्वार्पणलक्षणानांतेषांसर्वैःप्रतीतेः। नचामीपरस्परानपेक्षत्वेनभिन्नाएव। परस्परानपेक्षाणांखपुष्पवदसत्वापत्तेः। तथाह्युत्पादः केवलोनास्तिखरविषाणवदनुत्पन्नत्वात्। कूर्मरोमवत्। तथाविनाशः केवलोनास्तिखरविषाणवदुत्पन्नत्वात्। तदुक्तं। एवंस्थितिरपिकेवलानास्ति। विनाशोत्पादशून्यत्वात्। तदेवंपरस्परापेक्षाणामुत्पादादीनांवस्तुन्यसत्वंप्रतिपत्तव्यं। तथाचवक्ष्यतेनैकंद्रव्यात्मकं। तथाचोक्तं। प्रध्वस्तैकक्षणेभ्योऽचेतनयामोक्षोसमुत्पादस्तेपुत्रःप्रीतिमयादुःखमध्यस्थः स्थितिमध्यमधिष्ठितः। पूर्वाकारपरिक्षयस्तदपराकारोदयस्तदुभयाधारश्चैकस्तिस्रोवस्तुनिसंस्थितीः॥ १॥ ॥ घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयं। शोकप्रमोदमाध्यस्थ्यंजनोयातिसहेतुकं॥ २॥ पयोव्रतोनदध्यत्ति न पयोत्ति दधिव्रतः। अगोरसव्रतोनोभे तस्माद्वस्तुत्रयात्मकं॥ ३॥ ॥ परोक्षवादीदंद्रव्यंघटोविनश्यति। तदाकंदेशेनविनश्यति। अहोश्चित्सामस्त्येनेति। यदिदेशेनेतिपक्षः। तदाघटस्यैकदेशेनाप्यविनश्येत्। ननुसर्वः। सर्वश्चसाधिनस्तदाप्रतीयते। नपुनर्घटस्यैकदेशोभग्नइतिप्रतीतिः। कस्यापिस्यात्। अतोनदेशेनेतिपक्षः कक्षीकारार्हः। सामस्त्येनविनश्यतीतिपक्षोपि। यदिहिसामस्त्येनघटोविनश्येत्तदाघटोविनष्टेकपालानांमद्रूपस्यचप्रतीतिर्नस्यात्। घटस्यसर्वात्मनाविनष्टत्वात्। नचतदाकपालानिमद्रूपंच। नप्रतीयंतेमार्दवेनेतानिकपालानि। नपुनःसोवर्णानीतिप्रतीतेः। अतःसामस्त्येनेत्यपिपक्षेनयुक्तः। ततोबलाद्देशेप्रतिपत्तव्यं। घटोघटात्मनाविनश्यति। कपालात्मनोत्पद्यते। मृद्द्रव्यात्मना

नुपलब्धेरिति। व्यतिरेकानुमानं। अनंताश्च धर्मा यथैकस्मिन्वस्तुनि भवंति। तथाग्रे वक्ष्यमाणं। धर्मश्चोत्पादादित्रयात्मकत्वेन व्यवतिष्ठते। धर्माणां धर्मिणश्चैकांतेनात्यंतभेदेन प्रतीयेत। नपुनः पूर्णघटतेति प्रतीयतेचघटः पूर्णोत्पन्नइति। ततोदेशेनेतिपक्षोपि क्षोदक्षमः। नापिसामस्त्येतिपक्षः। यदिसामस्त्येनोत्पन्नः स्यात्। ततोग्रहः प्रतीतिस्तदानींनस्यात्। नचसानास्ति। मार्दवेनपुनर्नवो वर्णरूपेणापिप्रतीतेः। ततोघटोयदोत्पद्यते। तदासघटात्मनोत्पद्यते। मृत्पिंडात्मनाविनश्यति। मृदात्मनाचध्रुवइति। बलादभ्युपगंतव्यंस्यात्। यथाहिवस्तुसर्वैः प्रतीयते। तथाचेन्नाभ्युपगम्यते। तदासर्ववस्तुव्यवस्थालोकदापिनभवेत्। अतोयथाप्रतीतेयवस्त्वभ्युपगंतव्यं। तदेवयदुत्पन्नंतदेवनष्टंतदेवनश्यति। नंक्ष्यतिच। कथंचित्यदुत्पन्नं। तदेवोत्पद्यते। उत्पत्स्यतेच। कथंचित्यदेवाहतं। तदेवातिष्ठतिस्थास्यतिचकथंचित्। तथायदेवकेनचिद्रूपेणनष्टं। तदेवकेनचिद्रूपेणोत्पन्नं। केनचिद्रूपेणाहतंच। एवंयदेवनश्यति। तदेवोत्पद्यतेतिष्ठतिच। यदेवनश्यति। तदेवोत्पत्स्यते। स्थास्यतिचेत्यादिसर्वमुपपन्नं। अंतर्बहिश्चसर्वस्यवस्तुनः सर्वदोत्पादादित्रयात्मकस्यैवाबाधिताध्यक्षेणानुभूयमानत्वात्। अनुभूयमानेचवस्तुनः स्वरूपेविरोधासिद्धेः। अन्यथावस्तुनोरूपरसादिष्वपिविरोधप्रसक्तेः। प्रयोगश्चात्र। सर्वंवस्तूत्पादव्ययध्रौव्यात्मकं। सत्वात्। यदुत्पादव्ययध्रौव्यात्मकंनभवति। तत्सदपिनभवति। यथाखरविषाणं। तथाचेदंतस्मात्तथेतिकेवलव्यतिरेकानुमानं। अनेनचसकलक्षणेनैयायिकादिपरिकल्पितसत्तायोगः। सत्वैवोत्पादाभिमतंचार्थक्रियाकरक्षणंसत्वं। द्वेअपिप्रतिक्षिप्तेद्रष्टव्ये तन्निरासप्रकारश्चग्रंथांतरादवगंतव्यः। अथयेनेतिशब्देनयोज्यते। येनकारणेनोत्पादव्ययध्रौव्ययुक्तंसदृश्यते। तेनकारणेनमानयोः प्रत्यक्षपरोक्षप्रमाणयोर्गोचरोविषयोऽनंतधर्माः स्वभावाः। सत्वंहेयत्वप्रमेयत्ववस्तुत्वादयोयस्मिन्। तदनंतधर्मकं। अनंतपर्यायात्मकं। अनेकांतात्मकमितियावत्वस्तु। वाचीवाहितुक्तमभ्यधायि। अयंभावः। यतएवोत्पादादित्रयात्मकंपरमार्थसत्। ततएवानंतधर्मात्मकंसर्ववस्तुप्रमाणविषयोऽनंतधर्मात्मकतायामेवोत्पादव्ययध्रौव्यात्मकतायाउपपत्तेः। अन्यथातदनुपपत्तेरिति। अत्रानंतधर्मात्मकस्यैवोत्पादव्ययध्रौव्यात्मकत्वंयुक्तिमुक्तंतामनुभवतातित्तापनायैवभूयोनंतधर्मकपदप्रयोगे। नपुनः पश्चात्पदेनानंतधर्मकपदेनात्रापीनरुक्त्यमाशंकनीयमिति। तथाचप्रयोगः। अनंतधर्मात्मकंवस्तूत्पादव्ययध्रौव्यात्मकत्वात्। यदनंतधर्मात्मकंनभवति। तदुत्पादव्ययध्रौव्यात्मकमपिनभवति। यथा

विषाणादिवरमिति। व्यतिरेकानुमानं। अनंताश्च धर्मा यथैकस्मिन्वस्तुनि भवंति। तथाग्रे वक्ष्यमाणं। धर्मश्चोत्पादादित्रयात्मकत्वेन व्यवतिष्ठते। धर्माणां धर्मिणश्चैकांतेनात्यंतभेदेन प्रतीयेत। नपुनः पूर्णघटतेति प्रतीयतेचघटः पूर्णोत्पन्नइति। ततोदेशेनेतिपक्षोपि क्षोदक्षमः। नापिसामस्त्येतिपक्षः। यदिसामस्त्येनोत्पन्नः स्यात्। ततोग्रहः प्रतीतिस्तदानींनस्यात्। नचसानास्ति। मार्दवेनपुनर्नवो वर्णरूपेणापिप्रतीतेः। ततोघटोयदोत्पद्यते। तदासघटात्मनोत्पद्यते। मृत्पिंडात्मनाविनश्यति। मृदात्मनाचध्रुवइति। बलादभ्युपगंतव्यंस्यात्। यथाहिवस्तुसर्वैः प्रतीयते। तथाचेन्नाभ्युपगम्यते। तदासर्ववस्तुव्यवस्थालोकदापिनभवेत्। अतोयथाप्रतीतेयवस्त्वभ्युपगंतव्यं। तदेवयदुत्पन्नंतदेवनष्टंतदेवनश्यति। नंक्ष्यतिच। कथंचित्यदुत्पन्नं। तदेवोत्पद्यते। उत्पत्स्यतेच। कथंचित्यदेवाहतं। तदेवातिष्ठतिस्थास्यतिचकथंचित्। तथायदेवकेनचिद्रूपेणनष्टं। तदेवकेनचिद्रूपेणोत्पन्नं। केनचिद्रूपेणाहतंच। एवंयदेवनश्यति। तदेवोत्पद्यतेतिष्ठतिच। यदेवनश्यति। तदेवोत्पत्स्यते। स्थास्यतिचेत्यादिसर्वमुपपन्नं। अंतर्बहिश्चसर्वस्यवस्तुनः सर्वदोत्पादादित्रयात्मकस्यैवाबाधिताध्यक्षेणानुभूयमानत्वात्। अनुभूयमानेचवस्तुनः स्वरूपेविरोधासिद्धेः। अन्यथावस्तुनोरूपरसादिष्वपिविरोधप्रसक्तेः। प्रयोगश्चात्र। सर्वंवस्तूत्पादव्ययध्रौव्यात्मकं। सत्वात्। यदुत्पादव्ययध्रौव्यात्मकंनभवति। तत्सदपिनभवति। यथाखरविषाणं। तथाचेदंतस्मात्तथेतिकेवलव्यतिरेकानुमानं। अनेनचसकलक्षणेनैयायिकादिपरिकल्पितसत्तायोगः। सत्वैवोत्पादाभिमतंचार्थक्रियाकरक्षणंसत्वं। द्वेअपिप्रतिक्षिप्तेद्रष्टव्ये तन्निरासप्रकारश्चग्रंथांतरादवगंतव्यः। अथयेनेतिशब्देनयोज्यते। येनकारणेनोत्पादव्ययध्रौव्ययुक्तंसदृश्यते। तेनकारणेनमानयोः प्रत्यक्षपरोक्षप्रमाणयोर्गोचरोविषयोऽनंतधर्माः स्वभावाः। सत्वंहेयत्वप्रमेयत्ववस्तुत्वादयोयस्मिन्। तदनंतधर्मकं। अनंतपर्यायात्मकं। अनेकांतात्मकमितियावत्वस्तु। वाचीवाहितुक्तमभ्यधायि। अयंभावः। यतएवोत्पादादित्रयात्मकंपरमार्थसत्। ततएवानंतधर्मात्मकंसर्ववस्तुप्रमाणविषयोऽनंतधर्मात्मकतायामेवोत्पादव्ययध्रौव्यात्मकतायाउपपत्तेः। अन्यथातदनुपपत्तेरिति। अत्रानंतधर्मात्मकस्यैवोत्पादव्ययध्रौव्यात्मकत्वंयुक्तिमुक्तंतामनुभवतातित्तापनायैवभूयोनंतधर्मकपदप्रयोगे। नपुनः पश्चात्पदेनानंतधर्मकपदेनात्रापीनरुक्त्यमाशंकनीयमिति। तथाचप्रयोगः। अनंतधर्मात्मकंवस्तूत्पादव्ययध्रौव्यात्मकत्वात्। यदनंतधर्मात्मकंनभवति। तदुत्पादव्ययध्रौव्यात्मकमपिनभवति। यथा

विषाणादिवरमिति। व्यतिरेकानुमानं। अनंताश्च धर्मा यथैकस्मिन्वस्तुनि भवंति। तथाग्रे वक्ष्यमाणं। धर्मश्चोत्पादादित्रयात्मकत्वेन व्यवतिष्ठते। धर्माणां धर्मिणश्चैकांतेनात्यंतभेदेन सदासत्वेकत्रयवर्तिधर्मणमपिकथंचिदभिन्नस्वतयासदासत्वं। अन्यथाधर्मिणामसत्वेकथंचिन्नदभिन्नस्यधर्मिणोप्यसत्वप्रसंगात्। नचधर्मिणः सकाशादेकांतेनभिन्नाएवाभिन्नाएववाधर्माः। तथानुपलब्धेः। कथंचिन्नदभिन्नानामेवतेषांप्रतीतेश्च। नचोत्पद्यमानविपद्यमानतत्तद्धर्मसद्भावव्यतिरेकेणापरस्यधर्मिणोसत्वमेवेतिवक्तव्यं। धर्माधारविरहितानांकेवलधर्माणामनुपलब्धेः। एकधर्म्याधारणामेवतेषांप्रतीतेः। उत्पद्यमानविपद्यमानधर्मिणामनेकत्वेप्येकस्यतत्तदनेकधर्मात्मकस्यद्रव्यरूपतयाध्रुवस्यधर्मिणोबाधितोध्यक्षगोचरस्यापन्होनुमशक्यत्वात्। अबाधिताध्यक्षगोचरस्यापिधर्मिणोपन्हवेसकलधर्माणामपन्हवप्रसंगात्। तथाचसर्वव्यवहारोछेदप्रसक्तिरतिदुरुत्तरानंतधर्मात्मकंवस्तुप्रयोगश्चात्र। विवादास्पदंवस्तुएकानेकनित्यानित्यसदसत्सामान्यविशेषाभिलाप्यानभिलाप्यादिधर्मात्मकं। तथैवास्खलत्प्रत्ययेनप्रतीयमानत्वात्। यद्यथैवास्खलत्प्रत्ययेनप्रतीयमानं। तत्तथैवप्रमाणगोचरतयाभ्युपगंतव्यं। यथाघटोघटरूपतयाप्रतीयमानोघटतयैवप्रमाणगोचरोभ्युपगम्यते। नपटतयातथैवास्खलत्प्रत्ययेनप्रतीयमानंचवस्तु। तस्मादेकानेकाद्यात्मकंप्रमाणगोचरतयाभ्युपगंतव्यं। नचात्रस्वरूपासिद्धोहेतुः। तथैवास्खलत्प्रत्ययेनप्रतीयमानत्वस्यसर्वत्रवस्तुनिविद्यमानत्वात्। नाद्रव्यपर्यायात्मकाभ्यामेकानेकात्मकस्यनित्यानित्यस्यस्वरूपपररूपाभ्यांसदसदात्मकस्यसजातीयेभ्योविजातीयेभ्यश्चानुगतव्यावृत्तरूपाभ्यांसामान्यविशेषात्मकस्यस्वपरपर्यायाणांक्रमेणाभिलाप्यत्वेनयुगपत्तेषामनभिलाप्यत्वेनचाभिलाप्यानभिलाप्यात्मकस्यचसर्वस्यपदार्थस्यास्खलत्प्रत्ययेनप्रतीयमानत्वंकस्याचिदसिद्धं। ततएवनसंदिग्धासिद्धोपि। नस्खलद्बाधकृतयाप्रतीयमानस्यवस्तुनःसंदिग्धंनाम। नाविरुद्धोर्थाविरुद्धार्थसंसाधकत्वाभावात्। नाहिसांख्यसोगताभिमतद्रव्यैकांतपर्यायैकांतयोःकारणात्ययोगाभ्युपगतपरस्परविविक्तद्रव्यपर्यायैकांतेच। तथैवास्खलत्प्रत्ययेनप्रतीयमानत्वमस्ते। येनविरुद्धःस्यात्। नापिपक्षस्यप्रत्यक्षादिबाधायेनहेतोरकिंचित्करत्वंस्यात्। नापिदृष्टांतस्यसाध्यविकलतावा। नस्खलुघटस्यैकानेकादिधर्मात्मकत्वं। तथैवास्खलत्प्रत्ययप्रतीयमानत्वंचासिद्धंप्रागेवसमर्थितत्वात्। तस्मादनवद्यं। प्रयोगयोगमुपश्रुत्यकिमित्यनेकां

तेनानुमन्यते। ननु सत्वासत्वनित्यानेकांतोऽर्धरात्रेऽपि हीषद्विषमविषधरदष्टेनकथंस्वप्रमाणान् धारयितुं धीरतां दधाति। तथाहि। यदेवसत्तदेवकथमसत्। असच्चेत्सत्कथमितिविरोधः। सत्वासत्वयोः परस्परपरिहारेणस्थितत्वात्। शीतोष्णस्पर्शवत्। यदिपुनः सत्वमसत्वात्मनाऽसत्वंचसत्वात्मनाव्यवस्थितंस्यात्। तदासत्वासत्वयोरविशेषात्प्रतिनियतव्यवहारोच्छेदः स्यात्। एवंनित्यादिष्वपियाच्यं। तथासत्वासत्वयस्तुनोभ्युपगम्यमानेसदिदंवस्त्वसदेत्यवधारणनिर्णीतिरभावाच्छ्रेयः तथायेनांशेनसत्वंतेनैवासत्वमेवाहोश्चित्तेनापिसत्वासत्वं। यद्याद्यः पक्षस्तदास्याद्वादहानिः। द्वितीयेपुनर्येनांशेनसत्वंतेनैवासत्वमेवाहोश्चित्तेनापिसत्वासत्वमित्यनवस्था। तथायेनांशेनभेदस्तेनभेदएवाथतेनापिभेदाभेदः। आद्येमतक्षतिः। द्वितीयेपुनरनवस्था। एवंनित्यानित्यसामान्यविशेषादिष्वपिवाच्यं। तथासत्वस्यान्यर्थिकरणंसत्वस्यान्यर्थिकरणंयथायेनरूपेणसत्वं। तेनसत्वमसत्वस्याद्व्यतिसंकरः। युगपदुभयप्राप्तिसंकरस्तिवचनात्। तथायेनरूपेणसत्वं तेनासत्वमपिस्यात्। येनचासत्वं। तेनसत्वमपिस्यात्। इतिव्यतिकरः परस्परविषयगमनंव्यतिकरस्तिवचनात्। तथासर्वस्यानेकात्मकत्वेगौरिवगवयमणिज्ञानादेरप्यनवस्थादूरुत्पता। ततश्चज्ञानार्थौचानेकादावपिप्रवर्तेते। अनेकार्थौचदीपोयथेति। ततश्चप्रतिनियतव्यवहारलोपः। तथाचप्रत्यक्षादिप्रमाणबाधः। ततश्चतादृशोवस्तुनोसंभवएव। अत्रोच्यते। यदेवसत्तदेवकथमसदित्यादि। यदवादि। वादिदेवसूरिणा। तच्चनरचनामात्रमेवाविरोधस्यप्रतीयमानाप्रतीयमानयोरसंभवात्। तस्यानुपलंभरूपत्वात्। वंध्यागर्भस्तनंधयवत्। नचस्वरूपादिनावस्तुनः सत्वेनैवपररूपादिभिरसत्वस्यानुपलंभोस्ति। येनसहानवस्थानलक्षणोविरोधः स्यात्। शीतोष्णवत्। परस्परपरिहारस्थितिलक्षणस्तुविरोधएकत्राग्रफलादेरूपरसयोरिवसंभवतोरेवसदसत्वयोः स्यान्नपुनरसंभवतोः। संभवदसंभवतोर्वा। एतेनवध्यघातकभावाविरोधोपि फणिनकुलयोर्बलवदबलवतोः प्रतीतः सत्वासत्वयोरशंकनीयएव। तयोःसामान्यबलवत्वात्। मयूरांडरसेमानावर्णवत्। किंचायंविरोधः। किंस्वरूपमात्रस्य। तत्तत्कालासंभवेन २अर्थक्रियैकद्रव्यायोगेन ३किमेककालैकद्रव्याभावतः ४तत्तत्कालैकद्रव्यैकप्रदेशासंभवात्। ५तत्राद्योनयुक्तः। यतोनहिशीतस्पर्शोनचेक्षितोऽन्यानिमित्तःस्वात्मसद्भावएवोष्णस्पर्शेनसहाविरुद्धेनेति ३उष्णस्पर्शोवेतरेण। अन्यथात्रैलोक्येप्यभावः स्यादनयोरिति। नाद्वितीयः। एकस्मिन्नाविकालेएथक्

DR BHAU DAJI MEMORIAL

द्वयोरप्युपलंभात्। नाविद्यमानयोः। एकस्मिन्नपिस्तोदभाजनेरात्रौशीतस्पर्शोदिवाचोष्णस्पर्शः समुपलभ्यते। नचतत्राविरोधः। ३नाविद्यमानयोः। धूपकरुछकादेर्द्वयोरप्युपलंभात्। ४नचमोघिनघटते। यतएकस्मिन्नेवतप्तलोहभाजनेस्पर्शापेक्षयात्रैवोष्णमेवनैवप्रदेशेरूपापेक्षयाशीतत्वं। यदिहिरूपापेक्षयाप्युष्णत्वंस्यात्। तर्हिज्ञाननयनदर्शनप्रसंगः। ननुएकस्ययुगपदुभयरूपताकथंघटते। इतिचेन्न। यतोयथाएकस्यैवपुरुषस्यापेक्षावशात्लघुत्वगुरुत्वबालत्वयुवत्वपुत्रत्वपितृत्वगुरुत्वशिष्यत्वादीनि। परस्परविरुद्धान्यपिधर्मयुगपदविरुद्धानि। तथासत्वासत्वादीन्यपितस्मान्नसर्वथाभावानांविरोधोघटते। कथंचिद्विरोधस्तुसर्वभावेषुतुल्योनबाधकः। १तथाचांशयोरपिनयुक्तः। सत्वासत्वयोः स्फुटरूपेणैवप्रतीयमानत्वात्। अरुढप्रतीतोहिसंन्यायोयथाबालतप्रदेशोष्णपुरुषयोः। २यथाह्युक्तमनवस्थेति। तदप्येषामतिगुरोर्वचः। यतःसत्वासत्वाद्योवस्तुनएवधर्मौ। ननुधर्माधर्मिणोधर्मानभ्युपगमेकांतवचनात्। नचैवमनेकांताभ्युपगमेकांतहानिः। अनेकांतस्यसम्यगेकांताविनाभावित्वात्। अन्यथानेकांतस्यैवाघटनात्। नयार्पणादेकांतस्यप्रमाणार्पणादनेकांतस्यैवोपदेशात्। तथैवदृष्टेष्टाभ्यामविरुद्धस्यतस्यव्यवस्थितेः। किंचप्रमाणार्पणयासंतेपिमतासत्कल्पनापिभवतु। नचतत्रकश्चनापिदोषः। ननूक्तमनवस्थेतिचेन्न। यतःसाध्यनेकांतस्यभूषणंनदूषणं। अमूलक्षितिकारित्वेनप्रत्युतानेकांतस्यैवोपकत्वात्मूलक्षितिकारीह्यनवस्थादूषणं। यदुक्तं। मूलक्षितिकरीमाद्रनवस्थादिदूषणं। वस्त्वानंत्येप्यनेकोचनानवस्थापिवार्यतेति।२।। ॥ ततोयथा २सत्वेपिसत्वोसच्चकल्पनाविधीयते। तथा २नेकांतस्येवोपदेशनंनमूलक्षतिः। तथाहि। इदंसर्वपदार्थानांस्वरूपेणसत्वं पररूपेणचासत्वं। तत्रज्ञानस्यतावत्सामान्येपयोगस्वरूपं। तस्यतत्सक्षणत्वात्। ततोन्योनुपयोगः पररूपताभ्यांसदसत्वेप्रतीयेते। तदुपयोगस्यापिविशेषतोज्ञानस्यस्वार्थाकारव्यवसायः स्वरूपंदर्शनस्यानाकारग्रहणं स्वरूपं तदपरांतंतुपररूपं। ततस्ताभ्यांतत्रापिसत्वं। तथापुनर्दर्शनस्यापिपरोक्षस्यावेद्यांशं। प्रत्यक्षस्यवेद्यांशंस्वरूपंदर्शनस्यापिचक्षुरचक्षुर्निमित्तंचक्षुराद्यालोचनंस्वरूपं। अवधिदर्शनस्याप्यवध्यालोचनंस्वरूपंअन्यच्चपररूपं। ततस्ताभ्यांतत्रापिसत्वासत्वेपरोक्षस्यापिमतिज्ञानस्येंद्रियानिंद्रियानिमित्तंस्वार्थाकारग्रहणंस्वरूपं। श्रानेंद्रियमात्रानिमित्तंश्रुतस्यस्वरूपंप्रत्यक्षस्यापिविकलस्यावधिमनःपर्यायरूपस्यमनोक्षाग्रेसंस्वार्थग्रहणंस्वरूपंसकलप्रत्यक्षस्यसर्वद्रव्यपर्यायसाक्षात्करणंस्वरूपं। ततोन्यन्पर रूपं। ततस्ताभ्यांपुनरपितत्रापि

सदसत्वेप्रतिपत्तये। एवमुत्तरेतरविशेषाणामपिस्वपररूपेतरैरभ्यूह्येते॥ तद्विशेषप्रतिविशेषाणामनंतत्वात्। एवंघट
पटादिपदार्थानामपिस्वपररूपप्ररूपणाकार्या। तदपेक्षयाचसत्वासत्वेप्रतिपाद्ये॥ एवंचवस्तुनः सत्वेपिसत्वासत्वकल्पना
यामनेकांतोदूषनमेव। नपुनः कापिक्षतार्हति। ननुसत्वेपिसत्वांतरकल्पनेधर्मिणोधर्मानभवंतीतिनचोविरुध्यतेमेवचो
वः। अद्याप्यनभिज्ञोभवान्स्याद्वादामृतरहस्यानां यतःस्वधर्मापेक्षयायोधर्मः सत्वादिः सएवस्वधर्मांतरापेक्षयाधर्मी।
एवमेवानेकांतात्मकव्यवस्थोपपत्तेः। ततःसत्वेपिसत्वांतरकल्पनायांसत्वस्यधर्मित्वं। सत्वांतरस्यचधर्मत्वमितिधर्मिणए
वधर्माभ्युपगमान्नपूर्वोक्तदोषावकाशः। नचैवंधर्मस्यापिधर्मांतरापेक्षयाधर्मित्वप्राप्तेरनवस्था। अनाद्यनंतताद्धर्मधर्मि
व्यवहारस्यादृश्यसरात्रिप्रवाद्वत्। बीजांकुरपोर्वा पर्यनत्। अभव्यसंसारवद्वा। एवंनित्यानित्यभेदादिष्वपिवाच्यं॥३॥ ॥
तदनेकधर्मिकरण्यमप्यसत्। निर्बाधकाध्यक्षबुद्धौ सत्वासत्वयोरेकाधिकरण्येनप्रतिभासनात्। नखलुतथाप्रतिभासमानयो
र्वैयधिकरण्यं। एकत्रफलेरूपरसयोरपितत्प्रसंगात्॥५॥ संकरव्यतिकरौवापिमेचकज्ञानदृष्टांतेननिरसनीयौ। यथामेचकज्ञान
मेकमप्यनेकस्वभावं। नचतत्रसंकरव्यतिकरौ। एवमत्रापि। किंचयथाअनामिकायायुगपन्मध्यमाकनिष्ठिकासंयोगेद्वित्वदीर्घ
त्वे। नचतत्रसंकरादिदोषदोषः। एवमत्रापि॥६॥ तथाचद्रव्यवाद्वत्वादेरद्रव्यगुणादिरूपतेत्यादि। तदपिमहामोहप्रमादिप्र
लपितप्रायं। यतोद्वत्वादेः स्वरूपापेक्षयाद्वत्वादिरूपतानपररूपापेक्षया। द्वत्वार्थिनामनद्वादौप्रवृत्तिप्रसंगः। स्व
परपर्यायात्मकत्वेनसर्वस्यसर्वात्मकत्वाभ्युपगमात्। अन्यथावस्तुस्वरूपस्यैवाघटमानत्वात्। किंचभूतभविष्यदादिपरमाणूनामपिभूतभाविद्वित्वपरिणामापेक्षयाद्वित्वरूपताप्यस्त्येव। तथाचतेषांकथंचिद्द्वित्वरूपतापिद्वत्वस्यांगीकृयत
एव॥७॥ प्रत्यक्षादिबुद्धौप्रतिभासमानयोः सत्वासत्वयोः कानामप्रमाणबाधका। नहिदृष्टेनुपपन्नंनाम। अन्यथासर्वत्रापितत्प्रसंगः॥८॥ प्रमाणप्रसिद्धस्यचनाभावः कल्पयितुंशक्योतिप्रसंगात्। प्रमाणादिव्यवहारविलोपश्चस्यादिति॥९॥ एतेनयदप्युच्यते। नेकांतेप्रमाणमप्यप्रमाणं। सर्वज्ञोप्यसर्वज्ञः सिद्धोप्यसिद्धइत्यादि। तदप्यक्षरगुणनिकामात्रमेवयतः प्रमाणमपिस्वाविषयेप्रमाणं। परविषयेचाप्रमाणमितिस्याद्वादादिभिरभ्यनत एवसर्वज्ञोपिस्वकेवलज्ञानापेक्षयासर्वज्ञसंसा
रिकेवलज्ञानापेक्षयात्वसर्वज्ञः। यदितदपेक्षयापिसर्वज्ञः स्यात्। तदासर्वज्ञावानांसर्वज्ञत्वप्रसंगः। सर्वज्ञत्वस्यापिछाद्मस्थिकज्ञानि
त्व

तथार्थाकारमेवेच्छन्नर्थस्याद्वैतमन्यथेति मन्यमानाश्चित्रपटाद्वैतं सानमेकमप्यनेकाकारं संप्रतिपेनाः॥ ९। तथासुगतस्तानं सर्वार्थविषयं सर्वार्थाकारं चित्रंकथंनभवेत्॥ १०। तथैकस्येव हेतोः पक्षधर्मसपक्षसत्वाभ्यामन्वयं। विपक्षेव्यमानत्वात्। व्यतिरेकंचान्वयविरुद्धं तेतार्किकमूर्धाचक्रिरे॥ ११। एवंवैभाषिकाद्सौगताः स्वयंस्याद्वादं स्वीकृत्यापितत्रविरोधमुद्भावयंतः स्वशासनानुरागांधकारसंभारविप्लावविवेकदृशोविवेकिनामपकर्णनायाएवभवंति। किंचसौत्रांतिकमतेनैकस्यैवकारणस्यसपरापरसामग्र्यंतः पातितयानेककार्यकार्यावदाते। यथारूपस्यगंधादिसामग्र्यागतरूपमुपादानभावेनस्वोत्तररूपक्षणंजनयति। रसादिक्षणांश्चसहकारितयातदेवचरूपंरूपालोकमनस्कारचक्षुरादिसामग्र्यंतरगतंसमरूपस्यतानंसहकारितयाजनयति। आलोकाद्युत्तरक्षणांश्चतदेवमेकंकारणमनेककार्याणियुगपत्कुर्वाणंकथमेकेनस्वभावेनकुर्यात्। नानास्वभावैर्वा। यद्येकेनस्वभावेन। तर्ह्येकस्वभावेनकृतत्वात्कार्याणांभेदोनस्यात्। अथनानास्वभावैरनित्योपिपदार्थएकेनस्वभावेननानाकार्याणिकुर्वाणः कस्मान्निषिध्यते। अथनित्यस्यैकस्वभावत्वेननानाकार्यकारणंनघटते। तर्ह्यनित्यस्यापतें कथं मस्तु। निरंशैकस्वभावत्वात्। सहकारिभेदाच्चेत्करुते। तर्हिनित्यस्यापि सहकारिभेदात्तत्करस्तु। अथनानास्वभावैरनित्यः कुर्याद्दृतिचेत्। नित्यस्यापितथातत्करणंमस्तु। अथनित्यस्यनानास्वभावानसंभवंति। कूटस्थनित्यस्यैकस्वभावत्वात्। तर्ह्यनित्यस्यापिनानास्वभावानसंति। निरंशैकस्वभावत्वात्। तदेवंनित्यस्यचसमानदोषत्वान्नित्यानित्योभयात्मकमेववस्तुमानितंवरं। तथाचैकांतनित्या..नित्यपक्षसंभवदोषजालंपरिहृतंभवतीति॥ १२॥ ज्ञानवादिनोपिथागताः स्वार्थाकारयोरभिन्नमेकंसंवेदनं। संवेदनाज्ज्ञाभिन्नोग्राह्याकारोस्वयमनुभवंतः कथंस्याद्वादंनिरस्येयुः॥ १ तथासंवेदनस्याग्राह्यग्राहकाकारोस्वयमनुभवविकलतास्वनेपिभवद्भिर्नानुभूयते। तरुणानुभवेनासकलसकलमतामधुनेवमकृतापत्तेः॥ ॥ तत्वज्ञानोत्पत्तिर्मुक्तिरितिवचनात्। अनुभूयतेचसंवेदनंसंवेदनरूपतयाकथंचित्। ततएकस्यापिसंवेदनस्यानुभूताननुभूततयानेकांतप्रतिभासोदुर्निवारोपन्होतुमिति॥ २॥ तथासर्वस्यतानंस्वसंवेदनेनग्राह्यग्राहकाकारस्मृत्यतयात्मानमसंवेदत्। संवित्प्रकृतंचानुभवत्। विरुद्धेतरात्मकंसत्। एकांतवादस्यप्रतिक्षेपकमेवमवेत्॥ ३। तथाग्राह्याकारस्यापियुगपदनेकार्थावभासिनश्चित्रैकरूपतायाप्रतिक्षेपएकांतवादं॥ ४। नैयायिकैर्वै

शेषिकैश्चयथास्याद्वादोभ्युपगम्यते। तथाप्रदर्श्यते। इंद्रियसंनिकर्षादिर्धूमज्ञानंजायते। तस्माज्ज्ञानिज्ञानं। अग्नेरिंद्रियसंनिकर्षादिः प्रत्यक्षंप्रमाणं। तत्फलंधूमज्ञानं। धूमज्ञानेनाग्निज्ञानापेक्षयानुमानंप्रमाणं। अग्निज्ञानंत्वनुमानफलं। तदेवंधूमज्ञानस्यप्रत्यक्षफलतामनुमानप्रमाणतांचोभयरूपतामभ्युपगच्छंति। एवमन्यत्रापिज्ञानेफलताप्रमाणतापूर्वोक्तिरपिस्वयायथार्हमवगंतव्या॥ १। एकमेवचित्रपटादेरवयविनोरूपंविचित्राकारमभ्युपयंति। नचावयवेधर्माश्चोद्यंते। तदुक्तंरूपं द्रव्यं। विरोधादेकमनेकस्वभावमयुक्तमितिचेन्न। तथाचप्रावादुकप्रवादः। एकंचेतत्कथंचित्रंचित्रंचेदेकतां कुतः। एकंचेदवतुचित्रंचेत्येतच्चित्रतरंततः॥ १॥ ॥ इतिकोविरोधइत्यादि। चित्रात्मनोरूपस्यनायुक्तता। विचित्रकारणसामर्थ्यभाविनस्तस्यसर्वलोकप्रसिद्धेनप्रत्यक्षेणैवोपपादितत्वादित्यादि॥ २। एकस्यैवधूपकटुकस्यैकस्मिन्भागेशीतस्पर्शः परस्मिंश्चभागेऽस्मस्पर्शः। अवयवानांभिन्नत्वेप्यवयविनएकत्वात्। एकस्यैवहीविरुद्धौतौस्पर्शौ। यतस्तेषामेवंसिद्धांतः। एकस्यैवघटादेश्चलाचलरक्तारक्ताद्यनेकविरुद्धधर्मोपलंभोपिदुर्लभोविरोधंगंधवृत्ति॥ ३। नित्येश्वरस्यसिद्धसंज्ञिहीर्षाचरजस्तमोगुणात्मकोस्वभावो। क्षितिजलाद्यष्टमूर्तितावत्सात्विकस्वभावाः परस्परं विरुद्धाः॥ ४। एकस्यामलकस्यकुवलयबिल्वाद्यपेक्षयामहत्वमणुत्वंचविरुद्धं॥ ५। एवमिसोःसामिद्गुणापेक्षयान्हस्वदीर्घत्वेअपि॥ ६। देवदत्तादेः स्वपितृसुतापेक्षयापरत्वापरत्वेअपि॥ ७। अपरंसामान्यंनात्रासामान्यविशेषइत्युच्यते। सामान्यविशेषश्चद्रव्यत्वगुणत्वकर्मत्वलक्षणाः। द्रव्यत्वंहिनवसुद्रव्येषुवर्तमानत्वात्सामान्यंगुणकर्मभ्योव्यावृत्तत्वाद्विशेषः। एवंगुणत्वकर्मत्वयोरपिसामान्यविशेषतांविभाव्या। ततश्चसामान्यंचतद्विशेषश्चेतिसामान्यविशेषः। तस्यैकस्यसामान्यतांविशेषतांचविरुद्धं॥ ८। एकस्यैवहेतोः पंचरूपाणिसंप्रतिपद्यंते॥ ९। एकस्यैवपृथिवीपरमाणोः सत्तायोगात्सत्वं। द्रव्यत्वयोगाद्द्रव्यत्वं। पृथिवीत्वयोगात्पृथिवीत्वं। परमाणुत्वयोगात्परमाणुत्वं। अंत्याद्विशेषात्परमाणुभ्योभिन्नत्वंचेछतांपरमाणोस्तस्यसामान्यविशेषात्मकताबलादापतति। सत्वादीनांपरमाणुतोभिन्नतायांतस्यासत्वाद्रव्यत्वापृथिवीत्वाद्यापत्तेः॥ १०। एवंहरेरात्मनः सत्वंद्रव्यत्वं आत्मत्वयोगादात्मत्वं। अंत्याद्विशेषाद्यस्मादाद्यात्मभ्योभिन्नतातस्यात्मनः सामान्यविशेषरूपता वक्तव्यंस्यात्। एवमाकाशादिष्वपिसाभाव्या॥ ११। योगिनांचित्ते

षु तुल्याकृतिगुणक्रियेषु परमाणुषु संकीर्णमनः संचप्रत्ययाधारविलक्षणोयमिति प्रत्ययोयेभ्योभवति। तेभ्यः व्यावृत्तेषु तुल्याकृतिगुणक्रियत्वविलक्षणत्वंचोभयंप्रत्ययाधारमुच्यमानंस्याद्वादमेवसाधयेत्॥१२॥ एवंनैयायिकवैशेषिकाभ्यामात्मनोनेकांतमुररीकृत्यापितत्प्रतिक्षेपायोपन्यस्तः सतांकथंनोपहास्यतांयाति। किंच। अनेकांताभ्युपगमेसत्येषगुणः। परस्परविभक्तेषुद्रव्यावयवाश्रयव्याप्तिषुमिथोवर्तनचिंतायांयदूषणजालमुपनिपतति। तदपिपरिहृतंभवति। तथाहि। अवयवानामवयविनश्चमिथोतंनभेदोभ्युपगम्यते। नैयायिकादिभिर्नपुनः कथंचित्ततः पर्यनुयोगमर्हंतितेऽवयवेष्ववयवीवर्तमानः किमेकदेशेनवर्ततेउतसामास्त्येन। यद्येकदेशेन। तदयुक्तं। अवयवानोनिरवयवत्वाभ्युपगमात्। सावयवत्वेपितेभ्योऽवयवीयद्यभिन्नस्ततोऽनेकांतापत्तिरेकस्यानेकावयवत्वप्राप्तेः। अथतेभ्योभिन्नोऽवयवी। तर्हितेषु सकथंवर्ततइतिवाच्यं। एकदेशेनसामास्त्येनवा। एकदेशपक्षेपुनरुक्तदोषवर्तनात्। अथसामस्त्येनतेषुसवर्तते। तदप्यसाधीयः। प्रत्यवयवमवयविनः परिसमाप्तितयावयविबहुत्वप्रसंगात्। ततश्चतेभ्योभिन्नोषवयवीनाविकल्पभागभवति। नचभेदपक्षेप्यवयवीमात्रमवयवमात्रंवास्यादितिचेन्न। अभेदस्याप्येकांतेनाभ्युपगमात्। कथंतर्ह्यन्योन्यव्यावृत्तस्वरूपेणविवक्षयासंदर्शनीयभेदोऽवयवेषवयव्यभ्युपगम्यते। अबाधितप्रतिभासेषुसर्वत्रानयवावयविनोमिथोभिन्नाभिन्नतयाप्रतिभासनात्। अन्यथाप्रतिभासमानानामन्यथापरिकल्पनेनिर्मूलाद्वैतशून्यवादादेरपिकल्पनाप्रसंगात्। एवंसंयोगिषुसंयोगः। समवायिषुसमवायः। गुणिषुगुणो व्यक्तिषुसामान्यंचोत्पत्तिमत्तिमत्त्वाभ्युपगम्यमानानितेषुवर्तनचिंतायांसामास्त्येकदेशविकल्पाभ्यांदूषणीयानि। तदेवमेकांतभेदेनेकदूषणोपनिपातादनेकांतेचदूषणानुत्थानादनेकांताभ्युपगमान्नमोक्ष इत्येतत्तरमादेवमसारतांविहायानेकांतोऽभ्युपगतः। किंभेदैकांतकल्पनयात्यंतानेवात्मतापरिक्लेशितेनेति। सांख्यः सत्वरजस्तमोभिरन्योन्यंविरुद्धैर्गुणैर्ग्रथितंप्रधानमभिदधानः एकस्याः प्रकृतेः संसारावस्थामोक्षसमययोः प्रवर्तनानिवर्तनधर्मोविरुद्धोऽभ्युपगच्छन्कथंस्वस्यानेकांतमतेमुख्यमात्मानमीक्षेत स्यात्। मीमांसकास्तुस्वयमेवप्रकारांतरेणैकानेकाद्यनेकांतंप्रतिपद्यमानास्तत्प्रतिपत्तयेसर्वथापर्यनुयोगनार्हंति। अथवाशब्दस्यतत्संबंधस्यचनित्यत्वैकांतंप्रतितेष्वेवंपर्यनुयोग्याः। त्रिकालशून्यकार्यरूपार्थविषयविज्ञानोत्पा

दकोनेत्रादिरिति मीमांसकाभ्युपगमः। अत्रकार्यतायास्त्रिकालशून्यत्वेऽभावप्रमाणस्यविषयतास्यात्। अर्थत्वेनुप्रत्यक्षादिविषयताभवेत्। उभयरूपतायांपुनर्नोदनायाविषयतेति। अथबोद्धादिसर्वदर्शनाभीष्टदृष्टांतायुक्तयश्चानेकांतासिद्धयेसमाख्यायंते। बौद्धादिसर्वदर्शनानिः संशयज्ञानमेकमुल्लेखद्वयात्मकंप्रतिज्ञानंनानेकांतंप्रतिक्षिपंति॥१॥ तथास्वपक्षसाधकंपरपक्षोछेदकंचविरुद्धधर्माध्यासमनुमानंमन्यमानाः परेनेकांतंकथंनिराकुर्युः॥२॥ मयूरांडरसेननीलादयः सर्वेपिवर्णानेकरूपानाप्यनेकरूपाः। कंचिदनेकरूपायथावस्थिता। तथैकानेकाद्यनेकांतोपि॥ तदुक्तं। नामस्थापनाद्यनेकांतमाश्रित्य। मयूरांडरसेयद्वर्णानांनीलादयः स्थिताः। सर्वेष्वन्योन्यसंश्लिष्टास्तुल्यामाद्येघटे॥१॥ नान्वयेसाहभेदित्वान्नभेदोन्वयहानितः। द्वैरूप्यसंसर्गसिद्धेरित्यनेकांतसंघटः॥२॥ अत्रहिशब्दोहेतौयस्मादर्थेघटः। भागोसिंहोनरेभागेयोर्थोभागद्वयात्मकः तमभागंविभागेननरसिंहंप्रचक्षते॥३॥ ननरःसिंहरूपत्वान्नसिंहोनररूपतः। मूर्त्तविज्ञानकार्याणांभेदाज्ज्ञात्वंनरंहरिः॥४॥ त्रैरूप्यंपंचरूप्यंवा ब्रुवाणाहेतुलक्षणं॥ सदसत्ताद्यसर्वेपिकुतःपरेनमन्वते॥५॥ ॥ यथैकस्यैवनरस्यपितृत्वपुत्रत्वाद्यनेकसंबंधाभिन्ननिमित्तानाविरुध्यंते॥ तद्यथा। सनरःस्वपित्रपेक्षयापुत्रः स्वसुतापेक्षयानापितेत्यादि। अभिन्ननिमित्तः संबंधाविरुध्यंते। तद्यथा। स्वपित्रपेक्षयैवसपितापुत्रश्चेत्यादि। एवमनेकांतेपिद्रव्यात्मनेकंपर्यायात्मनात्मनेकमित्यादिभिन्ननिमित्ततयानाविरुध्यते। द्रव्यात्मनैवैकमनेकंचेत्यादित्वाभिन्ननिमित्ततयाविरुध्यते। अभिन्ननिमित्तत्वादविरोधस्यमूलं। नपुनर्भिन्ननिमित्तत्वमिति। सदसद्वक्तव्यनरदेवादिपर्यायात्मनोनित्यानित्यतादयनेकांतमंतरेणनोपपद्यंते। यथासर्पद्रव्यस्यस्थिरस्योत्फणावक्रणावरोहमथोविरुद्धेपिद्रव्यापेक्षयानाविरुद्धे। यथैकस्याअंगुल्याः सरलत्वावनामोत्पत्तिश्च। यथावागारसेखाथिनिदुग्धपर्यायाद्यनागोत्तरदधिपर्यायोत्पादोसंभवंतोप्रत्यक्षादिप्रमाणेनोपलब्धेः। एवंसर्वस्यवस्तुनोद्रव्यपर्यायात्मकतापिकिंच। सर्वेषपिदर्शनेषुस्वाभिमतसाध्यसाधनायाभिधीयमानोहेतवोप्यनेकांताभ्युपगममंतरेणनसमीचीनतामंचंति। तथाह्यत्रस्वोपन्यसमेवपरहेतुतमोभास्करनामकंवादरूक्तिरिव्यतेयथा॥ ॥ इहहिसकलतार्किकचक्रचूडामणितयात्मानंमन्यमानाः सर्वदापिप्रसभंक्षोभितस्वाभिमानाः गुणवत्कविदूक्तमत्सरविदधानाः। मुग्धजनसमाजेः स्तूयंतेस्तूयंतेमाभिरधानाः। स्पष्टोद्धवेनस्वानुभवेनसमस्ततोमगतमभ्रांतमनेकां

त

॥ ७२ ॥

मनुभवंतोपि स्वयंचयुक्त्या नैकांतमेववदंतोपि प्रकरणवचनमात्रेणैवानेकांतमनिच्छंतोयथावस्थितंवस्तुस्वरूपमपश्यंतो। निज
मतानुरागमेवपुष्णंतो। विद्वत्समीपेचकराविसम्यक्हेतुस्वरूपमपरिछंतो। निग्रहस्थानंतदनवगच्छंतोभवंतोयत्साध्यसाधनायसा
धनमधुनाभ्युद्यु॰। तत्रापिसाध्यसिद्धिनिबंधनंहेतुः अतोनैकांतव्यवस्थापनार्थंयथावस्थितंवस्तुस्वरूपंदर्शयद्भिःसद्भिस्सा
भिः प्रथमतोहेतोरेवस्वरूपंसम्यगनेकांतरूपंप्रकाश्यते। तावद्दूषणावधानानिक्षस्वपक्षाभिमानाः क्षणंमाध्यस्थ्यंभजंतःश्रु
ण्वंतुभवंतः। तथाहि। युष्मदुपन्यस्तेनहेतुनाकिमन्वयिनास्वसाध्यंसाधयेत व्यतिरेकिणावा। अन्वयव्यतिरेकिणावा। यद्यन्वय
व्यनेन। तदातत्पुत्रत्वादेरपिगमकत्वंस्यात्। अन्वय मात्रस्यतत्रापिभावात्। नापिव्यतिरेकिणा। तत्पुत्रत्वादेरेवगमकत्वप्रसं
गात्। श्यामत्वाभावेनत्वत्रगोरपक्षेविपक्षेतत्पुत्रत्वादेरभावात्। अन्वयव्यतिरेकिणाचेत्तदापितत्पुत्रत्वादेतएवसाध्यसिद्धि
प्रसक्तेः। नचास्यत्रैरूप्यलक्षणयोगान्नोहेत्वाभासताशंकनीया। अनित्यत्वसाधनेकृतकत्वादेरपितत्प्रसंगात्। अस्तिचभव
दभिप्रायेणत्रैरूप्यंतत्पुत्रत्वादावित। अथभवतायंदोषोयेषांपक्षधर्मसपक्षसत्वविपक्षासत्वैरेवत्रैरूप्येनाविनाभावपर
समाप्ति नास्माकंपंचलक्षणहेतुवादिनांअस्माभिरसत्प्रतिपक्षत्वप्रत्यक्षागमाबाधितविषयत्वयोरपिलक्षणयोरभ्युपगमादि
तिचेत्तर्हिकेवलान्वयकेवलव्यतिरेकानुमानयोः पंचलक्षणत्वासंभवेनागमकत्वप्रसंगः। नचतयोरागमकत्वंयोगैरिष्टं।
तस्मात्प्रतिबंधनिश्चयैकप्रमाणसंभवेनान्यथानुपपत्तेरनिश्चय एवतत्पुत्रत्वादेरागमकत्वनिबंधनमस्तु। ननुत्रैलक्षण्या
द्यभावः। अथात्रविपक्षेः सत्वंनिश्चितंनास्ति। नहिश्यामत्वाभावेतत्पुत्रत्वंनावश्यं निवर्तनीयमित्यत्रप्रमाणमस्तीतिसो
गतः योगस्तुगर्गादिति। शकाद्याकारपरिणामः श्यामत्वेनसमव्याप्तिकोननुतत्पुत्रत्वेनेत्युपाधिसद्भावान्नतत्पुत्रत्वेविपक्षा
सत्वंसंभवतीतीहेवंनिश्चितान्यथानुपपत्तिमेवप्रदर्शयंतःपरेणभूरणी कुरुतइति। सेवहेतोर्लक्षणमस्तु। अपिच। अस्ति
नभश्चंद्रोनक्षत्रत्वात्। उदेष्यतिसविताअद्यतनादित्योदयादित्यादिषुपक्षधर्मत्वाभावेपिमन्मतेयमेवंविधस्वरू
न्यथानुपपत्तेः। सर्वेक्षणिकमक्षणिकंवा। सत्वादित्यादिष्वपिसपक्षस्याभावेपिहेतोनागमकत्वंनास्तित्वैरूप्यादिनानि
श्चितान्यथानुपपत्तिरेवैकांतेगरूक्षणमस्तु। तत्वमेतदेवप्रपंचः। पुनरप्यभिनिवेशात्तर्हिसोगतेनानाबाधितविषय
त्वमसत्प्रतिपक्षत्वंतातत्वंचयोगेनचस्तातत्वलक्षणमाख्यानीयं। अथाविपक्षान्निश्चितव्यावृत्तिमत्त्वेनाबाधितविष
यत्वमसत्प्रतिपक्षत्वंचज्ञापकहेत्वधिकारात्तातत्वंचोपलभ्यमेवेतिचेत्तर्हिगमकहेत्वधिकारादेषमपिलभ्यमेवेति।

किंदोषेणापिप्रपंचेनेति। अतएवनान्वयमात्रात्हेतुर्गमकोपिवाक्षिप्तव्यतिरेकादन्वयविशेषात्। नाविव्यतिरेकमात्रात्।
किंत्वंगीकृतान्वय॰ तिरेकविशेषात्। नचाविपरस्परानन्विद्धतदुभयमात्रादपितुपरस्परस्वरूपाद्दृष्टान्वयव्यतिरेक
वत्वात्। निश्चितान्यथानुपपत्येकलक्षणस्याद्धेतोर्यथाप्रदर्शितान्वयव्यतिरेकरूपत्वात्। नचत्रैनानांहेतोरेकलक्षणता
भिधानमनेकांतस्यविघातकमितिवक्तव्यं। प्रयोगानियमेएवैकलक्षणोहेतुरित्यभिधानात्। ननुस्वभावानियमेनियते
कस्वभावस्यभूयश्चांगादेरिवनिःस्वभावत्वादितिकथंनहेतोरनेकांतात्मकता। तथाननुभोः सकर्णाः प्रतिज्ञाणिप्रसिद्धप्रमा
णप्रतिष्ठितानेकांतविरुद्धबुद्धिभिर्भवद्भिरन्यैश्चकणभक्षाक्षपादबुद्धादिशिष्यैरुपन्यस्यमानाः सर्वएवहेतवोविवक्षयासि
द्धविरुद्धानैकांतिकतांस्वीकुर्वंतीत्यवगंतव्यं। तथाहि। पूर्वंतावन्नैयायिकाविरुद्धतामभिधीयते। यद्हेकस्येनहेतोरुज्ञाणिपं
चवारूपाणिवास्तवान्यभ्युपगम्यंते। तदासोऽनेकधर्मात्मकमेववस्तुसाधयतीतिकथंनविपर्ययसिद्धिः। एकस्यहेतोर
नेकधर्मात्मकस्याभ्युपगमात्। नचयदेवपक्षधर्मस्यसपक्षएवसत्वंतदेवविपक्षात्सर्वतोव्यावृत्तत्वमितिवाच्यं। अन्व
यव्यतिरेकयोर्भावाभावरूपयोः सर्वथादौतात्म्ययोगात्तत्वेवाकेवलान्वयी। केवलव्यतिरेकीवासर्वो हेतुस्यान्नतुत्रि
रूपः पंचरूपोवा। तथाचसाधनाभासोपिगमकस्यात्। अथनविपक्षासत्वेनाभ्युपयतो। किंतुसाध्यसद्भावेसत्वमेव। सा॰
ध्याभावेनास्तित्वमभिधीयते। ननुतनस्तदभिन्नमितिचेत्। तदसत्। एवंहिविपक्षासत्वस्यतात्विकस्याभावात्। हेतोस्त्रैरूप्या
दिनस्यात्। अथतनस्तदन्यदूर्मांतरं। तर्हिकरूपस्यानेकांतात्मकस्यहेतोरसथाभूतसाध्याविनाभूतत्वेननिश्चितस्यानेकांतव
स्तुप्रसाधनात्कथंनपरोपन्यस्तहेतूनांसर्वेषांविरुद्धता। एकांतविरुद्धेनानेकांतेनबाधासत्वात्। तथासिद्धतासर्वसाधनधर्मा
णामुन्नेया। यतोहेतुः सामान्यंवाभेदोवा। तदुभयंवा। नतावत्सामान्यं हेतुः। तद्धिसकलव्यापिसकलु॰ अथव्यापि ६८१
वा। हेतुत्वेनोपादीयमानंप्रत्यक्षसिद्धंवास्यादनुमानसिद्धंवा। नतावत्प्रत्यक्षसिद्धं। प्रत्यक्षंह्यक्षानुसारितयाप्रवर्तते। अक्षंच
नियतदेशादिनेवसंनिरूप्यते। ततोक्षानुसारितयानियतदेशादावेवप्रवर्तितुमुत्सहते। नसकलकालदेशव्यापिनि। अ
थानियतदेशस्वरूपाव्यतिरेकात्तन्निश्चयेतस्यापितन्निश्चयप्रसक्तिरेव। नियतदेशस्वरूपाव्यतिरेकेनियतदेशतैवस्या श्र
व्याप्तिता। तन्नव्यापि सामान्यरूपोहेतुः प्रत्यक्षसिद्धः। अनुमानसिद्धतायामनवस्थाराक्षसीदुर्निवारा। अनुमानेनहिलिंग

ग्रहणपूर्वकमेव प्रवर्तमानेन सामान्यं साध्यते। लिंगं चन विशेषरूपमिष्यते। ननु गमात्। सामान्यरूपं तु लिंगमवगतं वा। नवगतं वा भवेत्। नतावत् नवगतं। अनिष्टत्वा दतिप्रसंगाच्च। अवगतं चेन्न तात्स्यावगमः प्रत्यक्षेणानुमानेन वा। नप्रत्यक्षेण संनिकृष्टग्राहित्वात्। तस्यानुपलब्धेः। तस्याप्यनुमानेन। तस्याप्यनुमानांतरेणा दिलिंगग्रहणेषु नस्तद्देशानवर्तनात्। तथाचानुमानानामानंत्यात् युगसहस्रैरपि एकलिंगग्रहणं न भवेत्। अपिच। अशेषव्यक्त्याधेयस्वरूपं सामान्यं प्रत्यक्षानुमानाभ्यां निश्चीयमानं स्वाधारनिश्चयमुत्पादयेत्। स्वाधारनिश्चयो वा निश्चयमिति सकलोज्झनं सर्वतः प्रसज्यते। किंच। स्वाश्रयेंद्रियसंयोगात् प्राक्सत्ता नमनं नयत्सामान्यं पश्चादपि तज्ज्ञानं येत्। अविचलितरूपत्वात्। परेरनाधेयातिशयत्वाच्च विचलितत्वे। अनाधेयातिशयत्वे च क्षणिकतापत्तिः। अन्यच्च तत्सामान्यं व्यक्तिभ्योभिन्नमभिन्नमभिन्नाभिन्नं वा हेतुर्भवेत्। नतावद्भिन्नं व्यक्तिभ्यः पृथगनुपलंभात्। समवायेन व्यक्तिभिः सदसामान्यस्य संबंधितत्वात् पृथगनुपलंभ इति चेन्न समवायस्येहबुद्धि हेतुत्वं गीयते। इहेदमिति बुद्धेश्च भेदग्रहणमंतरेणा नभवेत्। किंचातः। अश्वत्वादिसामान्यं स्वाश्रयसर्वगतं वा सर्वसर्वगतं वेष्यते। यदि स्वाश्रयसर्वगतं तदा कर्कादिव्यक्तिशून्येदेशे प्रथममुपजायमानायां व्यक्तेरश्वत्वादिसामान्ययोगो नभवति। व्यक्तिशून्येदेशे सामान्यस्यानवस्थानात् अत्यंतरा दनागमाच्च। अथ सर्वसर्वगतं तत्स्वीक्रियते। तदा कर्कादिभिरश्वशबलेयादिभिरपि तदभिव्यज्येत। नच कर्कादीनामेवं तदभिव्यक्तौ सामर्थ्यं। नशाबलेयादीनामिति वाच्यं। यतः किंरूपं तत्कर्कादीनां सामर्थ्यं साधारणरूपत्वमिति चेन्न। श्वेतश्वेतसाधारणरूपाभ्यक्तयस्तदापरसामान्ययोगात् दृषिनसाधारणा भवेयुः। ततो साधारणरूपत्वादितिव्य * भिचारिभिन्नस्य सामान्यस्याभावादसिद्धस्तल्लक्षणो हेतुः कथंततः साध्यसिद्धिर्भवेत्। अथव्यक्त्यभिन्नसामान्यं हेतुस्तदप्ययुक्तं। व्यक्त्यभिन्नस्य व्यक्तिस्वरूपवत्व्यक्त्यंतरानुगमात् सामान्यरूपतानुपपत्तेर्व्यक्त्यभिन्नत्वस्य सामान्यरूपतायाश्च मिथोविरोधात्। अथभिन्नाभिन्नमिति चेन्नाविरोधात्। अथकेनाप्यंशेनाभिन्नं। केनाप्यभिन्नमितितदप्ययुक्तं सामान्यस्यानिरंशत्वात्। तन्नैकांतसामान्यरूपो हेतुः साकल्येनसिद्धः। नापिविशेषरूपः। तस्यासाधारणत्वेनागमकत्वयोगात्। साधारणत्वान्वयोपपत्तेः। नापिसामान्यविशेषोभयंपरस्परानुविद्धं हेतुः। उभयदोषप्रसंगात्। नाप्यनुभयं। अन्योन्यव्यवच्छेदरूपाणामेकाभावेद्वितीयविधानादनुभयस्यासत्त्वेनहेतुत्वायोगात्। अतिप्रकल्पितं चसामान्यवस्तुरूपत्वात्।

* स्वतश्चेत्ता अथवोश्चरत्यनुरूपं प्रत्ययं जनयिष्यंतीतिकुंतादिसामान्यपरिकल्पनयाहि स्वतश्चेत्साधारणरूपाव्यक्तयस्तदा- २ शेष

DR BHAU DAJI MEMORIAL

धिर्नोषणाविरोध्यभावोघटतामियर्ति। तस्यसंयोगाद्यभावेभावात्। तस्यतु प्रागेवनिरासात्। नापिसाध्यसाधनयोरत्यन्तं घटते। साध्यसाधनयोरसिद्धसिद्धयोर्भेदाभ्युपगमेनतादात्म्यायोगात्। तादात्म्येवासाध्यंसाधनंचैकतरमेवभवेन्नदूयं। कथंचित्तादात्म्येतुजैनेनमतानुप्रवेशस्यात्। तदत्यन्तंखलुकार्यकारणभावेसंभाविनी। कार्यकारणभावश्चार्थक्रियासिद्धौसि ॥ ७६ ॥ त्। अर्थक्रियाचानित्यस्यक्रमाक्रमाभ्यांसदृक्षेषुसत्त्वसत्क्षणनकालनकत्वभावदूयानभ्युपगमेननोपपद्यते। अनित्यस्य सतोसतोवासानघटते। सतःसमवायवर्तिनित्यापारायोगाद्व्यापारेवासत्त्वकारणकालेएवेत्तानामुत्तरोत्तरसर्वक्षणाना मेकसमस्तक्षणवर्तित्वप्रसंगात्। सकलभावानांमिथःकार्यकारणभावप्रसक्तेश्च। असतश्चसकलशक्तिविकलत्वेनकार्य कारणासंभवात्। अन्यथाशशविषाणादेरपितत्प्रसंगात्। तदित्थंसाध्यादीनांसंबंधानुपपत्तेरेकांतमतेपक्षधर्मत्वादि हेतुलक्षणमसंगतमेवस्यात्। तथात्वप्रतिबंधोदूरापास्तएव। तथैकांतवादिनांप्रतिबंधग्रहणमपिनघटते। अविचलि तस्वरूपेह्यात्मनिज्ञानपर्यायाभावात्। प्रतिक्षणध्वंसिन्यपिकार्यकारणाद्युभयनुरोधेकचेतन्याभावात्। नचकार्योद्भव भवानंतरभाविनास्मरणेनकार्यकारणभावादिःप्रतिबंधोनुसंधीयतइतिवक्तव्यं।ननुभूतएवस्मरणंप्रादुर्भवति। नचप्र तिबंधःकेनचिदनुभूतस्तस्योभयानिष्टत्वादुभयस्यचपूर्वापरकालभाविनएकेनायद्ग्रणात्। इतिनप्रतिबंधानश्चयोपि। तदेवमेकांतपक्षेपरैरज्ञायमाणः सर्वोपिहेतुःप्रतिबंधस्याभावात्। निश्चयाच्चानेकांतिकएवभवेत्। ३। एवंचकेवलो यस्सामान्यस्यविशेषस्यचदूयोर्वापरस्परविविक्तयोस्तयोर्हेतुत्वायघटनात्। ननुतव्याहतप्रत्ययानिबंधनपरस्परसं वलितसामान्यविशेषात्मनोहेतोरनेकांतात्मनिसाध्येगमकत्वमभ्युपगंतव्यं। नचयद्रूपंरूपांतराद्व्यावर्तते तद्रे वरूपमनुवृत्तिमासादयति। यच्चानुवर्तेत। तत्कथंव्याहृत्तिमाश्रयतामितिवक्तव्यं। ननुव्याहृतरूपतयाध्यक्षतः प्रती यमानेवस्तुरूपेविरोधासिद्धेः। सामान्यविशेषवच्चित्रंचित्रपटस्येकचित्ररूपवद्वा। किंच। एकांतवाद्यप्यन्यस्तद्धेतोःसाध्यं तान्नच र्किसामान्यं। आहोस्विदनुभयं। उतोभयंपरस्परविविक्तंउतश्चिदनुभयमितिविकल्पाः। नतावत्सामान्यंकेवलंस्वतस्तस्यसं भवार्थक्रियाकारित्ववैकल्यात्। नापिविशेषः। तस्याननुयायितेनसाध्यसिद्धुमशक्यत्वात्। नाप्युभयमुभयदोषानति रेकेः। नाप्यनुभयंतस्यासतोहेत्वव्यापकत्वेनसाध्यसाधनायोगात्। तस्मात्स्वाश्रयीभूतसामान्यविशेषोभयात्मकसा

ध्यधर्मस्यसाध्यधर्मिणिसाधनायान्योन्यानुविद्धान्वयव्यतिरेकस्वभावदूयात्मकैकहेतोः प्रदर्शनेकृतोपिनैकांतपक्षोक्त दोषावकाशः संभवी। अतोनैकांतात्मकंहेतुस्वरूपंचावश्यमंगीकर्तव्यं। अन्यथासकलानुमानेषुसाध्यसाधनानांदुरूप्या यत्नछेदएवभवेत्। तस्माद्योएकांतवादिनोनिजपक्षाभिमानत्यागेप्यविषादिनोऽक्षीणानिमील्यबुद्धिदृशमुन्मील्य मध्यस्थतयायुक्त्यनुसारेकप्रवृत्यात्तत्त्वंजिज्ञासंतोभवंतोनैकांतेकांतविचारयंतु। प्रमाणैकमूलसकलयुक्तियुक्तंप्रा गुक्तानिरवद्यदोषाविप्रमुक्तंतत्तत्त्वंचाःस्थिगछंतु। इतिपरहेतुतमोभास्करलघुसमंतभद्रस्वामिवादिवेतालश्रीशांतिसूरिपादैः कृतंतत् :सिद्धं सर्वदर्शनसंमतमनेकांतमतं॥५७॥ ॥अथजैनमतंसंक्षिपन्नाह॥ ॥जैनदर्शनसंक्षेपस्त्वेषमार्हतोनयः॥पूर्वापर पराघातोयत्रक्वापिनविद्यते॥५८॥जैनदर्शनस्यसंक्षेपोविस्तरस्यागाधत्वेनवक्तुमशक्यत्वादुपयोगसारः समास इत्यमु नोक्तप्रकारेणेषप्रत्यक्षोगादर्हतोभिहितोनयोनिर्दूषणः सर्वैवक्तव्यस्यसर्वतमूलत्वेदोषकालुष्यानवकाशात्। यत्रजैन दर्शनेक्वापिक्वचिदपिजीवाजीवादिस्वरूपविचारणाविषयसूक्ष्ममतिचर्चायामपिपूर्वापरयोः पूर्वपश्चाद्भाभिहितयोः परघातः परस्परव्याहतत्वंनविद्यते। अयंभावः। यथाअपरदर्शनसंबंधिषुमूलशास्त्रेष्वपिकिंपुनः पश्चात्याविप्रलंभकग्रथि तग्रंथेषुकथाप्रथमपश्चाद्भाभिहितयोरर्थयोर्विरोधोदृश्यते। तथाजैनदर्शनेक्वापिकेवलिप्रणीतद्वादशांगेषुपारंपर्यग्रंथेषुव सुसंबंधार्थत्वात्सूक्ष्मेक्षिकयाविचार्यमाणेषुकिंचिदपिविसंवादोनास्ति। यत्पुपरदर्शनेषुक्वचनसद्दृष्टयद्दृष्टयंगमानिवचनानिकानिचि दाकर्ण्यतेमत्तान्यविज्ञानोन्मूलकसंधुसमुद्भूतानीवसंगरंगमुधास्वात्मानंबदुमन्वते। यत्श्रीसिद्धसेनपादाः। सुनि श्चितंनःपरतंत्रयुक्तिषु स्फुरंतियाःकश्चनसूक्तिसंपदः। तवैवताःपूर्वमहार्णवोत्थिताजगत्प्रमाणंजिनवाक्यविप्रुषः ॥ ३ ॥ अत्रपरेप्राहुः। अर्हद्भ्योर्हताअर्हद्भिर्भूतततत्वानुरागिभिर्भुक्तिमुक्तिभिरद्यसंबद्धमेवाविर्भावयंबभूवे। यदु तास्मद्दर्शनेष्वपिपूर्वापरयोर्विरोधोस्तीतिन श्लक्ष्मन्मते सूक्ष्मेक्षणेरीक्षमाणापिविरोधलेशमपिक्वचननिरीक्ष्यतेऽ तत्कथंकस्यचिन्मतेविरोधवत्तामितिचेत्। उच्यते। भोः स्वमतपक्षपातंपरिहृत्यमाध्यस्थमवलंबमानैः धीप्रधानैः प्रतिभा सेर्यधवधानंवदद्भिर्निशम्यते। तदावयंभवतांसमक्षंदर्शयामः। तथाहि। प्रथमंतावन्नथागतसंमतेमतेपूर्वापरवि रोधउद्भाव्यते। पूर्वंसर्वक्षणभंगरमभिधायपश्चादेवमभिदधे। नाननुभूतान्वयव्यतिरेकंकारणंनाकारणंविषय

इति।

अस्यायमर्थः। ज्ञानमर्थसत्त्वेनोत्पद्यते। नपुनरसति। स्यादनुकूलान्वयव्यतिरेकोऽर्थोज्ञानस्यकारणं। यतश्चार्थाज्ज्ञानमुत्पद्यते।
तमेवतद्विषयीनकरोतीति। एवंचाभिधानोनार्थस्यक्षणद्वयंस्थितिरभिहिता। तद्यथा। अर्थात्कारणाज्ज्ञानंकार्यंजायमानं
द्वितीयेक्षणेज्ञायते। ननुसममसमयेकारणकार्ययोः समसमयत्वायोगात्। तज्ज्ञानंस्वजनकमेवार्थंगृह्णाति। नापरंनाकारणं। विषयवृतिवचनात्। तथाचार्थस्यक्षणद्वयंस्थितिर्बलादायाता। साचक्षणक्षयेणविरुद्धेतिपूर्वापरविरोधः। १। तथा
नाकारणंविषयःयुक्तायोगप्रत्यक्षस्यातीतानागतादिरप्यर्थोविषयोऽभ्युपेयः। अतीतानागतश्चाविद्यमानोनपपन्नत्वेनत
स्यकारणंनभवेत्। अकारणमपिचतंविषयतयाभिदधास्यपूर्वापरविरोधःस्यात्। २। साध्यसाधनयोर्व्याप्तिग्राहकस्यज्ञान
स्यकारणत्वाभावेपित्रिकालगतमर्थंविषयंव्याहरमाणस्यकथंनपूर्वापरव्याघातोकारणस्यप्रमाणविषयतानाभ्युपगमात्। ३। तथाक्षणक्षयाभ्युपगमेऽन्वयव्यतिरेकयोर्भिन्नकालयोः प्रतिपत्तिर्नसंभवति। ततः साध्यसाधनयोस्त्रिकालविष
यंव्याप्तिंगृह्णतोनुमानस्यकथंपूर्वापरव्याहृतिः। ४। तथाक्षणक्षयमभिधेयंयदतःएकनवतेःकल्पेशूत्पत्तौपुरुषोहतः। तेन
र्मविपाकेनपादेविद्धोस्मिभिक्षवः। १। इत्यत्रश्लोकेऽतीतानागतविषयेमेऽस्मिन्नाद्ययोः प्रयोगंक्षणद्वयविरुद्धंब्रुवाणस्यबु
द्धस्यकथंनपूर्वापरविरोधः। ५। तथानिरंशंसर्ववस्तु प्राग्प्रोच्यादृंसाविरतिदानचित्तसंवेदनंस्वगतंसद्रव्यचेतनत्व
स्वर्गप्रापणशक्त्यादिकंगृह्णद्रूपिस्वगतस्यसद्रव्यत्वादेरेकस्यांस्यानिर्णयमुत्पादयति। नपुनः स्वगतस्यापिद्वितीय
स्यस्वर्गप्रापणशक्त्यादेरंशस्यतिसंवृत्तं पश्चाद्दृतःसौगतस्यकथंपूर्वापरविरुद्धंवचोनस्यात्। ६। एवंनिर्वर्त्यकम
ध्यक्षंभोक्तृकस्यवस्तुनः सामस्त्येनग्रहणंकुर्वाणमपिनीलाद्यंशेनिर्णयमुत्पादयति। नपुननर्मूलार्थगतेक्षणक्ष
येंशेस्थितिसंवृतामपिदधतः सौगतस्यपूर्वापरवचोविरोधः सुबोधएवच। ७। तथाहेतोस्त्रिरूपंसंवृत्यस्यचोद्भवद्
यात्मकतामभिदधानोपिससंवृंवस्तुयन्नमन्यते। तदपिपूर्वापरविरुद्धं। ८। तथापरस्परमनाश्लिष्टाएवाणवः प्रत्या
सन्निभाजः समुदिताघटादिरूपतयाप्रतिभासंते। नपुनरन्योन्यमंगांगिभावरूपेणारब्धरूंधकार्यास्ते। स्थितिर्द्वयो
र्दुमते। तत्रचामीदोषाः परस्परमणूनामनाश्लिष्टत्वात्परस्परदेशेदृश्येनधार्यमाणेऽन्यस्यघटस्यधारणंनस्यात्। इत्ये
वमक्षेपाकर्षाश्चतथैवनभवेयुः। धारणादीनिचघटस्यार्थक्रियारूपंसत्वमंगीकुर्वाणैः सौगतैरभ्युपगतान्येव।

तानिचतन्मतेनोपपद्यन्ते। ततोभयतिपूर्वापरयोर्विरोधः। ९। अथनैयायिकवैशेषिकमतयोः पूर्वापरव्याहृतत्वंदर्श्यते।
सत्तायोगः सत्तमित्युक्तासामान्यविशेषसमवायानांसत्तायोगमंतरेणापिसद्भावंभाषमाणानांकथंनव्याहृतंवचोभ
वेत्। १। ज्ञानंस्वात्मानंनवेत्ति। स्वात्मनिक्रियाविरोधादित्यभिधायेश्वरज्ञानंस्वात्मनिक्रियाविरोधाभावेनस्वसंवेदितमि
छतांकथंनस्ववचनाविरोधः। २। प्रदीपोव्यात्मानमात्मनैवप्रकाशयन्स्वात्मनिक्रियाविरोधंव्यत्याकरोति। ३। परंच
नात्मकान्यपिछलज्ञानानिअरूपाणिनित्यरूपतयोपदिशतोऽक्षपादर्षेर्वैशेषिकव्यावर्णनंनसमः प्रकाशात्मकताप्रख्या
पनमिषकथंनव्याहन्यते॥ ४। आकाशस्यनिरवयवत्वंस्वीकुर्वतः गुणःशब्दस्तद्देकदेशेनएवश्रूयतेनसर्वत्रेति। सावय
वतांशब्दस्यकथंनविरोधः। ५। सत्तायोगः सत्वं। योगश्चसर्वैर्वैशेषिकैः सांगृतायामेवभवति। सामान्यंचनिरंशमेक
मभ्युपगम्यते। ततः कथंनपूर्वापरव्याहृतिः। ६। समवायोनित्यएकस्वभावश्चेष्यते। सर्वैः समवायिभिसंबंधश्चनेत्य
तेनत्तायमानोनेकस्वभावतायामेवभवति। तथाच। पूर्वापरविरोधः सुबोधः। ७। अर्थवत्प्रमाणमित्यत्रार्थः सद्
कारीयस्य। तदर्थवत्प्रमाणमित्यभिधाययोगिप्रत्यक्षमतीताद्यर्थविषयमभिधानस्यपूर्वापरविरोधःस्यात्। अती
तादेः सद्कारित्वायोगात्। ८। तथास्मृतेरगृहीतग्राहित्वेनप्रमाणमिष्यते। अनर्थजन्यत्वेनगृहीतग्राहित्वेनस्मृतेरप्रमा
ण्यंधारावाहिज्ञानानामपिगृहीतग्राहित्वेनाप्रामाण्यप्रसंगः। नचधारावाहिज्ञानानामप्रमाण्यंनव्याप्तिकत्वेनोक्तं
स्वीक्रियते। अनर्थजन्यत्वेनतुस्मृतेरप्रमाण्यंतानागतादिविषयस्यानुमानस्याप्यनर्थजन्यत्वेनाप्रामाण्यंभवेत्।
त्रिकालविषयंचानुमानंशास्त्रादिष्यते। धूमेनाहितवर्तमानोऽग्निरनुमीयते। मेघोन्नत्याभविष्यंतंवृष्टेः नरीपूरे
णवर्षंभविष्यतीति। तदेवंधारावाहिज्ञानेरनुमानेनचस्मृतेः सादृश्येसत्यपियत्स्मृतेरप्रमाण्यंधारावाहिज्ञानानांच
प्रामाण्यमिष्यते। सपूर्वापरविरोधः। ९। ईश्वरस्यसर्वार्थविषयंप्रत्यक्षंइंद्रियार्थसंनिकर्षानपेक्षमिष्यते। अस्मदादेश्च
इंद्रियार्थसंनिकर्षंविनेयदाद्रियार्थसंनिकर्षानपेक्षं। तादृंद्रियार्थसंनिकर्षंविनेज्ञानमन्यपदेश्यमित्यत्रसूत्रेसंनि
कर्षपदानंनिरर्थकंभवेत्। ईश्वरप्रत्यक्षस्यसंनिकर्षंविनापिभावात्। अथेश्वरप्रत्यक्षमींद्रियार्थसंनिकर्षोत्पन्न
मेवाभिप्रेयतेऽतश्चेत्। उच्यते। तर्हीश्वरसंबंधिमनसोऽणुपरिमाणत्वात्। युगपत्सर्वार्थैः संयोगोनभवेत्। ततश्चे

कमर्थस्यसंवेत्ति। तदानापरान्सतोऽप्यर्थान्। ततोस्मदादिवज्जनस्यकदापिसर्वज्ञता। युगपत्संनिकर्षासंभवेनसर्वार्थानांयु
गपद्ग्रहणात्। अथसर्वार्थानांक्रमेणसंवेदनात्सर्वज्ञतेत्युच्येत बहुनाकालेनसर्वार्थसंवेदनस्यरंडापरश्चाविवास्मदादिष्व
पिसंभवात्तेपिसर्वज्ञाः प्रसज्येरन्। अपिच। अतीतानागतानामर्थानांविनष्टानुत्पन्नतारेवमनसासंनिकर्षोनभवेत्। सतामे
वसंयोगसंभवात्तेषांचतदानीमसत्वात्। ततः कथमदृश्वरस्यतानमतीतानागतार्थग्राहकंस्यात्। सर्वार्थग्राहकंचतत्तानमि
ष्यते। ततः पूर्वापरविरोधः सुबोधः। एवंयोगिनामपि सर्वार्थसंवेदनंदुर्धरविरोधरूढमवबोद्धव्यं॥१०। कार्यद्रव्येप्रागुत्प
त्तेसतितस्यरूपंपश्चादुत्पद्यते। निराश्रयरूपस्यगुणत्वात्प्रागनुत्पादेति पूर्वमुक्तापश्चाच्चकार्यद्रव्येविनष्टेसतितद्रूपंवि
नश्यतीत्युच्यमानंपूर्वापरविरुद्धंभवेत्। यतोऽरूपंकार्येविनष्टेसतिनिराश्रयंकथंतत्पश्चाद्विनश्येदिति॥११। सांख्यस्य
तेवंस्ववचनविरोधः। प्रकृतिर्नित्यैकानिरवयवानिष्क्रियाव्यक्तावेष्यते। सेवांनित्यादिभिर्महदादिभिर्विकारैः परिणमते
। इतिचाभिधीयते। तच्चपूर्वापरतोऽसंबद्धं॥१॥ अथाध्यवसायस्यबुद्धिव्यापारत्वाच्चेतनाविषयपरिच्छेदरहितार्थनबुध्यते
। इत्येतत्सर्वलोकप्रतीतिविरुद्धं॥२। बुद्धिर्महदाख्याज्ञानाकमपिचेतयतेइत्यपिस्वपरप्रतीतिविरुद्धं॥३। आकाशादिभूतपं
चकंशब्दादितन्मात्रेभ्यः सूक्ष्मसंज्ञेभ्यउत्पद्यतेयदुच्यते। तदापानित्यैकांतवादेपूर्वापरविरुद्धंकथंश्रद्धेयं॥४॥ यथापुरुषस्य
कूटस्थनित्यत्वान्नविक्रियाभवेत्। नाधिबंधमोक्षौ। तथाप्रकृतेरपिनसंभवंति। कूटस्थनित्यत्वादेव। कूटस्थनित्यंचैकस्वभावमि
ष्यते। ततोयेप्रकृतेर्विक्रियाबंधमोक्षौचाभ्युपगम्यते। परस्परेतेनित्यत्वंच। परस्परविरुद्धानि। मीमांसकस्यपुनरेषसम
तोविरोधः। नाहिंस्यात्सर्वभूतानीतिप्रथममुक्त्वापश्चान्नरकंप्रतिपादितमेवं। षट्पशवोनियुज्यंते। पशूनांमध्यमेदृनि।
अश्वमेधस्यवचनान्यूनानिपशुभिस्त्रिभिः॥१॥ तथाअग्नीषोमीयंपशुमालभेत। सप्तदशप्राजापत्यान्पशूनाल
भेतेत्यादिवचनानिकथमिवनपूर्वापरविरोधमनुरुध्यंते। २॥ तथान्नतभाक्षणंप्रथमंनिषिध्यपश्चादुक्तं। ब्राह्मणा
र्थेऽनृतंब्रूयादित्यादि। तथा। नर्मयुक्तंवचनंहिनास्ति। नस्त्रीषुराजन्नाविवाहकाले। प्राणात्ययेसर्वधनापहारे। पंचानृता
न्याहुरपातकानि। २॥ तथाअदत्तादानमनेकधानिरस्यपश्चादुक्तं। यद्यपिब्राह्मणोदृढेनपरकीयमादत्तेछलेनवा॥
तथापितस्यनादत्तादानं। यतःसर्वैर्मिर्ब्राह्मणेभ्योदत्तं। ब्राह्मणास्तुदौर्बल्यात् दृषत्काः परिभुंजते। तस्मादपह्

नौ

रन्ब्राह्मणः स्वमादत्तेस्वमेवब्राह्मणोभुंक्तेस्वंवस्तेस्वंददातीति॥३॥ तथाअपुत्रस्यगतिर्नास्ति। द्यौरपित्वोक्तं अनेकानिसह
स्राणिकुमारब्रह्मचारिणं। दिवंगतानिविप्राणामकृत्वाकुलसंततिं॥५॥ तथानमांसभक्षणेदोषो नमद्येनचामेथुने प्रवृ
त्तिरेषाभूतानांनिवृत्तिस्तुमहाफला॥१॥ इतिस्मृतिगतेश्लोकेयादृच्छयाप्रवृत्तिर्नदोषातदाकथंततोनियमेनतत्फलेति॥
इतिस्मृतिगतेश्लोकेयादृच्छयाप्रवृत्तिर्महाफलेतिव्याहृतमेतत्॥५॥ वेदविहिताहिंसाधर्महेतुरित्यत्रप्रकरणवचनविरोधः।
तथाहि। धर्महेतुश्चेदहिंसाकथं। हिंसाचेदधर्महेतुः। कथंनाहिभवति। माताचवंध्याचेति॥६॥ धर्मस्यचलक्षणमिदमुच्यते
। श्रूयतांधर्मसर्वस्वं। श्रुत्वाचैवावधार्यतां। आत्मनः प्रतिकूलानिपरेषांनसमाचरेत्॥१॥ इत्यादि। अत्रैवमार्गेप्रवर्त्तयितुं
वादिभिर्गर्हितावेयंहिंसा॥ अंधेतमसिमज्जामः पशुभिर्ये यजामहे॥ हिंसानामभवेद्धर्मोनभूतोनभविष्यति॥१॥ इति॥७॥
तथाभवांतरंप्राप्तानांतत्रयेचश्राद्धादिविधानं तदप्यविचारितरमणीयं। तथाच। तद्यथाह्यनेःपठंति॥ मृतानामपिजंतू
नांश्राद्धंचेत्तृप्तिकारणं। तन्निर्वाणस्यदीपस्यस्नेहःसंवर्धयेत्तिरवां॥१॥ इतिर्॥ ॥ एवमन्यान्यपिपुराणोक्तानिपूर्वापरवि
रुद्धानि। संदेहसमुच्चयशास्त्रादावतार्थवक्तव्यानि। तथानित्यपरोक्षज्ञानवादिनोभट्टाः स्वात्मनिक्रियाविरोधात्
। ज्ञानंस्वप्रकाशाकमभ्युपगच्छंतः। प्रदीपस्यपरंप्रकाशकमनंगीकुर्वंतश्चकथंसद्भूतार्थभाषिणः। तथाब्रह्माद्वैतवादिनो
विद्याविद्वैकेनसन्मात्रप्रत्यक्षात्प्रतिनियंतोपिनानिषेधंप्रत्यक्षमितिब्रुवाणाः। कथंनाविरुद्धवादिनोविद्याविद्वासे
नसन्मात्रस्यग्रहणात्॥१॥ तथापूर्वोत्तरमीमांसावादिनः कथमपिहेवमनंगीकुर्वाणा आपसर्वापज्ञावित्सुमहेश्वरादि
नदेवान्पूजयंतोध्यायंतोवास्तुवंतः। तदापिपूर्वापरविरुद्धं॥१०॥ इत्यादि। अथवायेयेबौद्धादिदर्शनेषुस्याद्वाद्यु
पगमाः प्राचीनश्लोकव्याख्यायांप्रदर्शिताः। तेसर्वेपिपूर्वापरविरुद्धतयाऽग्राह्यसर्वदर्शनेषुयथास्वंदर्शयितव्या॥
यतोबौद्धादयोऽनेकप्रकारेणस्याद्वादंस्वीकुर्वतोपितन्निराकरणायचयुक्तीः स्फोरयंतः। पूर्वापरविरुद्धवादिनः कथंभवे
युः। कथंतोवादधमाषभोजनात्सूक्ष्माविपद्यंते॥ इत्युपरम्यते। चार्वाकस्तुवराकः। आत्मतद्गाश्रितधर्माधर्मानै
कांतसर्गाद्दंसर्वंकुग्रहग्रहिलतयेवाप्रतिपद्यमानोऽवश्योपहूतएवकर्तव्यो नपुनस्तंप्रत्यनेकांताभ्युपगमोपन्या
सेनपूर्वापरोक्तविरोधप्रकाशनेनवा। किमपिप्रयोजनंसर्वस्यतदुक्तस्यसर्वलोकशास्त्रैः सहविरुद्धत्वादमूर्तेभ्यो

भूतेभ्यो मूर्तचैतन्योत्पद्यस्यविरुद्धत्वाद्भूतेभ्यउत्पद्यमानस्यान्यतआगच्छतोवाचैतन्यस्यादर्शनात्उत्पत्तिवच्चैतन्यस्यापि। एंद्रियकप्रत्यक्षाविषयत्वादित्यादिततदेवंवीधादीनामन्येषांसर्वेषामागमाः प्रच्युतस्वप्रणेतृणामसर्वज्ञत्वमेवसाधयंति। नचुनःसर्वज्ञमूलतां। पूर्वापरविरुद्धार्थवचनोपेतत्वात्। जैनमतंतु सर्वं पूर्वापरविरोधाभावात्स्वस्यसर्वज्ञमूलतामेवावेदयंतीतिस्थितं॥ अथानुक्रमप्राप्तंक्रमप्राप्तिरुच्यते। प्राप्यकारीण्येवेंद्रियाणीतिकृत्वाभिक्षाक्षपादमीमांसककणादसांख्याः समारभ्यंते। चक्षुःश्रोत्रेतराणितथेतितथागताश्चक्षुर्वर्जानीति। स्याद्वादावदातहृदयाः। श्वेतांबराणांसंमतिर्नयचक्रवालः स्याद्वादरत्नाकरोरत्नाकरावतारिका। तत्रार्थः प्रमाणवार्तिकंप्रमाणमीमांसान्यायावतारोऽनेकांतजयपताकाअनेकांतप्रवेशोधर्मसंग्रहणी। प्रमेयरत्नकोशश्चेत्येवमादयोनेकेतर्कग्रंथाः। दिगंबराणांतुप्रमेयकमलमार्तंडोन्यायकुमुदचंद्रः। आप्तपरीक्षाःषट्सहस्रीसिद्धांतसारोन्यायविनिश्चयटीकाचेत्यादयः॥ ५८॥ ॥ इतितपागणनभोंगणादित्यमाणश्रीदेवसुंदरभूरिपदप्रापज्ञावश्रीगुणरत्नसूरिविरचितायांतर्करहस्यदीपिकायांषड्दर्शनसमुच्चयटीकायांजैनमतस्वरूपनिर्णये चतुर्थोऽधिकारः॥ ॥ अथवैशेषिकमतंविवक्षयाप्राह॥ देवताविषयेभेदोनास्तिनैयायिकैः समं। वैशेषिकाणांतत्वेषविद्यतेसोनदृश्यते॥ ५९॥ अस्यलिंगविषयाचारदेवादिनैयायिकप्रस्तावेप्रसंगेषप्रागेवप्रोच्चानं॥ मुनिर्विशेषस्यकापोतीवृत्तिमनुष्ठितवतोरथ्यानिपतितांस्तंदुलकणानादायरूक्षाहारःस्याद्वारनिमित्तात्कणादइतिसंज्ञाऽजनि॥ तस्यकणादस्यमुनेःपुरःशिवोलूकरूपेणमतमेतत्प्रकाशितं॥ ततउलूकंप्रोच्यते। पशुपतिभक्तत्वेनपाशुपतंचोच्यते। कणादस्यौलूक्यत्वेनवैशेषिकाःकाणादाभण्यंते॥ आचार्यःस्यच्चप्रागभिधाने॥ परिकरइतिनामसमाम्नायते। अथप्रस्तुतंप्रस्तूयते॥ देवएवदेवता। तद्विषयेभेदोविशेषोवैशेषिकाणांनैयायिकैः समंनास्ति॥ एतेनयादृक्विशेषणईश्वरोदेवोनैयायिकैरभिप्रेतः। तादृग्विशेषणःसएववैशेषिकाणांनैयायिकाणामपिरेवइत्यर्थः। तत्तेतुतत्त्वविषयेपुनर्विद्यतेभेदः। असौतत्त्वविषयोभेदोनदृश्यते॥ ५९॥ नमेवाह॥ द्रव्यंगुणस्तथाकर्मसामान्यंचचतुर्थकं॥ विशेषसमवायोच्चततषट्कंतुतन्मते॥ ६०॥ ॥ द्रव्यंप्रथमंतत्वं गुणाद्वितीयं। तथानुद्भेदांतरसूचनेनकर्मतृतीयं। सामान्यंचचतुर्थमेवचतुर्थकं। स्वार्थेकप्रत्ययः। विशेषसम

यश्चोच्चपंचमषष्ठेतसेऽभयत्रचकारोसमुच्चयार्थौ। तुशब्दस्यावधारणार्थत्वे। तत्षड्भेवनन्यूनाधिकं। षडेवपदार्थाइत्यर्थः। तन्मतेवैशेषिकमतेअत्रपदार्थषट्केद्रव्याणिगुणाश्चकेचिन्नित्याएव। केचित्तानित्याएवकर्मनित्यमेव। सामान्यविशेषसमवायास्तुनित्याएवेति। केचित्तभावंससमंपदार्थमाहुः॥ ६०॥ ॥ अथद्रव्यभेदानाह॥ तत्रद्रव्यंनवधा। भूजलतेजोनिलांतरिक्षाणिकालदिगात्ममनांसिच। गुणःपुनःपंचविंशतिधा॥ ६१॥ तत्रतेषुषट्सुपदार्थेषुद्रव्यंनवधा॥ अवछेदकलंबाक्षमितिन्यायान्नवधैव। ननुन्यूनाधिकप्रकारं। अत्रद्रव्यमितिज्ञात्यपेक्षमेकवचनं। एवंभागग्रेचवक्ष्येयं। ततोनवैवद्रव्याणीत्यर्थः। एतेनछायातमसीआलोकाभावरूपत्वान्नद्रव्ये। भवतद्रव्यमुक्तं। भूः पृथिवीकठिन्यलक्षणामृत्साषाणवनस्पतिरूपा॥ १॥ जलमापः तच्चसरित्समुद्रकरकादिगतं॥ २॥ तेजोग्निः तच्चतुर्धा। भौमंकाष्ठेंधनप्रभवं। दिव्यंसूर्यविद्युदादिजं। आकरपरिणामहेतुरुदर्यभाकारजंसुवर्णादि॥ ३॥ अनिलोवायुः॥ ५॥ एतानिचत्वार्यनेकविधानि। अंतरिक्षमाकाशंतच्चैकंनित्यममूर्तंविभुचद्रव्यं। विभुशब्देनविश्वव्यापकः। दृश्यंचशब्देनलिंगेनावगम्यते। आकाशगुणत्वाच्छब्दस्यषष्ठंहेभूजलतेजोनिलांतरिक्षाणि। कालः परापरव्यतिकरयतिकरायोगपद्ययोगपद्यचिरक्षिप्रत्वयत्किंगोद्रव्यं। तथाहिपरःपिताऽपरःपुत्रो। युगपद्युगपद्वा। तथाचिरंक्षिप्रंकृतंकरिष्यतेचेति। यत्परापरादिज्ञानं। तदादित्यादिक्रियाद्रव्यव्यतिरिक्तपदार्थनिबंधनं। तत्प्रत्ययविलक्षणत्वात्। घटादिप्रत्ययवत्। योस्यहेतुःसपरिशेषात्कालः॥ सचैकोनित्योमूर्तोविभुर्द्रव्यंच॥ ६॥ दिगपिद्रव्यमेकानित्यामूर्तोविभुश्चमूर्तेष्वेवद्रव्येषु। मूर्तद्रव्यमवधिंकृत्वे। इदमस्मात्पूर्वेण दक्षिणेनपश्चिमेनोत्तरेण। पूर्वदक्षिणेनदक्षिणापरेण। परेणोत्तरेणोत्तरपूर्वेणाधरतउपरिष्टात्इत्यमी। इत्थंप्रत्ययायतोभवंति। साद्दिगिति। एतस्याश्चैकत्वेपिप्राच्यादिभेदेननानात्वं। कार्यविशेषात्व्यवस्थितं॥ ७॥ आत्मानोद्वेधा। नैकानित्योमूर्तोविभुर्द्रव्यंच॥ ८॥ मनश्चिनं। तच्चनित्यंद्रव्यमणुमात्रमनेकमाशुसंचारिप्रतिशरीरमेकंच। युगपज्ज्ञानानुत्पत्तिर्मनसोलिंगं॥ आत्मनोहिसर्वगतत्वात्युगपदनेकेंद्रियार्थसंनिधानेसत्यपिक्रमेणैवज्ञानोत्पत्युपलंभान्नुमीयते। आत्मेंद्रियार्थसंनिकर्षेभ्योव्यतिरिक्तंकारणांतरंमनोस्तीति। यस्यसंनिधानात्तज्ञानानामुत्पत्तिरसंनिधानाच्चानुत्पत्तिरिति॥ तस्यचमनसोमृतशरीरान्निर्गतस्यमृतशरीरप्रत्यासंनमदृष्टवशादुपजातक्रियेणभिर्द्रणकादिक्रमेणाद्यधमतिस

क्षमनुपलब्धियोग्यंशरीरंसंक्रम्येवस्वर्गादियोगतस्यस्वर्गाद्युपभोग्यशरीरेणसंबंधोभवति। केवलस्यचेतावद्गंगातिर्नस्यात्।
तच्चमरणजन्मनोरंतरालगतंशरीरंमनसः स्वर्गनरकादिदेशंप्राप्तवदनधर्मकृत्वा दातिवाहिकमित्युच्यते॥८॥ ततोदूढेकाल
दिगात्ममनांसित्वः समुच्चये॥ तत्रपृथिव्यपतेजोवायुरित्येतच्चतुःसंख्यंद्रव्यंप्रत्येकंनित्यानित्यभेदात्द्विप्रकारं। तत्रपरमाणु
रूपंनित्यंसदकारणवन्नित्यमितिवचनात्। तदारब्धंतुद्व्यणकादिकार्यद्रव्यमनित्यं। आकाशादिकंनित्यमेवानुत्पत्तिमत्वात्॥
ण्यांचद्रव्यत्वाभिसंबंधाद्द्रव्यरूपता द्रव्यत्वाभिसंबंधश्च। द्रव्यत्वसामान्योपलक्षितः समवायः। तत्समवेतंवासामान्यं। एतः
द्रव्यत्वाभिसंबंधादितरेभ्योव्यवच्छेदकमेषांलक्षणं। एवंपृथिव्यादिभेदानामपिपाषाणदीनांपृथिवीत्वाभिसंबंधा
दितरेभ्यःपादिभ्योभेदव्यवहारहेतुर्द्रष्टव्यं। अभेदश्चतांत्वाकाशकालदिग्द्रव्याणामनादितश्छब्दाद्याश्रयता द्र
ष्टव्या। इदंचनवविधमपिद्रव्यंसामान्यतोद्वेधा॥ अद्रव्यंद्रव्यं। अतेकद्रव्यंचद्रव्यं। तत्राद्रव्यमाकाशकालदिगात्ममनः प
रमाणवः। कारणद्रव्यानारब्धत्वात्। अनेकद्रव्यंतुद्व्यणकादिस्कंधाः। तत्रचद्व्यणुकंपरमाणुभ्यांकार्यद्रव्येआरब्धेअणुरिति
व्यपदेशः। परमाणुद्व्यारब्धस्यद्व्यणुकस्याणुपरिमाणत्वात्। त्रिचतुरैः परमाणुभिरारब्धस्यापिकार्यस्यापिणुपरिमाणते
वस्यात्। परंत्रिचतुरव्यपदेशेनस्यात्। त्रिभिर्द्व्यणुकैश्चतुर्भिर्वारब्धेत्र्यणुकमितिव्यपदेशः। ननुद्व्याभ्यांद्व्यणुकाभ्यामार
ब्धे। द्व्याभ्यामारब्धस्यमहत्वेनस्यात्। त्र्यणुकंचद्रव्यमुपलब्धियोग्यमिष्यते। ततश्चायंदोषोरब्धेत
रद्रव्योत्पत्तिर्हेतवः। गुणःपुनः पंचविंशतिधास्पर्शः॥ ६१॥ ॥ गुणस्यपंचविंशतिविधत्वमेवाह। स्पर्शरसरूपगंधाः
संख्यापरिमाणपृथक्त्वसंयोगविभागसंयोगाः। परिमाणंचद्विधंपरत्वंतथाऽपरत्वंचेति॥ ६२॥ बुद्धिःसुखदुःखेच्छा धर्माधर्मप्रयत्नसं
स्काराः। द्वेषःस्नेहगुरुत्वे द्रव्यत्वेवेगोगुणाएते॥ ६३॥ ॥युग्मं॥ स्पर्शस्त्वगिंद्रियग्राह्यः। पृथिव्युदकज्वलनपवनवृत्तिः। र
सोरसनेंद्रियग्राह्यः पृथिव्युदकवृत्तिः॥ चक्षुर्ग्राह्यंरूपं पृथिव्युदकज्वलनवृत्ति। तच्चरूपंजलपरमाणुतेजः परमाणुषुवायु
परमाणुषुचानित्यं। पार्थिवपरमाणुरूपस्यत्वग्निसंयोगेविनाशकः। सर्वेकार्येषुचकारणरूपपूर्वंकरूपमुत्पद्यते। उत्प
न्नेषुद्व्यणुकादिकार्येषुपश्चात्तत्ररूपोत्पत्तिः निराश्रयस्यकार्यरूपस्यानुत्पादात्। तथाकार्यरूपविनाश्यास्याश्रयविना
शएवहेतुः॥ पूर्वंद्रव्यकार्यद्रव्यस्यनाशस्तदनुचरूपस्यप्रभुभावाच्चक्रमस्याग्रहणमिति। ३। गंधोघ्राणग्राह्यः पृथिवीवृ
त्तिः

स्पर्शरहितश्चगुणत्वेसतितद्गंद्रव्यग्राह्यादिलक्षणमिति तत्रव्यवच्छेदकं। ५। शब्दःश्रोत्रेंद्रियग्राह्यो गगनवृत्तिः क्षणिकश्चश्रो
त्रेंद्रियंचाकाशात्मकं। अथाकाशेनित्यवेद्रमात्मीयंश्रोत्रमितिचपरकीयमितिविभागः कथमितिचेदुच्यते। यदीय
धर्माधर्माभिसंस्कृतकर्णशष्कुल्यावरुद्धंयन्नभसस्तत्तस्यश्रोत्रमितिविभागः। अतएवनासिकादिरंध्रांतरेणनशब्दोप
लंभः संजायते। तत्कर्णशष्कुलीविघातात्बाधिर्यादिकंचव्यवस्थाप्यतेइति॥ ५॥ संख्यात्वेकादित्वनद्वारहेतुरेकत्वाद्वि
लक्षणासापुनरेकद्रव्यावानेकद्रव्याच्च। तत्रैकसंख्यैकद्रव्या। अनेकद्रव्यातुद्वित्वादिसंख्या। तत्रैकद्रव्यायाः सहिला
दिपरमाण्वादिगतरूपादीनामिवनित्यानित्यत्वनिष्पत्तयः। अनेकद्रव्यायास्त्वेकत्वेभ्योऽनेकविषयबुद्धिसहितेभ्योनिष्प
त्तिः अपेक्षाबुद्धिविनाशाच्चविनाशः। क्वचित्तदाश्रयाविनाशादपि। ६॥ प्राप्तिपूर्वकाप्राप्तिर्विभागः। अप्राप्तिपूर्विकाः
चप्राप्तिः संयोगः। एतेचद्रव्येषुयथाक्रमंविभक्तसंयुक्तप्रत्ययहेतू अन्यतरेभयकर्मजोसंयोगविभागजोचयथा
क्रमं॥ ८॥ परिमाणव्यवहारकारणंपरिमाणं। तच्चतुर्विधं। महदणुदीर्घह्रस्वंच। तत्रमहत्द्विविधंनित्यमनित्यंच। नि
त्यमाकाशकालदिगात्मसुपरममहत्। अनित्यंतुद्व्यणुकादिद्रव्येषु। अण्वपिनित्यानित्यभेदात्द्विविधं। परमाणुमन
स्सुपरिमंडल्यरूपस्पर्शनित्यं। अनित्यंद्व्यणुकेष्व। बदरामलकबिल्वादिषुबिल्वामलकबदरादिषुचक्रमेणयथोत्तरं
महत्वस्याणुत्वस्यचव्यवहारोगौणः भक्तोवसेय। आमलकादिषुभयस्यापिव्यवहारात्। एवमिक्षौसर्षपेवंशाद्यपे
क्षयाह्रस्वत्वदीर्घत्वयोर्भक्तंज्ञेयं। ननुमद्दीर्घत्वयोर्द्व्यणुकादिषुवर्तमानयोर्द्व्यणुकेचाणुत्वह्रस्वत्वयोः कोविशेषो।
महत्सुदीर्घमानायतं। दीर्घेषुमहत्सुनायतामिति व्यवहारभेदप्रतीतेः सत्तिनयोःपरस्परतोभेदो णुत्वह्रस्वत्वया
त्तुविशेषायोगिनंतद्वृत्तिनामश्यक्षएव॥ ९॥ संयुक्तमपिद्रव्यंयद्द्वारेणेदंरथगित्ययोध्रियते। तद्रथोद्वारव्यवहार
कारणंरथत्वं॥ १०॥ इदंपरमिदमपरमितियतोभिधानप्रत्ययौभवतः तद्यथाक्रमंपरत्वमपरत्वंचद्वित्वयमप्येतत्
द्विरूपतंच। तत्रादिमस्येथमुत्पत्तिः। एकस्यादिद्विस्थितयोरेकस्य द्रष्टुरपेक्षयासंनिकृष्टमवधिंकृत्वे। तस्मादूप्रकृ
ष्टस्यपरेणादिकूप्रदेशेनयोगात्परत्वमुत्पद्यते। विप्रकृष्टंचावधिंकृत्वेतस्मात्संनिकृष्टस्यापरेणादिकूप्रदेशेनयोगादप
रत्वमुत्पद्यते। कालकृतंत्वेवमुत्पद्यते। वर्तमानकालयोरनियतादिकूदेशसंयुक्तयोर्युवस्थविरयोर्मध्येयुवानमवधि

स्तत्रावरकालीनस्यस्थविरस्य परेणकालप्रदेशेनयोगात्। परत्वमुत्पद्यते। स्थविरंचावधिंकृत्वात्यकालीनस्ययूनोपरेणकालप्रदेशेनयोगात्परत्वमुत्पद्यते॥१२॥ ॥बुद्धिर्ज्ञानंज्ञानान्तरमाख्यं। सापुनर्द्विविधा। विद्याचाऽविद्याच। तत्राविद्या चतुर्विधा। संशयविपर्ययानध्यवसायस्वप्नलक्षणा। विद्यापिचतुर्विधा। प्रत्यक्षलैंगिकस्मृत्यार्षलक्षणा। प्रत्यक्षलैंगिकेप्रमाणाधिकारेव्याख्यास्येते॥ अतीतविषयास्मृतिः। सानागृहीतग्राहित्वान्नप्रमाणं। स्वप्नाणांव्यासादीनामतीतानागतेष्वर्थेषुधर्मादिषुयत्प्रातिभं। तदार्षं। तच्चप्रसादेनऋषीणां। कस्यचिदेवतलौकिकानां। यथाकूष्मकाण्डब्रवीतिस्तोमेभ्यआज्यंतेतिहृदयमेवंकथयतीति। आर्षंचप्रत्यक्षविषयहृदयमेवंकथयतीत्यपि॥ ३३॥ अनुग्रहलक्षणंसुखं॥ ३४॥ आत्मनउपघातस्वभावंदुःखं। तज्जामर्षदुःखानुभवविच्छायताहेतुः॥ ३५॥ स्वार्थपरार्थवाऽप्राप्तप्रार्थनमिच्छा। तस्याश्चकामोभिलाषोरागः संकल्पः कारुण्यं। नैर्घृण्यं। वंचनेच्छागृद्धताभावदुरात्मतादयोभेदाः॥ ३६॥ ॥कर्तृफलदाय्यात्मगुणआत्ममनःसंयोगजः स्वकार्यविरोधी धर्माधर्मरूपतयाभेदवान्परोऽदृष्टाख्योगुणः। तत्र धर्मः पुरुषगुणः कर्तुःप्रियाहितमोक्षहेतुरतीन्द्रियो। सुखसंविज्ञानविरोधी। अंत्यस्यैवसुखस्यसम्यग्विज्ञानेन धर्मोनाश्यते। अंत्यसुखकालंयावत्धर्मस्यावस्थानात्। सचपुरुषोंऽतःकरणसंयोगविशुद्धाभिसंधिर्वर्णाश्रमिणांप्रतिनियतसाधननिमित्तः साधनानितुश्रुतिस्मृतिविहितानि सामान्यतोऽहिंसादीनि। विशेषतस्तु ब्राह्मणादीनांपृथक्पृथक्यज्ञनाध्ययनादीनितत्तत्र्याणि॥ ३७॥ अधर्मोप्यात्मगुणः कर्तुरहितप्रत्यवायहेतुरतीन्द्रियो। त्यदुःखसंविज्ञानविरोधी॥ ३८॥ ॥ प्रयत्नउत्साहः। सचसुप्तावस्थायांप्राणापानप्रेरकः प्रबोधकाले तत्करणस्येंद्रियांतरप्राप्तिहेतुर्हिताहितप्राप्तिपरिहारोद्यतः स्मरणविधारकश्च॥ ३९॥ संस्कारोद्विधा। भावनाख्यितस्थापकश्च। भावनाख्यआत्मगुणोज्ञानज्ञानहेतुश्चदृष्टानुभूतश्रुतेषुर्थेषुस्मृतिप्रत्यभिज्ञानहेतुश्च॥ दृष्टानुभूतश्रुतेषुर्थेषुस्मृतिप्रत्यभिज्ञानकार्योन्नीयमानसद्भावः। स्थितस्थापकतूर्तिमद्द्रव्यगुणः। सचघनावयवसंनिवेशविशिष्टः। स्वमाश्रयं। कालांतरस्थायिनमन्यथान्यवस्थितमपिप्रयत्नतःपूर्ववद्यथावस्थितंस्थापयतीतिस्थितस्थापकमुच्यते॥ दृश्यतेतारुण्यप्रारंभे प्रभूततरकालसंवेष्टितस्यप्रसार्यमाणस्यपुनरल्पैवावलंबनसंस्कारवशात्। एवंधनुःशरावाभ्यंगहतादिषुभग्नापवर्तितेष्वेववस्त्रादिषुतस्यकार्यपरिस्फुटमुपलभ्यतेः॥ २९॥

प्रज्वलनात्मको दोषः। यस्मिन्सतिप्रज्वलितमिवात्मानंमन्यतेद्वेष्टुः। क्रोधोमन्युरक्षमामर्षइतिद्वेषभेदाः॥ २१॥ स्नेहोपांविशेषगुणः। संग्रहमृजादिहेतुः। अस्यापिगुरुत्ववन्नित्यानित्यत्वनिष्पत्तयः॥ २२॥ गुरुत्वंजलभूम्योः पतनकर्मकारणमत्यक्षंतस्यावादिपरमाणुरूपाद्विनेत्यानित्यत्वनिष्पत्तयः॥ २३॥ द्रवत्वंस्यंदनकर्मकारणंत्रिद्रव्यवृत्तिः। तद्द्वेधा। सहजं नैमित्तिकंच। सहजंअपांद्रवत्वं। नैमित्तिकंतु। पृथिवीतेजसोरग्निसंयोगाज्जंयथासार्षपः सुवर्णत्रयाद्रेश्चाग्निसंयोगाद्द्रवत्वमुत्पद्यते॥ २४॥ वेगः पृथिव्यप्तेजोवायुमनःसुमूर्तिमद्द्रव्येषुप्रयत्नाभिघातविशेषापेक्षात्कर्मणः समुत्पद्यतेनियतदिक्क्रियाकार्यप्रबंधहेतुः स्पर्शवद्द्रव्यसंयोगविशेषाच्च। तन्मूर्तिराद्यप्रयत्नाविभूतिकर्मोत्पन्नवेगवशाद्दूरोरुपांतरालेपातः सचहेतुनियताद्दिक्क्रियाकार्यसंबंधोन्नीयमानसद्भावः। क्वचिद्बाह्याभिघातोत्पन्नकर्मोत्पाद्यस्तूलशरावादौवेगः। कश्चिन्संस्कारस्यत्रिविधस्यभेदतयावेगंप्राहुः। तन्मतेचतुर्विंशतिरेवगुणाः। तेषांयेदीर्घकारुण्यदाक्षिण्योत्साहादीनांचगुणानामेषेवप्रयत्नबुद्ध्यादिगुणेष्वंतर्भावान्नाधिक्यं॥ २५॥ स्नेहादीनांगुणानांसर्वेषांगुणत्वाभिसंबंधोद्रव्याश्रितत्वंनिःक्रियत्वमगुणवत्त्वंच। तथास्पर्शरसगंधरूपपरत्वापरत्वगुरुत्वद्रवत्वस्नेहवेगामूर्तगुणाः। बुद्धिः सुखदुःखेच्छाधर्माधर्मप्रयत्नभावनाद्वेषश्चामूर्तगुणाः। संख्यापरिमाणपृथक्त्वसंयोगविभागाउभयगुणाइत्यादि। गुणविषयंविशेषस्वरूपंस्वयमवसेयं॥ ६२॥ अथकर्मव्याचिख्यासुराह॥ उत्क्षेपावक्षेपाकुंचनकंप्रसारणंगमनं॥ पंचविधंकर्मेतत्परापरेहेतुसामान्ये॥ ६३॥ उत्क्षेपऊर्ध्वक्षेपणंगुरुत्वाद्द्रव्यस्योर्ध्वनयनमुत्क्षेपणंकर्मेत्यर्थः। तद्विपरीतोवक्षेपोऽधोनयनमित्यर्थः। ऋजोर्गुल्फादिद्रव्यस्यकुटिलत्वकारणंकर्माकुंचनं। स्वार्थेकप्रत्ययोभकुंचनकं। येनवक्रोऽवयवीऋजुःसंपद्यते। तत्कर्मप्रसारणं। यद्गमनयतद्विग्देशैः संयोगविभागकारणंतद्गमनं। आनियतग्रहणेनभ्रमणपतनस्पंदनरेचनादीनि। माधिगमनएवांतर्भावोऽवः। पंचविधमेवकर्मेत्यविरुद्धमेतदनंतरोक्तं॥ अथसामान्यमुच्यते। तुशब्दस्यव्यवस्थासंबंधात्। सामान्येतुद्वेपरापरेपरमपरंचाद्विविधंसामान्यमित्यर्थः॥ ६४॥ ॥अथपरापरेव्याख्याति॥ तत्रपरंसत्तास्यं। द्रव्यत्वाद्यपरमथाविशेषस्तु। निश्चयतोनित्यद्रव्यवृत्तिरंत्योविनिर्दिष्टः॥ ६५॥ तत्रतयोःपरापरयोर्मध्येपरंसामान्यंसत्तास्यं॥ दृंसहित्यनुगताकारहेतुकारणंसत्तासामान्यमित्यर्थः। तच्चत्रिषुद्रव्यगुणकर्मसुपरार्थेषुसत्सहित्यनुवृत्तिप्रत्ययस्यैवकारणत्वात्। सामान्यमेवोच्यते।

॥ ८० ॥

नतुविशेषः। अथापरमुच्यते। द्रव्यत्वादिद्रव्यत्वंगुणत्वंकर्मत्वंचापरंसामान्यं। तत्रनवसुद्रव्येषुद्रव्यंद्रव्यमितिबुद्धिहेतुर्द्रव्यत्वम्। एवंगुणेषुगुणत्वबुद्धिविधायिगुणत्वं। कर्मसुकर्मत्वबुद्धिकारणंकर्मत्वं। तच्चद्रव्यत्वादिकंस्वाश्रयेषुद्रव्यादिष्वनुवृत्तिप्रत्ययहेतुत्वात्। सामान्यमप्युच्यते। स्वाश्रयस्यचविजातीयेभ्योगुणादिभ्योव्यावृत्तिप्रत्ययहेतुतयाविशेषोप्युच्यते। ततोपरंसामान्यमुभयरूपत्वात्। सामान्यविशेषसंज्ञालभतेअपेक्षाभेदादेकस्यापिसामान्यविशेषभावोनविरुध्यते। एवंपृथिवीत्वस्पर्शवत्वोष्णस्पर्शवत्वगोत्वघटत्वादीनामप्यनुवृत्तिहेतुत्वात्सामान्यविशेषभावः सिद्ध्यति। अत्रसत्तायोगात्सत्त्वंव्याख्यास्यते। तद्द्रव्यगुणकर्मस्वेव। नपुनराकाशादिषु। आकाशाकालदिक्शुद्धिष्वनुवृत्तिरूपमेवास्तित्वंस्वाक्रियते। व्यक्तेयेक्यादिकारणैः॥ तथाचसूत्रयन्ति॥ व्यक्तेरभेदस्तुल्यत्वंसंकरोनानवस्थितिः॥ रूपहानिरसंबंधोजातिबाधकसंग्रहः॥१॥ अस्यव्याख्या॥ व्यक्तेरभेदः। एकमनेकवर्तिसामान्यं। आकाशेभ्यःकरभेदान्नजातित्वं। पृथिवीत्वेजातीयइतिभूमित्वमुच्यते॥ तदानुल्यत्वान्नजातित्वं॥२॥ परमाणुषुजातित्वंगीयते। पार्थिवाप्यतेजसवायवीयत्वयोगात्संकरः॥३॥ सामान्येयदिसामान्यमंगीक्रियते। तदामूलक्षतिकारिणीअनवस्थितेः॥४॥ विशेषेषुयदिसामान्यंस्वीक्रियते॥ तदाविशेषस्यरूपहानिः॥५॥ यदिसमवायेजातित्वमंगीक्रियते। तदासंबंधाभावः। केनहिसंबंधेनतत्रसत्ता संबध्यते। समवायांतराभावात्॥ ६॥ वृत्तिपरेपुनः प्राहुः॥ सामान्यंत्रिविधं। महासामान्यं। सत्तासामान्यं। सामान्यविशेषसामान्यंच॥ तत्रमहासामान्यंषट्सुत्रिपदार्थेषुपदार्थत्वबुद्धिकारि। सत्तासामान्यंत्रिपदार्थमबुद्धिविधायि। सामान्यविशेषसामान्यंभद्रव्यत्वादि॥ अन्येत्वाचक्षते॥ त्रिपदार्थसत्करीसत्ता। सामान्यंद्रव्यत्वादिसामान्यविशेषः। पृथिवीत्वादिरितिलक्षणभेदादेतेषांसत्तादीनांद्रव्यगुणकर्मभ्यः पदार्थांतरत्वंसिद्धं। अथेत्यानंतर्येविशेषस्तुनिश्चयतस्तत्रवृत्तितएवविनिर्दिष्टः। नपुनर्घटपटकादिष्विवव्यवहारतोविशेषः। तुशब्दोनंतरोक्तसामान्यादस्यात्यंतव्यावृत्तिबुद्धिहेतुत्वेनभद्रंवैलक्षण्यंसूचयति॥ यतएवानेनाश्रयतोविशेषः। ततएवानित्यद्रव्यवृत्तिरंत्यइति। तत्रनित्यद्रव्येषुविनारंभरहितेषुषण्णांकाशकालदिगात्ममनःसुवृत्तिर्वर्तनंयस्य। सनित्यद्रव्यवृत्तिः। तथापरमाण्वंतरगतिनाशारंभकोहिभूतत्वात्। मुक्तात्मनांमुक्तमनसांचसंसारपर्यंतरूपत्वादंतत्वं। अंतेषुभवोंत्योविशेषोविनाईष्टैः प्रोक्तः। अंतेषुस्थितस्याविशेषस्यस्फुटतरमाकलयमाणत्वात्। वृत्तिस्तुतस्यसर्वास्मिन्नेवपरमाण्वादौनित्येद्रव्येविद्यतएव। अतएवनित्यद्रव्यवृत्तिरंत्यइत्युभय

MEMORIAL DR BHAU DAJI

पदोपादानं। विशेषश्चद्रव्यंप्रति। एकैकएववर्तते॥ नानेकः। एकानेवविशेषेणस्वाश्रयस्यव्यावृत्तिसिद्धेः। अनेकविशेषकल्पनायेयर्थात्। सर्वेनित्यद्रव्याण्याश्रित्यपुनर्विशेषणंबहुत्वेविज्ञातायत्रैकवचनं॥ तथाचप्रशस्तकरः। अंत्येषुभवाअंत्याः स्वाश्रयस्यविशेषकत्वाद्विशेषाः। विनारंभरहितेषुनित्यद्रव्येषुषण्णांकालदिगात्ममनसांप्रतिद्रव्यमेकएवर्तमानाअत्यंतव्यावृत्तिबुद्धिहेतवोयथाः स्मदादीनांगवादिष्वाश्रित्यसत्त्वादितिगुणक्रियावयवसंयोगिनिमित्तो - - - - - निर्दिष्टंयथागोः शुक्लः शीघ्रगतिः पीतः कुरुप्रान्प्रत्यायंदृतितथास्मदादिबुद्धीनांयोगिनांनित्येतत्त्वगत्यादिगुणाक्रियेषुपरमाण्वादिषुमुक्तात्ममनःसुचनित्यद्रव्यमेकएववर्तमानाअत्यंतव्यावृत्तिबुद्धिहेतवोवान्यनिमित्तासंभवाद्येभ्योनिमित्तेभ्यः प्रत्यक्षंविलक्षणोयंविलक्षणोयमितिप्रत्येयव्यावृत्तेर्नाकाशादिप्रकृष्टेचपरमाणौसएवायमितिप्रत्यभिज्ञानंचभवति। तेंत्यविशेषाइति। अनेननित्यद्रव्यवृत्तयोंत्याविशेषाइतिसूत्रमेवंव्याचक्षतेनित्यद्रव्येष्वेववृत्तिरेवयेषामितिसावधारणंवाक्यमेतत्॥ नित्यद्रव्यवृत्तयइतिपरं। अंत्यपदस्यविवरणमेतत्। तथान्येऽपि॥ नित्यद्रव्याण्युत्पत्तिविनाशयोरंतेव्यवस्थितत्वादंतशब्दवाच्यानि। तेषुभवास्तद्वृत्तयोविशेषाअंत्याइत्याख्यायंते। अमीचात्यंतव्यावृत्तिहेतवोद्रव्यादिभ्योवैलक्षण्यात्पदार्थांतरं॥ ६५॥ ॥

अथसमवायंस्वरूपतोनिरूपयति। ययुतसिद्धानामाधाराधेयभूतभावानां। संबंधवृत्तिप्रत्ययहेतुः सहिभवतिसमवायः॥ ६६॥ केचिद्भूतपारायणरतोंशुअग्निश्चलेवृतिपठंति॥ ततएवायुतसिद्धानामित्यादिवैशेषिकसूत्रेअयुतसिद्धानामपृथक्सिद्धानामितिव्याख्यातं। तथालोकेपिभेदाभिधायीयुतशब्दःप्रयुज्यमानेदृश्यते॥ द्वावविभक्तावाश्रितावेतौयुतौज्ञातावित्यादि। ततोयमत्रार्थः॥ वृत्तिवैशेषिकदर्शनेअयुतसिद्धानामपृथक्सिद्धानांतंतुपटसमवेतपटवत्॥ पृथगाश्रयानाश्रितानामितियावत्। आधाराश्चाधेयाश्च॥ आधाराधेयाः। तेभवंतीसम। आधाराधेयभूताः तेचतेभावाश्चार्थाः तेषांयः संबंधः वृत्तिप्रत्ययहेतुः वृत्ततंतुषुपटवृत्त्यादेः प्रत्ययस्यासाधारणंकारणं। सहिसएवभवतिसमवायः संबंधः मतोद्रव्यवृत्ततंतुषुपटद्रव्यगुणकर्मणी। वृत्तद्रव्यगुणकर्मसुसत्ता॥ वृत्तद्रव्येद्रव्यत्वमितिगुणेगुणत्वमितिकर्मणिकर्मत्वमितिद्रव्येषुत्यादिविशेषप्रत्ययइत्यग्रते। सपंचभ्यः पदार्थेभ्योर्थांतरंसमवायइत्यर्थः सतैकोविभुर्नित्यश्चवर्तेयः॥ ६६॥ तदेवंषट्पदार्थस्वरूपंगरूपितं। संप्रतिप्रमाणस्यसामान्यतोलक्षणमाख्यायते

॥

र्थोपलब्धिहेतुः प्रमाणमिति। अस्यायमर्थः। अव्यभिचारादिविशेषणविशिष्टार्थोपलब्धिर्ज्ञानिकासामग्री। तदेकदेशोवाबो
धरूपोवा। ज्ञानप्रदीपादिः साधकतमत्वात्प्रमाणं। एतत्कार्यभूतायथोक्तविशेषणविशिष्टार्थोपलब्धिः प्रमाणस्यसामा
न्यलक्षणं। तयास्वकारणस्यप्रमाणाभासेभ्योव्यवच्छेद्यमानत्वात्॥ इंद्रियजत्वलिंगजत्वादिविशेषणविशेषितासोपप
लब्धिः प्रमाणस्यविशेषलक्षणमिति। अथप्रमाणसंख्यांप्राह्॥ प्रमाणंचद्विधामीषांप्रत्यक्षंलैंगिकंतथा॥वैशेषिकम
तस्यैषसंक्षेपःपरिकीर्तितः॥ ६७॥ ॥ अमीषांवैशेषिकाणांप्रमाणंद्विधाद्विविधंचपुनरर्थे॥ कथमित्याह्॥ प्रत्यक्षंत
थेतिसमुच्चयेलिंगाज्जातंलैंगिकंच। तत्रप्रत्यक्षंद्वेधाऽनिंद्रियंयोगजंच। ऐंद्रियं प्राणस्यनच्चक्षुः श्रोत्र मनः संनिकर्षजमस्म
दादीनांप्रत्यक्षं। तत्द्वेधा। निर्विकल्पकंसविकल्पकंच॥ तत्रवस्तुस्वरूपालोचनमात्रंनिर्विकल्पकं। तच्चनसामान्यमात्रंगृण्हा
ति। भेदस्यापिप्रतिभासनात्। नापिस्वलक्षणमात्रसामान्यकारस्यापिसंवेदनात्। व्यक्त्यंतरदर्शनेप्रतिसंधानाच्च। किंतुसा
मान्यविशेषंचउभयमपिगृण्हाति। यद्यपिपरमिदंसामान्यमयंविशेषइत्येवंविविच्यनप्रत्येति। सामान्यविशेषसंबंधिनो
रनुवृत्तिव्यावृत्तिधर्मयोरग्रहणात्। सविकल्पंतुसामान्यंविशेषरूपतांविविच्यप्रत्येति। गोरंतरैःसममनुवृत्तिव्यावृत्तिधर्मैप्रति
पद्यमानस्यात्मनइंद्रियद्वारेणतथाभूतप्रतीत्युपपत्तेः। योगजमपिप्रत्यक्षंद्वेधायुक्तानांप्रत्यक्षंवियुक्तानांच। तत्रयुक्ता
नांसमाधिनैकाग्र्यमाश्रितानांयोगजधर्मबलादंतः करणेनाराद्वाद्विर्निर्गतयतींद्रियार्थैः। समंसंयुक्तेसतियदतींद्रिया
र्थदर्शनं॥ तद्युक्तानांप्रत्यक्षं। येत्वत्यंतयोगाभ्यासोचितधर्मातिशयात्असमाधिंप्राप्ताअपिअतींद्रियमर्थंपश्यंति। ते
वियुक्ताः। तेषामात्ममनइंद्रियार्थसंनिकर्षात्। इत्थंकालस्वभावादिप्रकृष्टार्थग्राहकंयत्प्रत्यक्षं। तद्वियुक्तानांप्रत्यक्षं। एत
च्चोत्कृष्टयोगिनोवसेयं। योगिमात्रस्यतदसंभवादितिविस्तरस्तुन्यायकंदलीतोविज्ञेयः। लैंगिकस्यपुनःस्वरूपमिदंलिंगदर्श
नात्यदव्यभिचारित्वादिविशेषणंज्ञानं। ततःपरामर्शोपलक्षितात्कारकस्यसमूहाद्भवति। तल्लैंगिकमनुमानमितिभावत
। तच्चेवंभवति। अस्येदंकार्यंकारणंसंयोगिसमवायिविरोधिचेतिलैंगिकं। तत्रकार्यंकारणपूर्वकत्वेनोपात्तलैंगादुपलभ्यमा
नंकारणस्यगमकं। यथायंनदीपूरोवृष्टिकार्यं। विशिष्टनदीपूरत्वात्। पूर्वोपलब्धविशिष्टनदीपूरवत्॥१॥ कारणमपि

कार्यजनकत्वेनपूर्वमुपलब्धेरुपलभ्यमानंकार्यस्यगमकंयत्तल्लिंगं। यथाविशिष्ट- थोन्नतिर्वर्षकर्मणः॥ २॥ तथाधू
मोग्नेः संयोगी॥ ३॥ समवायीच। उष्मस्पर्शोवाग्नेरुष्णतेजोगमयतीति॥ ४॥ ॥विरोधीचयथा शीतस्पर्शोवह्निस्फूर्जनाविशिष्टोन
कुम्भादेर्लिंगं। वह्निर्वाशीताभावस्यिति॥ ५॥ अस्येदमिति सूत्रेचकार्यादीनामुपादानंलिंगदर्शनार्थंकृतं। नपुनरेतावंतये
वलिंगानीत्यवधारणार्थं। यतः कार्यादिव्यतिरिक्तान्यपिलिंगानिसंति। यथाचंद्रोदयः समुद्रवृद्धेः कुमुदविकासस्यचलिंगंन
चचंद्रोदयः। समुद्रवृद्धिकुमुदविकासौचमिथः कार्यकारणंवाभवंति। विशिष्टदेशकालसंयोगात्कदलीपत्रविस्तारलक्षणा
नामुदकवृद्धिविकासानांस्वस्वकारणेभ्यएवोत्पत्तेः। नूरादिचन्नलस्यनेमेयं। मगस्योदयस्यलिंगमित्यादि। तत्सर्वंअस्येद
मितियदेनसंगृहीतंज्ञेयं। अस्यसाध्यस्येदंसंबंधीतिकृत्वायत्यस्येदंनाकालाग्नविनाभूतं। तत्तस्यलिंगमित्यर्थः। ततो
स्येदमिति सूत्रस्यनाव्याप्तकृतेतिविशेषार्थिनानुन्यायकंदलीविलोकनीया। गुणादीनांतु प्रमाणनामनुमानंएवांतर्भावा
त्। कंदलीकाराभिप्रायेणेतत्प्रमाणद्वितयमत्राभोक्तव्यं। व्योमशिवस्तुप्रत्यक्षानुमानशब्दानित्रीणिप्रमाणानिप्रोवा
चेति। उपसंहरंनाह्। वैशेषिकमतस्येत्याह्। वैशेषिकमतस्यैषोऽनंतरोक्तसंक्षेपः परिकीर्तितः कथितः। अथात्राप्य
नुक्तंकिंचिदुच्यते। योगादिकंनित्यप्रदीपादिकंयत्कालावच्छेदि। बुद्धिसुखादिकंक्षणिकंचैतन्याद्योरूपादयश्चधर्मो
आत्मादेर्घटादेश्च धार्मिणोत्यंतव्यतिरिक्ताअपिसमवायसंबंधेनसंबद्धाः। सचसमवायोनित्यः सर्वगतएकश्चसर्वगतआ
त्मानुश्लिष्टश्चदुःखेछाधर्माधर्मप्रयत्नभावनाख्यसंस्कारद्वेषाणांनवानामात्मविशेषगुणानामुच्छेदोमोक्षः। परस्परविभक्तो
सामान्यविशेषौद्रव्यपर्यायौचप्रमाणगोचरः। द्रव्यगुणादिषट्कपदार्थेषुस्वरूपसत्ववस्तुत्वनिबंधनंविद्यते। द्रव्यगुण
कर्मस्वचसत्तासंबंधोवर्तते। सामान्यविशेषसमवायेष्वसनारुतीति। षट्पदार्थीकणादस्मृता। तद्भाष्यंप्रशस्तकरस्तृतं।
तट्टीकाः कंदलीश्रीधराचार्याव्योमशिवाचार्याकिरणावल्युदयनंसदृष्टा। व्योमवतीव्योमशिवाचार्यरचिता। लीलावतीतर्कः श्रीवत्साचा
र्यैः। भाट्टेयतंत्रंचेत्याद्योवैशेषिकतर्कः॥ ६७॥ ॥ इतिलघागमाः॥ अथमीमांसकमतंजैमिनीयाधराद्यंप्रोच्यते।
जैमिनीयावेषेण संख्यात्वैकदंडाग्निदंडाधातुरक्तवासोमुंजयज्ञोपवीतानाः। कर्मठकुधराः दंडिरसंन्यासिप्रभृत
योद्विजाः। तेषांवेदएवगुरुर्नपुरुषोवक्तागुरुः। ततएवस्वयंतत्वंसंन्यस्तंसंन्यस्तमितिभाषंते। यस्योपवीतंचप्रक्षाल्यानिर्ज

चिदंति। तेद्विधा। एकेयाज्ञिकाद्यः पूर्वमीमांसावादिनोपरेतूत्तरमीमांसावादिनः। तत्रपूर्वमीमांसावादिनः। कुकर्मविवर्जिनोयज्ञ
नादिषट्कर्मकारिणोब्रह्मसूत्रेणागृहस्थाश्रमसंस्थिताः शूद्रान्नादिवर्जकाभवंति। तेचद्विधा। भाट्टाःप्रभाकराश्च। षट्पंचप्रमा
णत्वरूपिणः। येतूत्तरमीमांसावादिनस्तेवेदांतिनोब्रह्माद्वैतमेवमन्यंते। सर्वमेतद्दृश्यंब्रह्मेतिभाषंते। प्रमाणंचयथातथादृ
ष्टं॥ एकएवहिभूतात्माभूतेभूतेव्यवस्थितः। एकधाबहुधाचैवदृश्यतेजलचंद्रवत्। श्रुतिवचनात्॥ १॥ पुरुषएवेदंसर्वं
यद्भूतंयच्चभाव्यमितिवचनात्॥ आत्मन्येवकृत्स्नंमुक्तिमाचक्षते च मत्वपरोक्षमापद्युक्तिमन्यंते। तेचद्विज्ञाएवंभगवन्नामधेया
श्चतुर्थाभिधीयंते॥ कुटीचरबहूदक हंसपरमहंसभेदात्। तत्रत्रिदंडसंत्रिखो ब्रह्मसूत्री शिखात्यागी यज्ञोपवीतपरिग्रही।
सकृत्पुत्रगृहेभिक्षांभुंजान स्त्रपः शोधितविप्रगृहेदेनेष्वभिक्षांभुंजानोविष्णुजपपरोनदीनीरस्था
यी बहूदकःकथ्यते॥ २॥ ब्रह्मसूत्रशिखाभारहितःकषायांबरदंडधारी। ग्रामेचैकरात्रं। नगरेचत्रिरात्रंवसन्निर्विगतः विधूमेषु
निषुविप्रगृहेषुभिक्षांभुंजान स्त्रपः शोधितविप्रगृहेदेनेषुभ्रमन्हंसःसमुच्यते॥ ३॥ हंसएवोत्तमस्तानश्चातुर्वर्ण्यगृहेभो
ज्ञी। स्वेच्छयादंडधरश्चानादिसंगछन्। ग्रामेदिनतायामनग्नग्राही। वेदांतैकध्यायी। परमहंसः समाख्यायते॥ एतेषुचतु
र्षुपरः परोधिकः। एतेचत्वारोपिकेवलब्रह्मसाधनैकव्यसनिनः ग्राह्यार्थयोर्नरासायाःनेकायुक्तीः स्फोरयंतोनि
र्वाच्यंतेयथान्यवतिष्ठंते॥ तथाखंडनतर्कादभियुक्तैरवसेयं। नात्रतन्मतंवक्ष्यते॥ इतुसामान्येनशास्त्रकारः। पूर्वमी मां
सावादिमतमेवबभणिषुरेवमाह। जैमिनीयाः पुनः प्राहुः सर्वज्ञादिविदोषणः। देहेनाविद्यतेकोपियस्यमानंवचोभवे
त्॥ ६८॥ जैमिनीयास्तुब्रुवते। सर्वज्ञादीनाविदोषणानियस्य ससर्वज्ञादिविदोषणः सर्वज्ञः सर्वदृष्टिवीतरागः सृष्ट्यादि
कर्ताचेत्यादिविदोषणवान्। कोपिप्रागुक्तदर्शनसंमतदेवानामेकतरोपिदेवोदेवतनाविद्यते। यस्यदेवस्यवचोवचनंप्र
माणंभवेत्। प्रथमंतावत्देवएवक्वानवर्तते॥ कुतस्तल्लक्षणोक्तानिवचनानिसंभवेयुरितिभावः। तथाहि। पुरुषोनसर्वज्ञो
मानुषत्वात्। रथ्यापुरुषवत्। अथाकृत्रिमाण्यसुरासुरसेव्यमानत्वात्। त्रैलोक्यसाम्राज्यसूचकछत्रचामरादिविभूत्यन्य
थानुपपत्तेरस्ति सर्वज्ञोविदोषदृतिचेन्न। मायाविभिरपिकीर्तिभूज्ञालुभिरिंद्रजालवदेनत्प्रकटनात्। यदुक्तंतत्सूत्रेणै

र्यो वेदपाठः प्रयत्नतः। ततो धर्मस्य विचारः कर्तव्यो धर्मसाधनात्॥ ७०॥ अतएवसर्वज्ञाद्यभावादेव पुराणपूर्वो वेदपाठः ऋग्यजुःसामाथर्वणां वेदानांपाठः प्रयत्नतः कार्यः। ततः किंकर्तव्यमित्याह॥ ततो धर्मस्येति। ततोवेदपाठादनंतरंधर्मस्य जिज्ञासाकर्तव्या। धर्मो ह्यतींद्रियः। ततः सकीदृक्केनप्रमाणेनज्ञातव्यइत्यपेक्षायामाह॥ तस्येति। तस्यधर्मस्यानुभिछाकार्या। साकीदृशी। धर्मसाधना। धर्मसाधनस्योपायः॥ ७१॥ ॥ यतश्चैवंततस्तस्यानिमित्तंपरीक्ष्यानिमित्तंचनोदनानिमित्तांहृद्विधं। जनकं ग्राहकंच। अत्रनुग्राह्यकंक्षेयं। एतदेवविशेषयितुंतरंप्राह॥ नोदनालक्षणोधर्मोनोदनाजन्यांप्रति॥ प्रवर्तकंचचःप्राहुः स्वःकामोग्निंयथायजेत्॥ ७२॥ ॥नोदंतेप्रेर्यतेश्रेयः साधकद्रव्यादिषुप्रवर्त्यतेनयाअनयेतिनोदनावेदवचनस्य तत्प्रेरणेत्यर्थः। धर्मोनोदनयालक्ष्यतेज्ञायतेऽनुतिनोदनालक्षणः। धर्मोह्यतींद्रियत्वेननोदनयैवलक्ष्यते। नान्येनप्रमाणेन। प्रत्यक्षादीनांविद्यमानोपलंभकत्वात्॥ धर्मस्यतुकर्तव्यतारूपत्वात्कर्तव्यतायाश्चाक्रियाकालस्यार्थरूपत्वात्। त्रिकालशून्यक्रियार्थरूपार्थविषयविज्ञानोत्पादिकानोदनेतिमीमांसाभ्युपगमात्। अथनोदनाव्याख्यातानोदनाजन्यांक्रियांप्रतीत्याह। नोदनापुनःक्रियांदृवनसर्वभूताहिंसनदानाहिंक्रियांप्रतिप्रवर्तकंप्रेरकंवचोवेदवचनंप्राहुर्मीमांसकाभाषंते॥ दृवनाहिंक्रियानिषेधेयदेवप्रेरकंवेदस्यवचनंसैवनोदनेतिभावः। प्रवर्तकंतद्वचनमेवनिदर्शनेनदर्शयति। स्वःकामोग्निंयथायजेदिति। अथेत्युपदर्शनार्थः। स्वःस्वर्गेकामोयस्यसः स्वःकामः पुमान्स्वःकामः सन्अग्निंयज्ञेनयजेत्। अत्रेश्शोकर्बंधानुलोम्येनेश्मुपन्यस्तं। अन्यथात्वेवंभवति। अग्निहोत्रंजुहुयात्स्वर्गकामइति॥ प्रवर्तकवचनस्योपलक्षणत्वात्। निवर्तकमपिवेदवचनंनोदनाशब्देन॥ यथानाहिंस्यात्सर्वभूतानीति। एवंनवेहिंस्याद्भवेदित्याद्यपि॥ अभिधेनोदनाभिधेनोदितोयाह। यथानोदनंयैर्द्रव्यगुणकर्मभिर्योदृवनादौप्रवर्तते। निवर्ततेवा। तदातेषांद्रव्यादीनांतस्याभीप्सितफलस्वर्गादिसाधनयोग्यतैवधर्मइत्यभिधीयते। एतेनवेदवचनेनः प्रेरितोपियदिमप्रवर्तते। नानिवर्ततेवा। विपरीतंवाप्रवर्तते। तदातस्यनरकाद्यनिष्टफलसंसाधनयोग्यतैवद्रव्यादिसंबंधिनीपापमित्युच्यते॥ इत्यविज्ञातंज्ञापितंद्रष्टव्यं। इष्टानिष्टार्थसाधनयोग्यतालक्षणोधर्माधर्मौविनिर्मीमांसकाः॥ उक्तंच॥ सात्वरे॥ यएवश्रेयस्करः सएवधर्मशब्देनोच्यते। अनेनद्रव्यादीनामभिप्सितार्थसाधनयोग्यताधर्मइति। प्रतिपादितंशबरस्वामिना। भट्टोप्येतदेवाह। श्रेयोहिपुरुषप्रीतेः। सा

द्रव्यगुणकर्मभिर्नोदनालक्षणेः साध्या। तस्मादेवंविधधर्मता॥ ७॥ ॥ एषामेंद्रियकत्वेपिनताद्रूप्येण धर्मता॥ श्रेयःसाधनताह्येषांनित्यंवेदात्प्रतीयते॥ ८॥ नाद्रूप्येणचधर्मत्वंतस्मान्नेंद्रियगोचरः॥ इति॥ ७१॥ ॥ अथविनोदनालक्षणंप्रमाणस्याभिधानीयं। तच्चसामान्यलक्षणाविनाभूतं। ततः प्रथमंप्रमाणस्यसामान्यलक्षणमभिधीयते। अनधिगतार्थाधिगंतृप्रमाणमिति। अनधिगतोगृहीतोयो। र्थोबाह्यः स्तंभादि। तस्याधिगंतृआधिक्येन संशयादिव्युदासेनपरिछेदं। अनधिगतार्थाधिगंतृप्रमाणत्वात्तार्थपरिछेदकं समर्थविशेषणोपादानात्तानंविशेष्यंलभ्यते॥ अगृहीतार्थग्राहकंज्ञानंप्रमाणमित्यर्थः। अत्रानधिगतेतिपदंधारावाहिज्ञानानांगृहीतग्राहिणांप्रामाण्यपरीकरणार्थं। अर्थेतिग्रहणंसंवेदनंसंवेदितंनभवति। स्वात्मनिक्रियाविरोधात्। कुंभनित्यंपरोक्षमेवेतिज्ञापनार्थं॥ तच्चपरोक्षंज्ञानंभाट्टमतेर्थापत्तिकल्पनानुमेयं॥ भाट्टप्रभाकरमतेसंवेदनाद्यकल्पनानुमेयंवाप्रतिपत्तव्यं। अथप्रमाणस्यविशेषलक्षणंविविक्षुः प्रथमंतेनामाह। तत्संख्यांचाह॥ प्रत्यक्षमनुमानंचशब्दश्चोपमयासह॥ अर्थापत्तिरभावश्चषडेतेप्रमाणानिलौकिकानां॥ ७२॥ प्रत्यक्षानुमानशब्दोपमानार्थापत्त्यभावलक्षणानिषडेवप्रमाणानिलौकिकानांसंमतानीत्यध्याहारः। चकारः समुच्चयार्थः। तत्राद्यानिपंचैवप्रमाणानीतिप्रभाकरोभावस्यप्रत्यक्षेणैवग्राह्यतांमन्यमानोभिभिमन्यते॥ षडुपितानीतिभट्टोभाषणे॥ ७२॥ अथप्रत्यक्षस्यलक्षणमाचष्टे। तत्रप्रत्यक्षमक्षाणांसंप्रयोगेसतांसति॥ आत्मनोबुद्धिजन्मोत्यनुमानंलैंगिकंपुनः॥ ७३॥ तत्रेतिनिर्धारणार्थः॥ इयमत्राक्षरघटना। सतांसंप्रयोगेसति। आत्मनोक्षाणांबुद्धिजन्मप्रत्यक्षमिति॥ श्लोकेतुवंधानुलोम्येनव्यत्ययेनैर्दृशः। सतांविद्यमानानांवस्तूनांसंबंधिनिप्रयोगेसंबंधेसतिआत्मनोज्ञातुरस्येंद्रियाणांयोबुध्युत्पादस्तत्प्रत्यक्षमिति। सतामित्यत्रमतदर्थेकवचनेनैवप्रसक्तार्थसिद्धौषष्ठीबहुवचनाभिधानं। बहूनामप्यर्थानांसंबंधरेंद्रियस्यसंयोगःबहुवचनभवतीतिज्ञापनार्थं। अत्रजैमनीयंसूत्रमिदं। सत्संप्रयोगेसतिपुरुषस्येंद्रियाणांबुद्धिजन्मतत्प्रत्यक्षमितिव्याख्या॥ सतांविद्यमानेनवस्तुनाक्षेंद्रियाणांसंप्रयोगेसंबंधेसतिपुरुषस्यज्ञातुरुत्पादस्तत्प्रत्यक्षं। अयमत्रभावः। यद्विषयंविज्ञानंतेनैवार्थेनसंप्रयोगेक्षेंद्रियाणांप्रत्यक्षंप्रत्यक्षाभासंत्वन्यसंयोगेनं। यथामरुमरीचिकादिसंप्रयोगजंज्ञानंतत्। अथबालव्यंप्रयोज्यत्वंविद्यमानोपलंभनत्वमुच्यते। तत्रसतिविद्यमानेसम्यग्प्रयोगोर्थस्येंद्रियाणांव्यापारो

योग्यतावा। ननुनेयायिकाभ्युपगतएवसंयोगादेः। तस्मिन्सतिशेषंप्राग्वत्। इतिशब्दः प्रत्यक्षलक्षणसमाप्तिसूचकः॥
अथानुमानंलक्षयति। पुनः शब्दस्यव्यस्तसंबंधात्। अनुमानंपुनर्लैंगिकंलिंगादनुमितिज्ञानमनुमानमित्यर्थः। तत्रेदमनु
मानलक्षणस्यसूत्रमात्रमुक्तं। संपूर्णंतित्वर्थलक्षणं॥ ज्ञातसंबंधस्यैकदेशदर्शनादसंनिकृष्टेऽर्थेबुद्धिरनुमानं इतिशाबर॥ ८४॥
मनुमानलक्षणं॥ व्याख्या। अवगतसाध्यसाधनाविनाभावसंबंधसापुंसएकदेशस्यसाधनस्यदर्शनात्। असंनिकृष्टेपरोक्षे
र्थेबुद्धिर्ज्ञानमनुमानमिति॥ ७३॥ ॥ शब्दमाह॥ शब्दंशास्त्रतवेदोक्तं मुपमानंतुकीर्तितं॥ प्रसिद्धार्थस्यसाधर्म्यादप्र
सिद्धस्यसाधनं॥ ७४॥ ॥ शास्त्रतोपौरुषेयत्वान्नित्योयोवेदस्तस्मादुक्तंउत्थानंयस्य। तच्छास्त्रतवेदोक्तं। अर्थाद्वेदशब्द
ज्ञानंशब्दंप्रमाणं अस्येदंलक्षणं। शब्दज्ञानादसंनिकृष्टेर्थेबुद्धिः शाब्दमिति। अयंशब्दोऽस्यार्थस्यवाचकइतियता
नं। तच्छब्दज्ञानं। तस्मादनंतरंशब्देश्रुतेज्ञानात्संनिकृष्टेप्रत्यक्षेप्यर्थेघटादौबुद्धिर्ज्ञानंशब्दंप्रमाणं॥ शब्दादप्रत्यक्षेवस्तु
नियतोज्ञानमुदेति॥ तच्छाब्दमित्यर्थः। अत्रमतेशब्दस्येदंस्वरूपंप्ररूप्यते। नित्याआकाशवत्सर्वगताश्चवर्णाः। तेचतालोष्ठा
दिभिर्नाभिव्यज्यंते। नपुनरुत्पाद्यंते। विशिष्टानुपूर्वीकोवर्णःशब्दनित्यः। शब्दार्थयोर्वाच्यवाचकसंबंधइति। अथोपमानमाह॥
उपमानंत्वित्यादि। उपमानंपुनः कीर्तितं। तत्किरूपमित्याह। प्रसिद्धार्थस्येत्याह। प्रसिद्धउपलब्धोर्थोगवादिर्यस्यपुंसः स
प्रसिद्धार्थः। ज्ञातगवादिपदार्थइत्यर्थः। तस्यगवयदर्शनेसाधर्म्यात्। गवयगतसादृश्यात्। परोक्षेगवि अप्रसिद्धस्यपुरा
नुपलब्धस्यसादृश्यसाधनंज्ञानं। अस्येदंसूत्रं उपमानमपिसादृश्यादसंनिकृष्टेर्थेबुद्धिमुत्पादयति। यथागवयदर्शनंगो
स्मरणस्येति। गवयसादृश्यादसंनिकृष्टेर्थेपरोक्षस्यगोसादृश्येगोस्मरणस्येतिगाविस्मरणंयस्यपुंसः सगोस्मरणस्तस्यगो
स्मरणवतइत्यर्थः शेषंस्पष्टं तत्रेदंतात्पर्यं येनप्रतिपत्रागोरुपलब्धो नगवयो। नचातिदेशवाक्यं। गौरिवगवयइति
श्रुतं। तस्मारण्येपर्यटतोगवयदर्शनेप्रथमतउपजायते। परोक्षेगविसादृश्यज्ञानंयदुत्पद्यते। अनेनसदृशोगौरितितदुप
मानमिति। यस्याविषयः सादृश्यविशिष्टः परोक्षोगोः तद्विशिष्टंवासादृश्यमिति। अस्यचानधिगतार्थाधिगंतृत्वतयाप्रमा
ण्यमुपपन्नं। यतोत्रगवयाविषयेणप्रत्यक्षेणगवयएवविषयीकृतोनपुनरसंनिहितस्यगोः सादृश्यंयदाचित्तस्यपूर्वंगोरि
तिप्रत्यक्षमभूत्। तस्याधिगवयोत्यंतमप्रत्यक्षएवेति। कथंगवितदपेक्षंतत्सादृश्यज्ञानं। तदेवंगवयसदृशोगौरिति

पेनज्ञायते। वस्तुसत्तावबोधार्थंतत्राभावप्रमाणता॥ ७६॥ सदसदंशात्मकेवस्तुनिप्रत्यक्षादीनिपंचप्रमाणानिसदंशंगृ
ह्णंति नपुनस्मदंशं। प्रमाणाभावलक्षणत्वाभावोसदंशंगृह्णाति। नपुनः सदंशं। अभावोपिप्रमाणाभावलक्षणोना
स्तीत्यर्थस्यासंनिकृष्टस्यप्रसिध्यर्थंप्रमाणमितिवचनात्। अन्येपुनरभावारंभंप्रमाणंत्रिधावर्णयंति। प्रमाणपंचका
भावलक्षणोनंतरोः भावः॥ १॥ प्रतिषिध्यमानाद्गृहीतदन्यज्ञानं। २ आत्मावाविषयग्रहणरूपेणानभिनिर्वृत्तस्वभावः॥ ३ इति
ततः प्रस्तुतश्लोकस्यायमर्थः। प्रमाणपंचकंप्रत्यक्षादिप्रमाणपंचकंयत्रभूतलावाधारेघटादेराधेयस्यग्रहणायनज्ञायते
नप्रवर्तते। तत्राधेयवर्जितस्याधारस्यग्रहणेभावप्रमाणता। अभावअप्रामाण्यंएतेननिषिध्यमानात्तदन्यत्तानमुक्तं। तथा
प्रमाणपंचकंयत्रेतिपदस्यात्रापिसंबंधात्। यत्रवस्तुरूपेघटादेर्वस्तुनोरूपेसदंशेग्राहकतदनज्ञायते। तत्रासदंशेः
भावस्यप्रमाणता। एतेनप्रमाणपंचकाभावउक्तः २ तथाप्रमाणपंचकंवस्तुसत्तावबोधार्थंघटादिवस्तुसत्तायाग्रहबो
धायनज्ञायतेतत्तेनव्याप्रियते। तत्रसत्तानबोधेभावस्यप्रमाणता। अनेनात्माविषयग्रहणरूपेणापरिणतउक्तः। ३ एव
मिहाभावप्रमाणंत्रिधाप्रदर्शितं। तदुक्तं। प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभावउच्यते १ सात्मनोपरिणामोवा २ विज्ञानंवा
न्यवस्तुनि ३॥ १। अत्रसाशब्दोनुत्पत्तेर्विशेषणतयायोजयति। संमतिटीकायांअभावप्रमाणं। यथात्रिधोपदर्शितं। तथेह
पिनदर्शितं। रत्नाकरावतारिकायांतुप्रत्यक्षादेरनुत्पत्तिरित्यस्यैवोक्तस्यबलेनद्विधातदूषितमास्ते। तत्र सशब्दः पुनरु
क्तः प्रमाणाभावस्यावश्यंविशेषणंकार्यइति। तत्वंतुबहुश्रुताजानते। अथयेभावप्रमाणमेकधाभिदधति। तन्मतेनप्रस्तुत
श्लोकोव्याख्यायते। प्रमाणपंचकंप्रत्यक्षादिप्रमाणपंचकंयत्रयस्मिन्वस्तुरूपेनज्ञायते। नव्याप्रियते। वस्तुरूपंद्वे
धा। सदसद्रूपभेदात्। अतोद्वयोरूपयोरेकतरव्यक्तयेप्राह्। वस्तुसत्तेत्यादि। वस्तुनोघटादेः सत्तासद्रूपता सदंशग्र
हणावत्। तस्याअवबोधार्थं। सदंशोहिप्रत्यक्षादिपंचकस्याविषयस्तेनेननगृह्यते। तदातत्रवस्तुरूपेणैषस्यासदंश
स्यग्रहणायाभावस्यप्रमाणतेति। वस्तुसत्तावबोधार्थमितिक्वचित्पाठांतरंतत्रायमर्थः। प्रमाणपंचकंयत्रवस्तुनो
रूपेनव्याप्रियते। तत्रवस्तुनोयासत्तासदंशस्तद्बोधार्थमभावस्यप्रमाणतेति। अनेनचत्रिविधेनैकविधेनवा
भावप्रमाणेनप्रदेशादेर्घटाभावोगम्यते। नचप्रत्यक्षेणैषाभावोवसीयते। तस्याभावविषयत्वविरोधात्। तावंशे

नैवेंद्रियाणांसंयोगात्। अथघटानुपलब्ध्याप्रदेशोधर्मिणिघटाभावः साध्यतत्पतिपत्तयेभावइतिचेन्न। साध्यसाध
नयोः कस्यचित्संबंधस्याभावात्। तस्माद्भावोपिप्रमाणांतरमेव। अभावश्चप्रागभावादिभेदभिन्नोवस्तुरूपेणोपपद्यत
एवः न्यथाकारणादिव्यवहारस्यलोकप्रतीतस्याभावप्रसंगात्। तदुक्तंनचस्यात्व्यवहारोयंकारणादिविभागतः। प्रागभा
वादिभेदेनाभावोयादृच्छिकइति॥ १॥ यद्वानुपलब्धिव्याप्तिबुद्धिग्राह्योयंतस्तथा। तस्माद्भावादिव द्वस्तुप्रमेयत्वाच्चगृह्य
तां। २। नचावस्तुनएतेस्युर्भेदास्तेनास्यवस्तुता। कार्यादीनामभावः कोभावोयः कारणादिषु॥ ३॥ वस्तुसंकरसिद्धेः
श्चतत्प्रमाणंसमाश्रिता॥ क्षीरेदध्यादिवन्नास्तिप्रागभावः सउच्यते॥ ५॥ नास्तितापयसोरूपभेदध्वंसाभावलक्षणं
गवयोश्वाद्यभावस्तुसोन्योन्याभावउच्यते॥ ५॥ क्षीरसोमयवानिम्नवृद्धिकात्वित्यवर्जिताः॥ शशशृंगादिरूपेणसोन्यंता
भावउच्यते॥ ६॥ यद्येतन्नावस्तुव्यवहारप्रभावाल्यंप्रमाणंनभवेत्। तदाप्रतिनियतवस्तुव्यवहारोदुरुत्सारितेवस्यात्।
क्षीरेदधिभवेदेवंदधिक्षीरं घटेपटः। शशशृंगंखरशृंगादिरित्यन्यंमूर्तिरात्मनि॥ ७॥ अप्सुगंधोरसश्चाग्नेर्वायोः
रूपेणतोसह। व्योम्निसंस्पर्शतावेत्तनवेदस्यप्रमाणतेति॥ ८॥ ॥ अथनिरंशसदेकरूपत्वात्वस्तुनोध्यक्षेणसर्वात्मना
ग्रहणेकोपरोसदंशोयत्राभावः प्रमाणंभवेदिति। चेन्न। स्वपररूपाभ्यांसदसदात्मकतावस्तुनोन्यथावस्तुत्वायोः
गात्। नचसदंशग्रहस्यभिन्नत्वंतत्रयग्रणेतस्यापिग्रहइतिवाच्यं। सदसदंशयोर्धर्म्यभेदेपिभेदाभ्युपगमात्।
तदेवंप्रत्यक्षाद्यगृहीतप्रमेयाभावग्राहकत्वात्। प्रमाणाभावः प्रमाणांतरमिति। अथोक्तमपिकिंचिद्व्यक्तयेलिख्य
ते। अनधिगतार्थाधिगंतृप्रमाणं पूर्वं। २ प्रमाणं। इत्तरंतुफलं सामान्यविशेषात्मकंवस्तुप्रमाणगोचरं। नित्यपरोक्षं
ज्ञानंहि भाट्टप्रभाकरमतयोरर्थप्राकट्यारूपंसंवेदनाख्यफलानुमेयंज्ञानं वेदोपौरुषेयः। वेदोक्तहिंसाधर्मोयश्च
दोनित्यः सर्वतोनास्ति। अविद्यापरनामायावशात्प्रतिभासमानः सर्वः प्रपंचोपारमार्थिकः परब्रह्मैवपरमा
र्थसत्॥ ७६॥ उपसंहरंनाह। जैमिनीयमतस्याप्यसंक्षेपोयंनिवेदितः। एवमास्तिकवादानांकृतसंक्षेपकीर्तनं॥
७७॥ अविशब्दान्नकेवलमपरदर्शनानांसंक्षेपोनिवेदितो जैमिनीयमतस्याप्ययंसंक्षेपोनिवेदितो। गत्वव्य
स्यबाहुल्यादत्रोपयस्यास्मिन्सूत्रेसमस्तस्यवस्तुमद्वाक्यत्वात्। संक्षेपएवप्रोक्तः अथप्रागुक्तमतानांसूत्रसूचि

गमनमाह॥ एवमित्यादि। एवमिच्छमास्तिकवादिनांजीवपरलोकपुण्यपापाद्यस्तित्ववादिनां बौद्धनैयायिकसांख्यजैनवैशेषिकजैमिनीयानांमंक्षेपेणकीर्तनंवक्ष्याभिधानंमंक्षेपकीर्तनंलक्षं॥ ७७॥ अत्रैवविशेषमाह॥ नैयायिकमतादन्येभेदंवैशेषिकैःसह। नमन्यंतेमतंतेषांपंचैवास्तिकवादिनः॥ ७८॥ अन्येकेचनाचार्या नैयायिकमतादभेदंवैशेषिकैः सह भेदपार्थक्यंनमन्यंते। एकदेवतत्वेनतत्वानामिथोऽतद्भावेनोऽव्यायसएवभेदस्याभावाच्च। नैयायिकवैशेषिकाणामिथोमतैक्यमेवेछंतीत्यर्थः। तेषामाचार्याणांमतेनास्तिकवादिनः पंचैवनपुनः षट्॥ ७८॥ अथ दर्शनानां संख्यायाषाश्रितेजगत प्राप्तिख्या। साकथमुपपादनीयेत्याशंक्याह॥ ॥ षट्दर्शनसंख्यातु पूर्यतेनान्यमतेकिल। लोकायितमतक्षेपेकथ्यतेतेनतन्मतं॥ ७९॥ यैनैयायिकवैशेषिकयोर्मतमाचक्षते॥ तन्मतेषट्दर्शनसंख्यातुषण्णांदर्शनानां संख्यापुनर्लोकायितबास्तिका। तेषांयन्मतंतस्यक्षेपेमीलनएवाकृत्यांशवादेपूर्यते। पूर्णाभवेत्। तेनकारणेनतन्मतंचार्वाकमतंकथ्यते॥ स्वरूपतःप्ररूप्यते। अत्राद्यपादेसमाक्षरंछंदोनरमितिनछंदः शास्त्रविरोधः शंकनीयः। प्रथमंनास्तिकस्वरूपंउच्यते। कापालिकाभस्मोद्धूलनपरायोगिनोब्राह्मणाद्यंत्यजांताश्चैकेचननास्तिकाभवंति। तेचजीवपुण्यपापादिकंनमन्यंते। चतुर्भूतात्मकंजगदाचक्षते। क्वचित्चार्वाकैकदेशीयाआकाशंभूतमभिमन्यमानाः पंचभूतात्मकंजगदितिनिगदंति। तन्मतेभूतेभ्योमरणोत्तरंजीवस्तन्य मुत्पद्यते। जलबुद्बुदवज्जीवाः। चैतन्यविशिष्टः कायःपुरुषइति। तेचमद्यमांसेभुंजतेमात्रादागम्यागमनमपिकुर्वते। वर्षेरकस्मिन्नपिदिवसेसर्वेपिसंभूयययथानामनिर्गमनंस्त्रीभिरभिरमंते॥ धर्मकामाइपरंनमन्वते। तन्नामानिचार्वाकलोकायितबृहस्पत्यादीनि। गलत्चर्वभरैनेचर्वंतिभक्षयंतितत्ततोनमन्यंते॥ पुण्यपापादिकंपरोक्षंवस्तुजात्रामितिचार्वाकाः। मयाकथ्यमानंकेत्यादि। सिद्धैर्मोणादिदंडकेनशब्दनिपातनं। लोकाश्चार्विचाराः। सामान्यालोकास्तद्वदाचरंतीतिलोकायताः। लोकायतिकाइत्यपि। षट्दर्शनितमतप्रणेतत्वेनवार्हस्पत्याश्चेति। ७०॥ अथतन्मतमेवाह॥ लोकायतावदित्यंवैनास्तिकावीननिर्णीतः। धर्माधर्मौनविद्येतेनफलंपुण्यपापयोः॥ ८०॥ लोकायितानास्तिकाएवमित्थंचरंति। कथमित्याह। जीवश्चेतनालक्षणःपरलोकयायीनास्ति। पंचमहाभूतसमुदायस्यचैतन्यस्यैवभूतनाशेनानाशात्। परलोकानुसरणासंभवात्। जीवस्यानेवंचरंति

ORIENTAL RESEARCH INSTITUTE MEMORIAL BARODA

पादेन। देवः सर्वज्ञादिर्नास्ति। तथानानिर्वृतिर्मोक्षोनास्तीत्यर्थः। अन्यच्च धर्मश्चाधर्मश्च धर्माधर्मौनविद्येते। पुण्यपापेसर्वथानस्त इत्यर्थः। ननेवपुण्यपापयोः फलंस्वर्गनरकादिरूपंनास्ति। धर्माधर्मयोरभावेकुतस्तत्फलमितिभावः॥ ॥ ८० ॥ मोक्षंवक्ष्यतेस्वशास्त्रेप्रोक्तिरे। तथैवदर्शयेनाह। तथाचैतन्मतं। एतावानेवलोकोयंयावानिंद्रियगोचरः। भद्रेवृकपदंपश्ययदृंत्यबहुश्रुताः॥ ८१॥ ॥ तथाचैत्यपदर्शनेतन्मतंप्रक्रमान्नास्तिकमतं। तकीदृगित्याह। अयंप्रत्यक्षोलोकोमनुष्यलोकएतावानेवएतावन्मात्रएवनयागत। यावन्मात्रंइंद्रियगोचरः इंद्रियाणिस्पर्शरसनघ्राणचक्षुःश्रोत्राणिपंच। तेषांगोचरोविषयः। पंचेंद्रियविषयावृतमेववस्तुविद्यते॥ नापरंकिमपि। अत्रश्लोकत्रयेणश्लोकस्यषट्पदार्थसार्थायाख्याः। ततोयत्परेजीवंपुण्यपापेतत्फलंस्वर्गनरकादिकंचप्राहुः तंनास्ति। अप्रत्यक्षत्वात्। अप्रत्यक्षमप्यस्तीतिचेछशृंगवंध्यास्तनंधयादीनामपिभावोस्तु। नहिपंचविधेनप्रत्यक्षेणमरुत्कुबेरादिवस्तूनितिक्तकटुकषायादिद्रव्याणि। सुरभिदुरभिभावान्भूधरभवनभूरुहस्तंभकुंभाभोरुहाहनरपशुश्वापदादिखावरजंगमपदार्थसार्थान्। विविधवेणुवीणादिध्वनींश्चानेनमुच्यज्ञातुंचिरेण्यन्यदनुभूयते। यावतांचभूतेभूतचैतन्यव्यतिरिक्तश्चैतन्यहेतुतयापरिकल्प्यमानःपरलोकयायीजीवः प्रत्यक्षेणनानुभूयते। तावताजीवस्यसुखदुःखनिबंधनोधर्माधर्मौसत्प्रकृष्टफलभोगाभूमीस्वर्गनरकौ पुण्यपापक्षयोयथमोक्षसुखंचोपवर्ण्यमानानि आकाशेचित्रविरचनमिवकस्यनामनहास्यावहंसि। ततोव्यत्रास्पष्टमनाघ्रातमदृष्टमश्रुतमपिजीवादिकमाद्रीयमाणाः॥ स्वर्गापवर्गादिसुखलिप्साविप्रलब्धबुद्धयः। श्मश्रुलुंचनदुश्चरनरतपश्चरणाचरणदुःसहतपनातपसदनादिक्लेशैर्यतेमोक्षंजन्मक्षपयंति। तत्तेषांमहान्मोहोद्रेकविलसितं। तदुक्तं। तपांसियातनाश्चित्राःसंगमोभोगवंचनं॥ अग्निहोत्रादिकंकर्मबालक्रीडेवलक्ष्यते॥ १॥ यावज्जीवेत्सुखंजीवेन्नास्तिहृणमितंपिबेत्॥ भस्मीभूतस्यदेहस्यपुनरागमनंकुतः॥ २॥ इत्यादि। ततःसाक्षात्तमिंद्रियगोचरएवतात्विकइति॥ अथयेपरेक्षेविषयेनुमानागमादीनांप्रामाण्येनजीवपुण्यपापादिकंव्यवस्थापयंते॥ नजातुचिद्विरमंति। तान्प्रबोधयितुंदृष्टांतंप्राह॥ भद्रेवृकपदंपश्येत्यत्रायंसंप्रदायः। कश्चित्पुरुषोनास्तिकमतवासनावासितांतःकरणोनिर्जातायामस्तिकमतनिबंधनातिंस्वशास्त्रोक्तयुक्तिभिरभियुक्तः प्रत्यहंबोधयति। मातुयदानप्रतिबुध्यते। तदा

मायमनेनोपायेनप्रतिभोत्स्यतइतिस्वचेतसिविचिंत्यनिशायाःपश्चिमेयामे।तयासमंनगरान्निर्गत्यतांप्रत्यवादीत्।प्रिये मद्भमेनगरवासिनोनराःपरोक्षविषयेःनुमानादिप्रामाण्यमाश्रिताणा।लोकेनचबहुश्रुतनयाव्यवह्रियमाणाविद्यंते।प श्यंतेषांचारुचिंतारुविचारविचारणायांचातुर्यमिति। ततःसनगरद्वारादारभ्यचतुःपर्वयावन्मंथरतरप्रसृमरसमीरणसमीभू तपांशुप्रकरेराजमार्गस्वयोरपिस्वकरयोरंगुष्ठप्रदेशनामध्यमांगुलित्रयंमीलयित्वा।सशरीरस्यांभयोःपक्षयोः पांशुपुन्यासेनरूक्षपदानिप्रचक्रे।ततःप्रातःस्नानिपदानिनिरीक्ष्यासलोकोलोकोराजमार्गेःमिलत्।बहुश्रुताअपितत्रा गताः।तानाम्रत्यवोचत्।भोभोरूक्षपदानामन्यथानुपपत्यानूनंनिर्गतोरूक्षः कश्चनवनतो।त्रागछद्दित्यादि।ततःसलोक थाभाषमाणानन्निरीक्ष्यानतांभार्यांजल्प।हेभद्रेप्रियेरूक्षपदंज्ञातावेकवचनंपश्यनिरीक्षस्वेतिवादीत्।रूक्षपदंयेषां तत्यंत्यबहुश्रुताः।लोकरूढ्याबहुश्रुताभप्येतेपरमार्थमज्ञाताभाषमाणाअबहुश्रुताएवेत्यर्थः।यद्वाहेतिबहुश्रुताः।इतिषा ठेतेनंत्यार्थेयं।लोकप्रसिद्धाबहुश्रुताइति।तथाह्येतेरूक्षपदाविषयेसम्यगविदितपरमार्थबहवोप्येकसदृशमेवभाष माणाभविबहुमुग्धजनानध्यांध्यमुत्पादयंतोपिचसतांतत्वानादेयवचनाभवंति।तथाबहवोम्लेच्छादयोधार्मिक छद्मधूर्ताः।परवंचनैकप्रवणा।यत्किंचिदनुमानागमार्थाभिर्दर्शेमार्थंलोकाश्रितंतंसदृशमेवभाषमाणाअपिमु ग्धेबमुग्धजनान्।स्वर्गादिप्राप्तिलुब्धसुरवसंततिप्रलोभनयाभक्ष्याभक्ष्यगम्यागम्यहेयोपादेयादिसंकटेपातयंतो। बहुमुग्धधार्मिकव्यामोहमुत्पादयंतोपिचसतामवधारणीयवचनाएवभवंतीति।ततःसापत्न्यवचनंसर्वंमानितवती ॥८१॥तदनुचतस्यास्यपतिर्यदुपाहृष्टवान्॥तदेवदर्शयंनाह॥पिबखादेत्यचारुलोचने।यदितेवरगात्रेतन्न ते।नाहंभोरुगतंनियर्तते।समुद्रयमात्रान्नदंकलेवरं॥८२॥हेचारुलोचनेशोभनाक्षिपिब।पेयापेयान्यवस्तूनि विलोपेनमदिरादेःपानंकुरु॥मकेवलंपिबखादेत्यच।भक्ष्याभक्ष्यानिरपेक्षतयामांसादिकंभक्षयच।पिबखादेत्यत्रयो रुपलक्षणत्वात्गम्यागम्यविभागत्यागेनभोगमात्मपभोगेनस्वयौवनंसफलीकुर्वित्यपिबचोक्तंतात्पर्यं।यद्योवना दिभनोतंअतिक्रांतं।हेवरगात्रिहेप्रधानांगितद्भूयस्तेतवनभविष्यतीत्यध्याहार्यंचारुलोचनेवरगात्रीतिसंबोधन द्वयस्याप्यादरानुगततेरेकान्तचोनरूक्षदोषः।यदुक्तं॥अनुवादादरेनीप्याभ्यूहार्थावनियोगहेत्वस्त्वयासु।ईषत्संस्प

मावस्मथगणनास्मरणेषुपुनरुक्तं॥१॥अथस्वेछाविचरितेपानेखादनेभोगसेवनेचसकलापारलौकेकृष्टपरंपरासुलभं वसतिसुखतसंचयेभवांतरेभोगसुखयौवनादिकमितिपरमशंकांपरिहर्तुमाह॥नाहंनेचभीरुपरोक्षमात्रेणनरकादिप्रा प्यदुःखभयाकुलेगतंदृष्टभवादृतकांतेसुखयौवनादिनवर्तते॥परलोकेपुनरप्युपदेशकले।परलोकसुखलिप्सयात पश्चरणादिकृच्छ्रक्रियाभिरिहत्यसुखोपेक्षणंव्यर्थमित्यर्थः॥अत्रशुभाशुभकर्मपरतंत्रेणजीवेनासंकायमधिनाधिष्ठ यतेनान्यत्परलोकेपिस्वकर्महेतुकंसुखदुःखादिवेदितव्यमेवेत्याशंक्याह॥समुद्रयमात्रंसमुद्रयोभूतचतुष्टयसं योगस्तन्मात्रं॥मात्रशब्दोवधारणे।इदंप्रत्यक्षंकलेवरंशरीरमेवास्तात्यध्याहारे।नपुनर्भूतचतुष्टयसंयोगमात्रा दपरोभवांतरयायी॥शुभाशुभकर्मविपाकभोक्ता॥कायेयश्चनज्ञोयोविद्यते।भूतचतुष्कसंयोगश्चावबुद्धोज्ञातृत्वज्ञ णतोदृष्टनष्टस्तस्मात्परलोकानपेक्षयाययेछंपिबखादेत्येत्यर्थः॥८२॥ ॥अथप्रमेयंप्रमाणंचाह॥किंचएतः श्वीजलंतेजोवायुर्भूतचतुष्टयं॥आधारोभूमिरेतेषांमानंचक्षुस्तमेवहि॥८३॥ किंचेत्यभ्युच्चये॥एथ्वीभूमिः।जलमा पः।तेजोवन्हिः।वायुःपवनोभूतचतुष्टयं।एतानिभूतानिचत्वारि।आधारोभूमिरेतेषां।एतेषांभूतानामाधारोधि करणंभूमिः।एथ्वीचैतन्यभूमिरेतेषामिति पाठेतुचतुष्टयंकिंविशिष्टंचैतन्यभूमिश्चैतन्योत्पत्तिस्थानं।भूतानिसंभूये कंचैतन्यंजनयंतीत्यर्थः।एतेषांचार्वाकाणांमतेप्रमाणंभूमिरेतेषामिति। पाठांतरेतुभूतचतुष्टयंप्रमाणंभूमिः।प्र माणंगोचरमात्रिकएतेषांमतेमानंतुप्रमाणंपुनरक्षजमेव। प्रत्यक्षमेवैकं।नपुनरनुमानादिकंप्रमाणंहृद्यं॥त्र विशेषार्थोवर्ततेविशेषः।पुनश्चार्वाकैर्लोकयात्रानिर्वाहणप्रवणंश्रुत्याद्यनुमानमिष्यते॥क्वचन पुनः२स्वर्गादृष्ट दृष्टप्रसाधकमलौकिकमनुमानमिति॥८३॥ ॥अथभूतचतुष्टयीप्रभावादेहेचैतन्योत्पत्तिः कथंप्रतीयतामित्याशं क्याह॥एथ्यादिरूपसंहत्या तथादेहपरिणतेः॥मदशक्तिःसुरांगेभ्योयद्वत्तद्विज्ञानमात्मनि॥८४॥ ॥एथिव्यादीनि। एथिव्यप्तेजोवायुलक्षणानियानिभूतानितेषांसंहतिः समवायःसंयोगइतियावत्।तथाहेतुभूततयातथातेनप्रका रेणयादेहस्यपरिणतिः परिणामस्तस्याः सकाशात्तद्वतिर्योगः।तद्यथासुरांगेभ्योगुडधातक्यादिभ्योमद्यांगे भ्योमदशक्तिरुन्मादकत्वंभवति।तद्वत्तथाचैतन्यमात्मनिशरीरे।अत्रात्मशब्देनानेकार्थेनशरीरमेवगृहीतव्यम्।

नपुनर्नवि॰ अयंभावः भूतचतुष्टयसंबंधादृष्टपरिणाम ज्ञानश्चदेहचैतन्यमिति। अत्रपरिणतिशब्देषत्रभावेपिबाहुल्यका
पसर्गस्यदीर्घत्वंमितं। पाठांतरंवा। पृथ्याद्भूतसंहत्यांतथादेहादिसंभवः। मदशक्तिःसुरांगेभ्योयद्वत्तद्वत्तच्छैतन्यात्मना॥१
पृथिव्याद्भूतसंहत्यांसत्यां। तथाशब्दः पूर्वश्लोकापेक्षयासमुच्चयेदेहादिसंभवः आदिशब्दात् भूधराद्योसंभूत
॥ ८८ ॥ संयोगज्ञातव्यः। सुरांगेभ्योयद्वन्मदशक्तिर्भवति। तद्वत्भूतसंबंधात्। शरीरेआत्मतासचेतनताशिक्षितान्यचलितेतिन्या वा
चवाचस्पतिः। पृथिव्यप्तेजोवायुस्थितितत्वानि। तत्समुदायेशरीरविषयेंद्रियसंज्ञासंज्ञेभ्यश्चैतन्यमिति॥ ६४॥ एवंचितेयं प ४७
पादशंति। तथादर्शयन्नाह॥ तस्मात्दृष्टपरित्यागात्यदृष्टेप्रवर्तने॥ लोकस्यतद्विमूढत्वंचार्वाकाःप्रतिपेदिरे॥ ६५॥
यस्माद्भूतेभ्यश्चैतन्योत्पत्ति तस्मात्कारणादृष्टपरित्यागात दृष्टप्रत्यक्षानुभूतमैहलौकिकंयद्विषयजंसुखंतस्यपरित्या
गादृष्टेपरलोकसुखादेरसंपश्चरणादिकष्टक्रियासाध्येयत्रप्रवर्तनंप्रवृत्तिः। तस्मिंल्लोकस्याविमूढत्वमज्ञानत्वमेवेतिचार्वाकाःप्र
तिपेदिरे। प्रतिपेदुः। यतोहिलोकोविप्रतारकवचनोपन्यासत्रासितमज्ञानोदूरागतमिहलोकंसुखंविहायस्वर्गापवर्गसुखे
प्सया तपोजपध्यानहोमादौयत्नते। तत्रतस्याज्ञानतैवकारणमितितन्मतोपदेशः॥ ६५॥ अथयेनांतस्मपूरुपूरित
स्वांतानिरूपमंशर्मसुखंवर्णयंति। तानादृत्यचार्वाकाब्रुवते। तदाह॥ साध्यसाधनसिद्धिभ्यांयाप्रीतिर्जायतेतत्तने॥
निरर्थोमामतेतेषांधर्मः कामात्परोनहि॥ ६६॥ साध्यंध्यानंद्विधा। उपादेयंहेयंच। उपादेयेधर्म्यशुद्धध्यानयुगेहे
योचार्तरौद्रध्यानयुगे। अथवासाध्येसाधनीयेकार्ये। उपादेयेपुण्यरूपेतपः संयमादौ। हेयेचपापरूपेविषय
सुखादिकेक्रमेणप्रवृत्तिभ्यांप्रवर्तननिवर्तनाभ्यांजनेलोकेयाप्रीतिर्मनः सुखंजायते समुत्पद्यते। सातेषांचार्वाकाणां
मतेनिरर्थाकिः प्रयोजनाकिः फलाअसत्तिकीत्यर्थः। हृदयमाद्धर्मः कामाद्विषयसुखसेवनान्नपरः कामएवपरमोध
र्मस्तज्ज्ञानंतमेवचपरंसुखमितिभावः। अथवायेधर्मप्रभवादृष्टलोकेपिइष्टानिष्टकार्ययोः सिध्यसिद्धीवदंति। तान्प्रा
तिपेदिरेचार्वाकाजल्पंति। तदर्शयन्नाह॥ साध्यसाधनसिद्धिभ्यामित्यादि। तपोजपहोमादिभिः साध्यस्यप्रेक्षितकार्य
स्ययाप्राप्तिः सिद्धिः। यावतैरेवतपोजपादिभिरनिष्टस्यसाध्यस्यविघ्नादेर्निरासिस्तिरभावस्तियावत। ताभ्यांसा
ध्यसाधनसिद्धिभ्यांयाप्रीतिर्जायते सानिरर्था अर्थशब्दस्यहेत्वर्थस्यापिभावान्निर्हेतुकानिर्मूला। तेषांमतेहियस्माद्धर्मः

कामान्नपरइति। भारवत॥ ६६॥ ॥ उपसंहरन्नाह॥ लोकायितमतेष्वेवंसंक्षेपोयंनिदर्शितः॥ ननुबौद्धादिमतेषुसर्वेषुपिसंक्षे
पएवात्रयदुच्यते॥ तद्विस्तरेण। तत्परमार्थः। कथमवभोत्स्यतेइत्याशंक्याह॥ अभिधेयेत्यादि। अभिधेयस्यसर्वदर्श
नवाच्यस्यार्थस्यतात्पर्यार्थः शोषविशेषविशिष्टः परमार्थः पारिसमंतात्। षोवापर्येणालोच्यः। स्वयंविमर्शनीयोथवा
लोचृदर्शने॥ इतिधातुपाठाल्लोच्यस्तत्तदीयशास्त्रेभ्योवलोकनीयः। सुबुद्धिभिः सुनिपुणमतिभिः संक्षिप्तरु
चिसत्वानुग्रहार्थतादस्यसूत्रकरणस्येति। अथवासर्वदर्शनसंमतानांसत्वानांपरस्परंविरोधमाकर्ण्यैकंकर्तव्यता
मूढानांप्राणिनांयत्कर्तव्योपदेशमाह॥ अभिधेयेत्यादि। अभिधेयंसर्वदर्शनसंबंधीप्रतिपाद्योर्थः। तस्ययस्तात्पर्यार्थ
र्थः। सत्यासत्यावेभागेनव्यवस्थापितस्तत्वार्थः। सपर्यालोच्यः। सम्यगविचारणायो नपुनर्यथोक्तमात्रानार्वाचीनं
ग्राह्यः। कैः सुबुद्धिभिः सुष्ठुशोभना मार्गानुसारिणीपक्षपातरहिताबुद्धिर्मतिर्येषां। तैःसुबुद्धिभिस्तैर्नपुनः कदाग्रहग्र
हिलैः। यदुक्तं। भाग्यद्वीक्षतनवीक्षतियुक्तं तत्रतत्रमतिरस्यानविद्धा पक्षपातरहितस्यतुयुक्तिर्यत्रतत्रमतिरेतिनि
वेशमिति। अयमत्रभावार्थः। सर्वदर्शनानांपरस्परंमतविरोधमाकर्ण्यमूढस्यप्राणिनः सर्वदर्शनस्यैकत्यात्मतायांनि
जदर्शनैकपक्षपातितयावा दुर्लभंस्वर्गापवर्गसाधकत्वं। अतोमध्यस्थबुद्धितयाविमर्शनीयः। सत्यासत्यार्थविभागे
नतत्वातिकोर्थः विमृश्यश्रेयस्करःपंथाअभ्युपगंतव्योयतितव्यंचतत्रकुशलमतिभिः॥ ॥ इतिश्रीतपागणनभो
गणदिनमणिश्रीदेवसुंदरसूरिपट्टोदयाद्रिश्रीगुणरत्नसूरिविरचितायांतर्कदीपिकायांषड्दर्शनसमुच्चयवृ
त्तौजैमिनीयचार्वाकीयमतस्वरूपनिर्णयोनामषष्ठाधिकारः॥ समाप्तः॥ ॥ तत्समाप्तौचसमाप्तंचेयंतर्करहस्यदीपि
कानाम्नीषड्दर्शनसमुच्चयवृत्तिः॥ ग्रंथाग्रं॥ ॥७॥ संवत १५३५ वर्षे माघवदि ५ गुरौश्रीमंगलपुरेपं० माणिक्ये
नगणिभिरात्मश्रेयोर्थंलिखितेति॥ १॥ ॥७॥ सांप्रतनाके १७८२ रौद्रनामसंवत्सरेआश्विनशुद्ध ५ गुरौतादृनेदृपुस्तकं
लिखितंस्वार्थेपरार्थेवा॥ शुभंभवतु॥ ॥श्रीर्नंदतु॥ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इति तर्करत्नषड्दर्शननाम्नीसमाप्तः॥